मंद इति ॥ किंच मंदो मूढः । मूढाल्पापटुनिर्भाग्या मंदाः इत्यमरः । तथापि कवियशःप्रार्थी कवीनां यशः काव्यनिर्माणेन तत्प्रार्थना-
शीलोहं । प्रांशुनोन्नतपुरुषेण लभ्ये प्राप्ये फले फलविषये लाभार्थेन उद्बाहुः फलग्रहणायोच्छ्रितहस्तो वामनो ह्रस्व इव ।
खर्वो ह्रस्वश्च वामनः इत्यमरः । उपहास्यतां उपहास्यविषयतां । [illegible] गमिष्यामि प्राप्स्यामि ॥ ३ ॥ मंदश्चेत्तर्हि त्य-
ज्यतामयमुद्योग इत्यत आह ॥ अथवेति ॥ अथवा पक्षांतरे पूर्वैः सूरिभिः कविभिर्वाल्मीकादिभिः कृतवाग्द्वारे कृतानि रामायणादि
प्रबंधरूपाणि वाक्स्येव द्वाराणि प्रवेशा यस्य तस्मिन् । अस्मिन् सूर्यप्रभवे वंशे कुले । जन्मनैकलक्षणसंतानो वंशः । वज्रेण मणिवेधकसू-
मंदः कवियशःप्रार्थी गमिष्याम्युपहास्यतां । प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥ ३ ॥ अथवा कृतवाग्द्वारे वंशेऽस्मिन्पू-
र्वसूरिभिः । मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४ ॥ सोहमाजन्मशुद्धानामाफलोदयकर्मणां । आसमुद्रक्षितीशानामा-
चीविशेषेण । वज्रं त्वस्त्री कुलिशं शस्त्रयोः मणिवेधकरत्नभेदेऽपि केशवः । समुत्कीर्णे विद्धे मणौ सूत्रस्येव मे गतिः संचारोस्ति । वर्ण-
नीये रघुवंशे मम वाक्प्रसारोस्तीत्यर्थः ॥ ४ ॥ एवं रघुवंशे लब्धप्रवेशस्तद्वर्णनां प्रतिजानीते । सोहमित्यादिभिः पंचभिः श्लोकैः कुलके-
नाह ॥ सोहमिति ॥ सोहं रघूणामन्वयं वक्ष्ये इत्युत्तरेण संबंधः । किंविधानां रघूणां इत्युत्तराणि विशेषणानि योज्यानि । आजन्म जन्म
आरभ्येत्यर्थः । आङ्मर्यादाभिविध्योरित्यव्ययीभावः । तत्र शुद्धानां सुप्सुपेति समासः । एवमुत्तरत्रापि द्रष्टव्यं । आजन्मशुद्धानां
निषेकादिसर्वसंस्कारसंपन्नानामित्यर्थः । आफलोदयं आफलसिद्धेः कर्म येषां ते तथोक्ताः । तेषां प्रारब्धांतगामिनां । आसमुद्र-
क्षितीशानां सार्वभौमानामित्यर्थः । आनाकं रथवर्त्म येषां तेषां । इंद्रसहचारिणामित्यर्थः । अत्र सर्वत्र आङोभिविध्यर्थत्वं द्रष्टव्यं । अ

म२ १

इति वायुपुराणसंहितावचनेन पार्वतीपरमेश्वरयोः पितृत्वदर्शनमतिपितरौ सपार्वतीव अभिवादये वागर्थाविति। वागर्थाविवेत्येकं पदं इवेन

म२ सह नित्यसमासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं चेति वक्तव्यं। एवमन्यत्रापि द्रष्टव्यं। वागर्थाविव शब्दार्थाविव संपृक्तौ नित्यसंबद्धावित्यर्थः। नित्यसंबं

प२ धयोरुपमानत्वेनोपादानान्नित्यः शब्दार्थसंबंध इति मीमांसकाः। जगतो लोकस्य पितरौ मातापितरौ पिता मात्रेति द्वंद्वैकशेषः। मातापितरौ

पितरौ मातरपितरौ प्रसूजनयितारौ इत्यमरः। एतेन पार्वतीपरमेश्वरयोः सर्वजगज्जनकतया वैशिष्ट्यमिष्टार्थप्रदानशक्तिः परमकारुणिकत्वं च सू

च्यते। पर्वतस्यापत्यं स्त्री पार्वती तस्यापत्यमित्यण्प्रत्ययः। टिड्ढाणञिति ङीप्। पार्वती च परमेश्वरश्च पार्वतीपरमेश्वरौ परमशब्दः सर्वोत्तमत्वद्योतनार्थः

मातुरभ्यर्हितत्वादल्पाच्तरत्वाच्च पार्वतीशब्दस्य पूर्वनिपातः। वागर्थप्रतिपत्तये शब्दार्थयोः सम्यग्ज्ञानार्थं वंदे अभिवादये। अत्रोपमालंकारः॥

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पितरौ वंदे पार्वतीपरमेश्वरौ॥१॥ क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः। तितीर्षुर्दुस्तरं मोहादुडु
पेनास्मि सागरं॥२॥

उपवंतथा कथतः सिद्धेन भिन्नेन संपन्नेन च धर्मेतः। साम्यमनमेनवर्णास्य वाच्यं वक्त्रकोऽमंगप्रिकष्ठापमेलंकारः। कालिदासो काव्यादौ मंद्वितोक

स्यमवंशगुरोर्महागुणस्य श्रीरामचंद्रस्य शोभालाभः स्वसंकेतेन हुतं शुभदोमीन्महत्त्विमनवंदितिवक्तास्त्याम्नतवीजत्वात्स्वपामननिसिद्धिः। १ संप्रति कविः स्वाहं मां

परिहसिकस्वर्यत्यादिश्लोकद्वयेन प्रभवत्यस्मादिति प्रभवः कारणं ब्रह्मादेः पूज्यकर्तरि च कारके संज्ञायामिति साधु। सूर्यः प्रभवो यस्य सूर्यप्रभवः। वंश

कुलस्यादिकल्पांतूष्णोपधीयस्याः सा अल्पमतिः अल्पाक पोकशब्दो मदंदवांस्थपनं अंहः। सूर्यवंशमाल्पमतिश्च कीर्तनवीचाथीः तथा वत्हिमदपत्रवं परि निरपे

ं तु दुस्तरमनिनिमावः तथा दिद्दुस्तरं तितीर्षुस्तरं तुमिच्छुः मोहादज्ञानात् उडुपेन उडुपेन तु प्लवः कोलः इत्यमरः। अथ वीचि

छुकलादैना ...

र. टी.
३

शैशवेति शिशोर्भावः शैशवं बाल्यं प्राणभृज्जातिवयोवचनेभ्योऽञ् इत्यञ्प्रत्ययः । तस्मिन्वयसि अभ्यस्तविद्यानां
एतेन ब्रह्मचर्याश्रमो विवक्षितः । यूनो भावो यौवनं तारुण्यं । तारुण्यं यौवनं समे इत्यमरः । युवादित्वाद
णू प्रत्ययः । तस्मिन्वयसि विषयैषिणां भोगाभिलाषिणां । एतेन गृहस्थाश्रमो विवक्षितः । वृद्धस्य भावो वा
र्धकं वृद्धत्वं द्वन्द्वमनोज्ञादिभ्यश्चेति वुञ् । वार्धकं वृद्धकर्मणीति विश्वप्रकाशः संघातार्थो । वृद्धेति वत्स ।
ल्यात्मवृद्धिको वुञ् । तस्मिन्वार्धके वयसि मुनीनां वृत्तिरिव वृत्तिर्येषां तेषां । एतेन वानप्रस्थाश्रमो विवक्षि

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणां । वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजां ॥ ८ ॥ रघूणामन्वयं वक्ष्ये
तनुवाग्विभवोऽपि सन् । तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥ तः ॥ अन्ते शरीरत्यागकाले योगेन
परमात्मध्यानेन । योगः संनहनोपायध्यानसंगतियुक्तिष्वित्यमरः । तनुं त्यजंतीति तनुत्यजः । अन्येष्वपि
दृश्यत इति क्विप् तेषां तनुत्यजां । एतेन मोक्षभावो विवक्षितः । ८ । रघूणामिति । सोऽहं तनुः सूक्ष्मो वाक्तनु
वाग्विभवोऽपि सन् अल्पवागपि सन्नपि । तेषां रघूणां गुणैः आजन्मशुद्ध्यादिभिः कर्तृभिः कर्णं मम श्रोत्र
मागत्य चापलाय । युवादित्वात्कर्मण्यण् । चापलं चपलत्वं अविमृश्यकरणं कर्तुं क्रियार्थोपपदेत्यादिना

राम
३

यथाविधीति॥ विधिमनतिक्रम्य यथाविधि॥ यथार्थेऽव्ययीभावः॥ तथा हुतशब्देन सुप्सुपेति समा
सः॥ एवं यथाकामार्चितेत्यादीनामपि द्रष्टव्यं॥ यथाविधि हुता अग्नयो यैस्तेषां॥ यथाकामं अभिलाषमनतिक्रम्य
अर्चिता अर्थिनो यैस्तेषां॥ यथापराधमनतिक्रम्य दंडो येषां तेषां॥ यथाकालं कालमनतिक्रम्य प्रबोधिनां॥ एवंविधनशी
लानां चतुर्भिर्विशेषणैः॥ देवताराधनातिथिसत्कारदंडधरत्वप्रजापालनसमयजागरूकत्वादीनि विवक्षि
तानि॥ त्यागायेति॥ त्यागाय सत्पात्रे विनियोगस्त्यागस्तस्मै संभृतार्थानां संचितधनानां न तु दुर्व्यापाराय॥ स

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां॥ यथापराधदंडानां यथाकालप्रबोधिनां॥ ६॥ त्यागाय संभृ
तार्थानां सत्याय मितभाषिणां॥ यशसे विजिगीषूणां प्रजायै गृहमेधिनां॥ ७॥

त्याय मितभाषिणां मितभाषण
शीलानां न तु पराभवाय॥ यशसे विजिगीषूणां विजेतुमिच्छूनां न त्वर्थसंग्रहाय॥ प्रजायै संतानाय गृहमेधिनां
दारपरिग्रहाणां न तु कामोपभोगाय॥ अत्र त्यागायेत्यादिषु चतुर्थी॥ तदर्थार्थादिना तादर्थ्ये चतुर्थी समासविधा
नज्ञापनाच्चतुर्थी॥ गृहैर्दारैर्मेधन्ते संगच्छन्त इति गृहमेधिनः॥ दारेष्वपि गृहा इत्यमरः॥ जायाश्च गृहे गीर्गेह इति
हलायुधः॥ मेधृ वधमेधासंगमेष्विति धातोर्णिनिः॥ एभिर्विशेषणैः परोपकारित्वं सत्यवचनत्वं यशःपरत्वं पित

व्यूढेति ॥ व्यूढेत्यादिभिस्त्रिभिः श्लोकैर्दिलीपं विशिनष्टि ॥ व्यूढं विपुलं उरो यस्य स व्यूढोरस्कः ॥ उरःप्रभृति ॥ भ्यः कप् ॥ व्यूढं
विपुलं मङ्गस्योरं प्रमेवरिकृं चेत्यमरः ॥ वृषस्यस्कंध इव स्कंधो यस्य स वृषस्कन्धः ॥ समस्तमुपमानेस्याद्विमाउत्तरप
दलोपी बहुव्रीहिः ॥ शालो वृक्षवत्प्रांशुरुन्नतः शालप्रांशुः ॥ प्राकारवृक्षयोः शालः शालः सर्जतरुः स्मृ
तः इति यादवः ॥ महान्तौ भुजौ यस्य स महाबाहुः ॥ आत्मकर्मक्षमं स्वव्यापारानुरूपं देहमाश्रितः प्राप्तः क्षात्रः क्षत्रसंबंधी
धर्म इवाश्रितः ॥ मूर्तिमानिव पराक्रम इवावस्थित इत्युत्प्रेक्षा ॥ १३ ॥ सर्वातिरिक्तेति ॥ सर्वातिरिक्तसारेण सर्वेभ्योऽ

3 ॥ व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः ॥ आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३ ॥ सर्वातिरिक्तसारेण सर्व-
॥ तेजोभिभाविना ॥ स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ॥ १४ ॥

भ्याधिकबलेन ॥ सर्वाणि भूतानि तेजसा अभिभ
वतीति सर्वतेजोभिभाविना तेन ॥ सर्वेभ्य उन्नतेनात्मना शरीरेण ॥ आत्मा देहधृतौ जीवे स्वभावे परमात्मनि इति विश्व
ः ॥ मेरुरिवोर्वीं क्रान्त्वा आक्रम्य स्थितः ॥ मेरावपि विशेषणानि तुल्यानि ॥ अत्र भिन्नमुखेन्द्राणां मात्राभिर्निर्मितो न
पः ॥ तस्मादभिभवत्येष सर्वभूतानि तेजसैवमनुवचनात् राजा सर्वतेजोभिभावित्वं ॥ १४ ॥ छ ॥ छ ॥ छ ॥ छ ॥ राम
ति

सराजा इवीं क्रां आक्रम्य मेरुरिवात्म
मना स्थितः ...

संप्रतिस्वप्रबंधपरीक्षार्थं संतः प्रार्थ्यंते ॥ तमिति ॥ तं रघुवंशाख्यं प्रबंधं सदसतोः गुणदोषयोः व्यक्तौ हेतवः कर्ता
रः संतः श्रोतुमर्हंति तथाहि हेम्नो विशुद्धिर्निर्दोषस्वरूपं श्यामिकापि लोहांतरसंसर्गात्मको दोषो वा अग्नौ
संलक्ष्यते नान्यत्र तद्वदत्रापि संत एव गुणदोषविवेकाधिकारिणो नान्य इति भावः ॥ १० ॥ वर्ण्यं वस्तूपक्षिपति वैवस्वत इति
मनुर्नाम मनीषिणः मनीषिणां धीमतां विदांसद्भुतिवाचवत् पृषोदरादित्वात्साधुः तेषां माननीयः पूज्यः छंदसां वेदानां
ते५ छंदः पद्ये च वेदे चेति विश्वः प्रणव ओंकार इव महीक्षितः महीं क्षियंतीति महीक्षितः क्षितीश्वराः क्षिधातोरैश्वर्यार्थात् क्विप् तुगागम

तं संतः श्रोतुमर्हंति सदसद्व्यक्तिहेतवः ॥ हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १० ॥ वैवस्वतो मनु
र्नाम माननीयो मनीषिणां ॥ आसीन्महीक्षितामाद्यः प्रणवश्छंदसामिव ॥ ११ ॥ तदन्वये शुद्धिमति प्रसूतः शुद्धिम
त्तरः ॥ दिलीप इति राजेंदुरिंदुः क्षीरनिधाविव ॥ १२ ॥ तदन्वय इति शुद्धिरस्यास्तीति शुद्धिमान् तस्मिन् तदन्वये तस्य
मनोरन्वये अतिशयेन शुद्धिमान् शुद्धिमत्तरः ॥ द्विवचनविभज्येत्यादिना तरप् दिलीप इति प्रसिद्धो राजा इंदुरिवेत्युपमित समासः
इंदुः राजश्रेष्ठः उपमितं व्याघ्रादिभिरिति समासः ॥ क्षीरनिधाविंदुरिव प्रसूतः ॥ १२ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५

॥ ६ ॥ [illegible]

[illegible]

प्रजानामिति॥ स राजा प्रजानां भूत्यै भूत्यर्थं तु षष्ठांशमेवेति॥ अर्थेन सह नित्यसमासः॥ सर्वलिंगता चेति वक्तव्या
॥ त्सहमक्रियाविशेषणं चैतत्॥ ताभ्यः प्रजाभ्यो बलिं षष्ठांशरूपं करमग्रहीत्॥ भागधेयः करो बलिः इत्यमरः
तथाहि रविः सहस्रगुणमुत्स्रष्टुं कर्मणि तथा॥ तथा सहस्रगुणं सहस्रधा उत्स्रष्टुं दातुं उत्सर्जनक्रियावि
शेषणं चैतत्॥ रसमंबु आदत्ते गृह्णाति॥ रसो गंधरसे स्वादे तिक्तादौ विषरागयोः॥ शृंगारादौ द्रवे वीर्ये देहधातु
ध्वनौ पारदे इति विश्वः॥ १८॥ संप्रति बुद्धिशौर्यसंपन्नस्य तस्यार्थसाधनेषु परानपेक्षत्वमाह॥ सेनेति॥ तस्य राज्ञः से

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्॥ सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥ १८॥ सेना परिच्छदस्तस्य द्वयमेवा
र्थसाधनं॥ शास्त्रेष्वकुंठिता बुद्धिर्मौर्वी धनुषि चातता॥ १९॥ तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च॥ छ॥ छ॥ छ॥ छ

ना चतुरंगबलं परिच्छाद्यतेऽनेनेति परिच्छदः॥ उपकरणं बभूव॥ छत्रचामरादितुल्यमभूदित्यर्थः॥ पुंसि संज्ञायां घः
प्रायेणेति घप्रत्ययः॥ छादेर्घेऽद्व्युपसर्गस्येति ह्रस्वः॥ अर्थस्य प्रयोजनस्य तु साधनं द्वयमेव शास्त्रेष्वकुंठि
ताऽप्रतिहता बुद्धिः॥ ध्याने स्यात्पर्यायः॥ धनुषि आसंतात्प्रोपिता मौर्वी च॥ मौर्वी ज्या गुणः शिंजिनी इत्यमरः॥ नी
तिपूर्वः पराक्रमश्च तस्यार्थसाधनमित्यर्थः॥ १९॥ राज्यमूलं मंत्रसंरक्षणमाह॥ तस्येति॥ संवृतमंत्रस्य गुप्तविचार
स्य वेदभेदे गुप्तवादे मंत्र इत्यमरः॥ आकारः स्वाभाविकप्रकाशः॥ कुशिमुखरागादिराकारः॥ इंगितं चेष्टितं इत्याकारविचारौ॥ च

आकारेति ॥ आकारेण मूर्त्या सदृशी प्रज्ञा यस्य सः ॥ प्रज्ञया सदृश आगमः प्रज्ञानुरूपशास्त्रपरिश्रमः ॥ आगमैः सदृशः आरंभः कर्म यस्य सः ॥ तथोक्तः ॥ आरभ्यत इत्यारंभः कर्मतस्य सदृश उदयः फलसिद्धिर्यस्य स तथोक्तः ॥ १५ ॥ भीमेति ॥ भीमैः कांतैश्च नृपगुणैः तेजःप्रतापादिभिः कुलशीलदाक्षिण्यादिभिश्च सः दिलीपः उपजीविनामाश्रितानां यादोभिर्जलजंतुभिः ॥ यादांसि जलजंतवः इत्यमरः ॥ रत्नैश्चार्णव इव अधृष्यः ॥ अनभिभवनीयश्चाभिगम्यश्चाश्रयणीयश्चाभूत् ॥ १६ ॥ रेखामात्रमिति ॥ नियंतुः शिक्षकस्य सारथेश्च तस्य दिलीपस्य संबंधिन्यः प्रजाः

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ॥ आगमैः सदृशारंभः आरंभसदृशोदयः ॥ १५ ॥ भीमकांतैर्नृपगुणैः स बभूवोपजीविनां ॥ अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥ १६ ॥ रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परं ॥ न व्यतीयुः प्रजास्

भिः ॥ नेमिः स्त्री स्यात्प्रधिः पुमान् इत्यमरः ॥ प्रजाः आमनोर्मनुमारभ्य क्षुण्णं विविधं पदं पदं येन तत् ॥ समासस्य विभाषितत्वात् तस्य मार्गस्य ॥ रेखा ईषत् वर्त्मनः ॥ आचारपद्धतेः अध्वनश्च परम् अधिकम् इत्यर्थः ॥ रेखाप्रमाणं अस्ति ॥ रेखामात्रं रेखाप्रमाणमीषदपीत्यर्थः ॥ प्रमाणे द्वयसज्दघ्नञ्मात्रचः इत्यत्र मात्रच् प्रत्ययः ॥ परन्तु विशेषणं चैतत् ॥ न व्यतीयुः ॥ नातिक्रान्तवत्यः ॥ कुशलसारथिप्रेरिता रथनेमय इव प्रजाः ॥ पूर्वक्षुण्णमार्गं न जहुरिति भावः ॥ १७ ॥

तुल्यारम्भफलोदयाते २

द्विविधं वृद्धत्वं ज्ञानेन वयसा च तत्र ज्ञानेन वृद्धत्वमाह ॥ अनाकृष्टस्येति ॥ विषयैः शब्दादिभिरनाकृष्टस्यावशीकृतस्य विद्यानां वेदवेदांगानां पारदृश्वनः ॥ पारमंतं दृष्टवतः ॥ दृशेः क्वनिप् ॥ धर्मरतेर्धर्मासक्तस्य राज्ञः जरसा जरया विना ॥ विस्रसा जरा इत्यमरः ॥ षिद्भिदादिभ्योऽङ् प्रत्ययः ॥ जराया जरसन्यतरस्यामिति जरसादेशः ॥ वृद्धत्वं वार्धकमासीत् ॥ तस्य यूनोऽपि विषयवैराग्यादिज्ञानगुणसंपन्नत्वात् ज्ञानतो वृद्धत्वमासीदित्यर्थः ॥ नाथस्तु चतुर्विधवृद्धत्वमिति कृत्वाऽनाकृष्टस्यादिना वि

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ॥
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ॥ २३ ॥
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ॥ स
पिता पितरस्तासां केवलं जन्महेतवः ॥ २४ ॥

शेषतान्वयेनावैराग्यज्ञानशीलवृद्धत्वान्युक्तानीत्यवोचत् ॥ २३ ॥ प्रजानामिति ॥ प्रजायंत इति प्रजाः जनाः उपसर्गे च संज्ञायामिति ड प्रत्ययः ॥ तासां विनयस्य शिक्षायाः आधानात्करणात् सन्मार्गवर्तनादिति यावत् ॥ रक्षणाद्भयहेतुभ्यस्त्राणात् ॥ आपन्निवारणादिति यावत् ॥ भरणादन्नपानादिभिः पोषणादपि [illegible] ॥ स राजा पिताऽभूत् ॥ तासां पितरस्तु जन्महेतवो जन्ममात्रकर्तारः केवलमुत्पादका एवाभूवन् ॥ जननमात्र एव पितॄणां व्यापारः ॥ सदा शिक्षारक्षणादिकं तु स एव करोतीति तस्मिन्पितृव्यपदेशः ॥ आ

श्री

श्रयपनैश्रीलक्ष्मीं ॥ मंदिर अमर जेता लो श्री लक्ष्मी मातृश्रि सद्भूमा प्रश्ले द्युवान श्रीजीनादक ताकुना

स्वभावश्चापलादाघपरंपरया वा मुखरागादिलिंगैर्वा अननुमेयमभिप्रायं यस्य तस्य प्रारभ्यन्त इति प्रारंभाः सामाद्युपाय
प्रयोगाः । आभिस्वरूपेण पूर्वजन्मार्जिते । तत्र भवाः प्राक्तनाः साध्वीरित्यादिना पूर्वत्ययः संस्काराः पूर्वक
र्मवासनाः फलेन कार्येणानुमेयाः । अनुमातुं योग्या आसन् । अत्र याज्ञवल्क्यः । मंत्रमूलं यतो राज्यं अतो मं
त्रं सुरक्षितं । कुर्याद्यथास्य न विदुः कर्मणामाफलोदयादिति ॥ २० ॥ संप्रति सामाद्युपायानुष्ठाने बालरक्षादिकं स्व
स्वामित्याह । जुगोपेति । अत्रस्तः अभीतः सन्नात्मानं व्याधिमंतरेणैव हि रक्षाविधिः । प्रथमं साधनं खल्विवास्माने

फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव ॥ २० ॥ जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः । अगृध्नुराददे सोर्थमसक्तः
सुखमन्वभूत् ॥ २१ ॥ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः । गुणा गुणानुबंधित्वात्तस्य सप्रसवा इव ॥ २२ ॥ छ ॥ छ ॥

शरीरं जुगोप रक्षितवान् । अनातुरः अरुग्ण एव धर्मं सुकृतं भेजे अर्जितवानित्यर्थः । अगृध्नुः अगर्धनशील एवार्थं द्र
व्यमाददे स्वीकृतवान् । त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नुप्रत्ययः । असक्तः आसक्तिरहित एव सुखमन्वभूत् ॥ २१ ॥
परस्परविरुद्धानामपि गुणानां तस्मिन् साहचर्यमासीदित्याह । ज्ञान इति । ज्ञाने परवृत्तान्तज्ञाने सत्यपि मौनं वाङ्निय
मनं । यथाह कामंदकः । नान्यैरुपतापि वचनं मौनं व्रतचरिष्णुतेति । शक्तौ प्रतीकारसामर्थ्येपि क्षमा अपकारसहनं
असत्यवाग्भावः । श्लाघां स्वगुणस्तुतिमिति । त्यागे वितरणे सति श्लाघाया विकत्थनस्य विपर्ययोऽभावः । अत्राह मनुः

सह प्रसवैर्वर्तन्त इति सप्रसवाः सोदरा इव सहोत्पन्ना इव
विरुद्धा अपि गुणास्तस्मिन्नविरोधेनैवाभवन्नित्यर्थः ॥ २२ ॥

स्कारात्मा: गुणानुसारि
कानविकीर्तिविदिः गोविंदकीर्तनादिः

श्रीः

स्वविषयभूतेभ्यो व्यावृत्ता सती अतो वाच कश्चिद्व्यपिनाप्यवत्ता अपहार्यमिरामभावात्तस्करता द्रष्टव्यापरं तद्रूपं अथवा अस्येति तामस्य धीस्थाने सूक्ष्मं करोतीति व्याप्येन ग्रन्थेऽपि नाम्नुते तानतक्षरपतो सीमार्थः २७ द्वेष्योऽपीति शिष्टो जनो द्वेष्यः शत्रुरप्यासीत्स्या गिरा श्रोषधं यथा श्रोषधमिव तस्य संमतोऽनुमतः आसीत् दुष्टो जनः प्रियोऽपि प्रेमास्पदीभूतोऽपि उरगक्षता सर्पदष्टाङ्गुलीव अङ्गुलीवोरगक्षता दृश्यमूलपातः किं वा दष्टमपि दुष्टात्मनः कुतिन्याय्या त्याज्यः आसीत् तस्य शिष्ट एव नेष्टः दुष्टश्च त्याज्य इति श्लोकार्थः २८ तस्य परोपकारित्वमाह तमिति वेधा ब्रह्मा प्रजापतिर्वेधाः स्रष्टा इत्यमरः तं दिलीपं

आख्यातवत्सरां स्तेभ्यः शुनीतस्करतां स्थिता २७ द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधं त्याज्यो दुष्टः प्रियो-
ऽप्यासीदङ्गुलीवोरगक्षता २८ तं वेधा विदधे नूनं महाभूतसमाधिना तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः
२९ स वेलावप्रवलयां परिखीकृतसागरां अनन्यशासनामुर्वीं शशासैकपुरीमिव ३०

सामाग्रीयत्तेति समाधिः कारणानि

महाभूतानां पृथ्व्यादीनां समाधिः तेन विदधे सस्रजेन नूनं ध्रुवमुत्प्रेक्षा तथा हि तस्य सर्वे गुणाः रूपरसादिमहाभूतगुणा वदेव परार्थं परप्रयोजनमेकं मुख्यं फलं येषां ते तथाभूता आसन् महाभूतगुणोपमानेन कारणगुणाः कार्ये संक्रामन्तीति न्यायः सूचितः २९ स इति वेला समुद्रकूलं तामेव बृहत्कूलं वप्रवलयाः प्राकारवलयाः परिखाः सागरा यस्याः सा तां स्मात्संयो वप्रः प्राकारो वरणः सालः प्राचीनं प्रान्ततो वृतिरित्यमरः परितः खातापरिखा इत्यमरः अन्-

स्थित्यां दति ॥ दंडमर्हंतीति दंड्याः दंडादिभ्यो यदिति यत्प्रत्ययः ॥ अदंड्यान् दंडयन् राजा दंड्यांश्चैवाप्यदंडयन् ॥ अयशो महदाप्नो
ति नरकं चैव गच्छतीति स्मृतेः यच्चनेतान् दंड्यान् वधयित्वा लोके प्रति स्थापयेद्दंडयन्तेः ह्रीमान्यस्मात् ॥ अमृतं येभ्यः तान् नाय ॥ एवय
रिष्यन्तुः ॥ दारानुपस्थितं ह्रीमन्नीषितेभ्यो विदुः यस्तस्मात् धर्मकामार्थविपर्ययो वाप्तं जाती ॥ अस्तेनं ॥ अर्थकामसाधनयोर्दं
डविनाः हयो लोकस्यापन्नजो स्यादनर्थरूपधर्मोर्थेन नानुष्ठानाद् अर्थकामावपि धर्मोहि यतामा यावंतस्मात् राजा धर्मी
तेनो भूदित्यर्थः ॥ आहमोत्तमः ॥ यथा त्रातिधर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यादिति ॥ २५ ॥ दंडेति ॥ सराजा यत्रायपदं

स्थितो दंडयतो दंड्यान् परिरक्षतु प्रजाः स्वयं ॥ अर्थधर्मकामेभ्यः सोऽभ्यो धर्मार्थं मनीषिताः ॥ २५ ॥ दंडो हि गां स्वयज्ञानां सम्या
पं प्रघवादिवं ॥ तपः किं निमयेनो मोदयनुर्भुवनद्वयं ॥ २६ ॥ नकिलानुपयुक्तस्य राजानोरक्षितुर्यज्ञाः ॥ ७ ॥ ७ ॥ ७ ॥

कर्तुं गांभुवं दंडो हि ॥ करग्रहणेनैव रिक्षांश्च कारेत्यर्थः ॥ मघवा देवेंद्रः सम्यापसम्यं वर्धयितुं दिवं स्वर्गं दंडो हि ॥ पुलोकान्महीति
के रक्षितुं स्वावयामासेत्यर्थः ॥ क्रियाणो व यद हेत्याद्विनाय स्त्रसम्यामंचेतुर्थीएवमुभोसंपदोर्वे निमयेन परेस रमाद्वानग्नतिदेना
मांसुवेन दयं द्धयनुपुष्पतः ॥ राजापक्षेरिंद्रलोकं ॥ इंद्रश्चादके नभूलोकं पुष्यतीत्यर्थः ॥ उक्तंच दंडनीतौ ॥ राजा स्वर्थान् समाह
स्यकुर्यादिंद्रमहोत्सवं ॥ प्रीतोनिमिपवा हस्तुमहतीतरिमां वंहेद्धीति ॥ २६ ॥ नकिलेति ॥ राजानोऽन्येन पाः रक्षितुः ॥ भयेभ्यस्त्रातुरस्य
राज्ञो यज्ञा नानुधयुः किलः ॥ नाभुंजन्ते ॥ खलुः ॥ कुतः ॥ दयाणा कामात्ततस्करतांचोर्यपरोभ्यः परधनेभ्यः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

सर्ग १

रघु टी.

संतानेति तेन दिलीपेन संतानः अर्थः प्रयोजनं यस्य तस्मै संतानार्थाय संतानः सन्ततौ गोत्रे स्यादपत्ये सुरद्रुमे इति विश्वः वि धये अनुष्ठाय स्वभुजादवतारिता अवरोपिता जगतः गुर्वी धूः भारः सचिवेषु निचिक्षिपे निहिता ३४ अथेति अथ गुरौ भारारोपणानंतरं पुत्रकाम्यया आत्मनः पुत्रेच्छया काम्याच्चेति पुत्रशब्दात्काम्यच्प्रत्ययः अप्रत्ययादिति पुत्रकाम धातोरकारप्रत्ययः ततष्टाप् तया तौ दंपती जायापती राजदंतादिषु जायाशब्दस्य दंभावो निपातनात्साधुः प्रयतौ नियतौ विधातारं ब्रह्माणं अभ्यर्च्य सवत्सपुत्रार्थं निस्यास्यतद्रुतिमांत्रिकाः गुरोः कुलगुरोर्वसिष्ठस्याश्रमं जग्मतुः पुत्रप्रा

संतानार्थाय विधये स्वभुजादवतारिता तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ३४ ~~गंगां~~
~~पावनक्षमां~~ ६७ नां तं तर्ति निन्यस्तमंभि सुकोसल्लाः ३५ अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया तौ दं
पती वसिष्ठस्य गुरोर्जग्मतुराश्रमं ३६ स्निग्धगंभीरनिर्घोषमेकं स्यंदनमास्थितौ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव

सुयापेक्षयेति श्लोकः ३६ स्निग्धेति स्निग्धो मधुरो गंभीरो निर्घोषो यस्य तं एकं स्यंदनं रथं आस्थितौ अधिष्ठितौ प्रावृषेण्यं प्रावृषेण्य इति एण्यप्रत्ययः तं प्रावृषेण्यं पयोवाहं मेघं विद्युदैरावताविव आस्थितौ आरूढौ तौ जग्मतुरिति पूर्वेण संबंधः द्वाः आ पः स्त्रीमेवाकस्मुरास्त्रुत्यादित्यमरः ऐरावतोऽभ्रमुः इंद्रमवः ऐरावतो अभ्रमातंगः अभ्रमातंगत्वाच्चास्य तादृशमह पत्वादिति क्षीरस्वामी अनन्यमेघारोहणायोगात् विद्युत्साहचर्यं घटते किंच विद्युतैरावतसाहचर्यादैरावती संज्ञा ऐरावत

तस्येति तस्य राज्ञः मगधवंशे जाता मगधवंशजा मगधान्वये उत्पन्नेत्यर्थः एतेनाभिजात्यमुक्तं दाक्षिण्यरूढे
नानुवर्तने दक्षिणः सरलोदारपरछंदानुवर्तिषु इत्यमरः तेन रूढेन प्रसिद्धेन नाम्ना अध्वरस्य यज्ञस्य दक्षिणाख्याय
सीव सुदक्षिणा इति प्रसिद्धा पत्नी आसीत् अत्र श्रुतिः पत्नीं गंधर्वस्तस्य दक्षिणाप्सरस इति दक्षिणायां दाक्षि
ण्यं नाम ऋत्विजो दक्षत्वप्रापकत्वेन दक्षं तु दक्षिणां अतिरहतीति श्रुतेः ३१ कलत्रवंतमिति वसुधाधिपोऽवरोधे अंतः
पुरवर्गे महति सत्यपि मनस्विन्या दृढचित्तयानया अनुवृत्यादिनिर्वहणक्षमयेत्यर्थः तया सुदक्षि[illegible]या आत्मा

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा। पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥ ३१ कलत्रवंतमात्मानम
वरोधे महत्यपि। तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः॥ ३२ तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः। विलं
बितफलैः कालं स निनाय मनोरथैः॥ ३३

कलत्रवंतं भार्यावंतमेव कलत्रं श्रोणिभार्ययोरित्यमरः वसुधाधिपः
मेने वसुधया च मेने ३२ तस्यामिति आत्मानुरूपायां तस्यां आत्मनो जन्म यस्मात् सोऽयमात्मजन्मा पुत्रस्तस्मिन् समुत्सुकः
पुत्रात्मनो जन्मनि पुत्रे उत्कण्ठितः समुत्सुकः सन् आत्मा वै पुत्रनामासीति श्रुतेः विलंबितं फलं पुत्रप्राप्तिरूपं ये
षां तैर्मनोरथैः कदा मे पुत्रो भवेदित्याशाभिः कालं निनाय यापयामास॥ ३३॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

सर्ग १

सरसीष्विति सरसीषु वीचिविक्षोभशीतलं तरंगसंपर्केण शीतलं स्वनिश्वासमनुकर्तुं शीलमस्येति स्वनिश्वासानुकारिणं ए
तेन तयोरुत्तमगंधित्वं सूचितं अरविंदानामामोदमुपजिघ्रंतौ आघ्राणंतौ ॥ ४२ ॥ मनइति रथनेमिस्वनोन्मुखैः मेघ
ध्वनिशंकया उन्नमितमुखैः शिखंडिभिर्मयूरैः द्विधा भिन्नाः शुद्धविकृतभेदेन आविष्कृताः तस्मादेव तमेदेनवा
ब्रह्मोद्दिष्टः तस्मात् कृताः केकाः द्विधा भिन्ना इत्युच्यते अत एव षड्जसंवादिनीरिति षड्जस्याभेद्यो जातः षड्जः तदुक्तं
नासां कंठमुरस्तालु जिह्वां दंतांश्च संस्पृशन् षड्भ्यः संजायते यस्मात् षड्ज इति स्मृतः सप्ततंत्रीकंठजन्मा स्वरविशेषः निषादर्ष

सरसीष्वरविंदानां वीचिविक्षोभशीतलं । आमोदमुपजिघ्रंतौ स्वनिश्वासानुकारिणं ॥ ४२ ॥ मनोभिरामाः शृण्वंतौ रथ
नेमिस्वनोन्मुखैः । षड्जसंवादिनीः केका द्विधा भिन्नाः शिखंडिभिः ॥ ४३ ॥ परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु । मृग
द्वंद्वेषु पश्यंतौ स्यंदनाबद्धदृष्टिषु ॥ ४४ ॥ श्रेणीबंधाद्वितन्वद्भिरस्तंभां तोरणस्रजं । सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥ ४५ ॥
तौस्य

भगांधारषड्जमध्यमधैवताः पंचमश्चेत्यमी सप्त तंत्रीकंठोत्थिता स्वराः षड्जसंवादिनीः सदृशीः तदुक्तं मातंगेन षड्जं म
यूरो वदतीति मनोभिरामाः मनसः प्रियाः केकाः प्रियेति अनुनादितिकेकाः मयूरवाण्यः केकावाणी मयूरस्येत्यमरः तां केकाः
शृण्वंतौ विशेषकार्थः ॥ ४३ ॥ परस्परेति विमृश्यमाददूरसमीपं यथा भवति तथा उज्झितं वर्त्म येषु तेषु स्यंदनाबद्धदृष्टिषु के मृगाः स्य
संतश्चाक्षिषु मृगपक्षिमृगाश्च पशुमानुषस्त्रियेपत्येकश्रेयः तेषां द्वंद्वेषु मिथुनेषु स्त्रीपुंसौ मिथुनं द्वंद्वमित्यमरः परस्परं तयोः सादृश्यं

मामर्दिति पुनः कथंभूतो दंपती आश्रमपीडामामृत्समालिनितिःरुतौः माङिन्सुरित्याशीरर्थेलुङ नमउभोगमद्भ्यडागमनिषधः
परिमेयपुरःसरौपरिमितपरिवारौ अनुभावविशेषोनुतेजोविशेषोयास्याविनापरिकृताविवस्थितौ ३८ सेव्यमानाविति
पुनः कथंभूतोसुखस्पर्शैःसुखस्पर्शनस्पृशैःस्पर्शैःसुखैःशालनिर्यासगंधिभिः सर्जतरुर्भेनःसंहगापवाड्रःशालःसर्जतरुःस्यु
तद्गंधिभिराग्रगतेः उत्किरतिविक्षिपतीतिउत्किरः इगुपधेत्यादिनाकिरतेःकप्रत्ययः पुष्परेणून्नामुत्किरन्तिराघवःनामोवादी
५ यस्य पिताः वनराजयोयैःसेवितैःसेव्यमानौ ३९ पवनैर्मार्गे प्रार्थनासिद्धिशंसिनः अनुकूलत्वादेवमनोरथसिद्धिसूचकस्य
मामृर्दाश्रमपीडैतिपरिमेयपुरःसरौ अनुभावविशेषांनुसेनापरिवृताविव ३८ सेव्यमानौसुखस्पर्शैःशालनिर्यास
गंधिभिःपुष्परेणूत्किरैर्वातैराघवनराजिभिः ३९ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्की
र्णैरस्पृष्टालकवेष्टनौ ४० हैयंगवीनमादाय घोषवृद्धानुपस्थितान् नामधेयानि पृच्छंतौ वन्यानांमार्गशाखिनां ४१ ६
पवनस्यानुकूलत्वात् दिगभिमुखत्वात् तुरगोत्कीर्णैः रजोभिः अस्पृष्टालकादिभावे सनमुपलीबआराश्रोयधोसीतया
लो शिरसावेष्टनमोभिनासुतइतिस्यात् ४० हैयंगवीनमिति ह्यस्तनगोदोहोद्भवं घृतंहैयंगवीनं स्यःपूर्वेद्युस्तनं हैयंगवीनंस्या
दहोगोदोहोद्भवं घृतमित्यमरः हैयंगवीनसंज्ञायामितिनिपातः तत्सद्योघृतमादायोपस्थितान्घोषवृद्धान् घोषआभीरप
ल्लीस्यादित्यमरः वन्यानांमार्गशाखिनांनामधेयानिपृच्छंतौ उपाचीत्यादिनापृच्छेर्द्विकर्मकत्वं ४१ ६ ६ ६ ६ ६ संधु

सइति। दुःप्रापयशाः दुःप्रापं दुर्लभं यशो यस्य स तथोक्तः श्रांतवाहनः दूरोपगमनात् श्रांतयुग्यः महि-
ष्याः सखेति महिषीसखः राजाहःसखिभ्यष्टजिति टच्प्रत्ययः सहायान्तरनिरपेक्ष इति भावः स राजा सायं
सायंकाले यमिनः संयमवतः तस्य महर्षेर्वसिष्ठस्याश्रमं प्रापत् आप पुषादीत्यादिना ङ् ४८ तमाश्रमं
विशिनष्टि वनांतरादिति वनांतराद् अन्यस्माद्वनांतराद् उपावृत्तैः प्रत्यागतैः समिधश्च कुशाश्च फलानि च आहर्तुं

स दुःप्रापयशाः प्रापदाश्रमं श्रांतवाहनः सायं संयमिनस्तस्य महर्षेर्महिषीसखः ४८ वनांतराउ
पावृत्तैः समित्कुशफलाहरैः अग्नि प्रत्युद्यातैः पूर्यमाणं तपस्विभिः पं० ५० ५१ ५२ ५३

शीलमेषामिति समित्कुशफलाहारास्तैः अग्नीनां शील इति हरतेरनुद्यमेऽच् प्रत्ययः अदृश्यैर्दर्शना-
योग्यैरग्निभिर्वैतानिकैः प्रत्युद्याताः प्रत्युद्गतास्तैस्तपस्विभिः पूर्यमाणं व्याप्यमानं गच्छतामग्नीनामन्वयः प्रत्यु-
द्यानीति श्रुतेः वानप्रस्थाः सपत्नीकाः अग्न्याधानवन्तः एव तमग्नयः प्रत्याधावंतीति आहिताग्नीनां
वाहनमिति पद्येन तस्यैवाश्रमस्य आहरणीति तादृगिति विज्ञायते पं० ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२

साहिता २

कुसां [illegible]

सुत्रि२ [illegible] चेरुभि: [illegible]

[illegible]ध्विति ग्रामविसृष्टेषु स्वदत्तेषु यूपो नाम संस्कृतः पशुबंधाय दारुविशेषः यूपा एव चिह्नानि येषां तेषु ग्रामेषु अमोघाः
सफलाः यज्वनां विधिनेष्टवतां यज्वा तु विधिनेष्टवानित्यमरः सुयजोर्ङ्वनिप् इत्यनिप्प्रत्ययः आशिषः आशीर्वादान्
अर्घ्यैः पूजाविधिस्तदर्थं द्रव्यमर्घ्यं पादार्घाभ्यां चेति यत्प्रत्ययः षट्तु त्र्यर्घमर्घार्थे पाद्यं पादाय वारिणीत्यमरः अ
र्घ्यस्यानुपदमन्वक् अर्घ्यस्वीकारानंतरमित्यर्थः प्रतिगृह्णंतौ स्वीकुर्वंतौ पदस्य पश्चादनुपदं पश्चादर्थेऽव्य
यीभावः अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययमित्यमरः ४६ कार्येति [illegible]तोः [illegible] वेषयोः उज्वलनेप

ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां अमोघाः प्रतिगृह्णंतावर्घ्यानुपदमाशिषः ४६ कुलके
कार्याभि[illegible]तयोः सीकृतोः शुक्लवेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ४७ तत्सर्वं भूमिपतिः पत्न्यै द
र्शयन्प्रियदर्शनः अपि लंघितमध्वानं बुबुधे न बुधोपमः ४८ यथोयोस्तयोः सुदक्षिणादिलीपयोः हिमनिर्मु

क्तयोश्चित्राचंद्रमसोरिव योगे समतिका [illegible] निर्वीच्या अभिख्या शोभा आसीत् अभिख्या नामशोभयोरित्यमरः ८
चित्राचंद्रमसो[illegible] कर्म[illegible]ग्रहविशेषः शिशिरापगमे चैत्र्यां चित्रापूर्णचंद्रमसोरिवेत्यर्थः ४७ तत्सर्वं
तिप्रियदर्शनस्सकंयस्मात्सोऽपि प्रियदर्शनः दर्शनीयः बुधः सौम्यः भूमीपतिः पत्न्यै तत्तद्भूतं दर्शयन् लंघितमपि प्रवृत्तिमध्वा

१२

अथेति । अथाश्रमप्राप्त्यनन्तरं स राजा यन्तारं सारथिं धुरं वहंतीति धुर्याः । धुरो यड्ढकाविति यत्प्रत्ययः । धुर्य
धौरेयधुरीणास्सधुरंधरा इत्यमरः । धुर्यान् रथाश्वान् विश्रमय विनीतविश्रमान् कुर्वित्यादिश्य आज्ञाप्य तां पत्नीं
रथादवारोहयदवतारितवान् स्वयं चावततार ॥ ५५ ॥ तस्मा इति । सभायां साधवः सभ्याः । सभाया य इति यप्रत्ययः ।
गुप्ततमेन्द्रियाः अत्यंतनियमितेन्द्रियाः मुनयः सभार्याय गोप्त्रे रक्षकाय नयः शास्त्रमेव चक्षुः तत्त्वावबोधकं प्रमा
णं यस्य तस्मै नयचक्षुषे । अत एवार्हते प्रशस्ताय पूज्यायेत्यर्थः । अर्हः प्रशंसायामिति शतृप्रत्ययः । तस्मै राज्ञे

अथ यंतारमादिश्य धुर्यान्विश्रमयेति सः । तामवारोहयत्पत्नीं रथादवततार च ॥ ५५ ॥ तस्मै सभ्याः सभार्याय
गोप्त्रे गुप्ततमेन्द्रियाः । अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥ ५६ ॥ विधेः सायंतनस्यांते स ददर्श तपोनिधिं ।

अर्हणां पूजां चक्रुः । पूजा नमस्यापचितिः सपर्यार्चार्हणाः समा इत्यमरः ॥ ५६ ॥ विधेरिति । सायंतनस्य सायंभवस्य
सायंचिरमित्यादिना ट्युप्रत्ययः । विधेर्जपहोमादेरनुष्ठानस्यांते अवसाने अरुंधत्या अन्वासितं पश्चादुपवे रघु
शनेनोपसेवितं कर्मणि क्तः । उपसर्गवशात्सकर्मकत्वं । अन्वासितमित्यादिवदुपपद्यते । तपोनिधिं वसि ११
ष्ठं स्वाहया देव्या अग्नायी स्वाहा च हुतभुक्प्रियेत्यमरः । अन्वासितं हविर्भुजमिव ददर्श ॥ ५७ ॥
वोस्वाहा

सेकांते इति सेकांते वृक्षमूलसेचनावसाने मुनिकन्याभिः सेक्त्रीभिः आलवालेषु जलावापप्रदेशेषु पदं वृत
ख्यायिनां स्यादालवालमावापे इत्यमरः विहंगानां पक्षिणां विश्वासाय विश्रंभाय समौ विश्वासविश्रंभावित्यम
रः तत्र तत्क्षणोज्झितवृक्षकाः त्यक्ता बालवृक्षकाः यस्मिन् तं अल्पार्थे कः प्रत्ययः ५१ आतपेति आतपस्यात्यये
अपगमे सति संक्षिप्ताः राशीकृताः नीवाराः तृणधान्यानि यासु ताः सुनीवाराः तृणधान्यानीत्यमरः निषादिभि
रुपविष्टैर्मृगैर्वर्तितः निष्पादितो मंथश्चर्वितचर्वणं यासु ताः यस्मिन्नाश्रमे तं ५२ आकीर्णमिति नीवाराणां भागधे

सेकांते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकं विश्वासाय विहंगानामालवालांबुपायिनां ५१ आतपा
त्ययसंक्षिप्तनीवारासु निषादिभिः मृगैर्वर्तितरोमंथमुटजांगनभूमिषु ५२ आकीर्णमृषिपत्नीनामुट
जद्वाररोधिभिः अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ५३ अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान्
पुनानं पवनोद्धूतैर्धूमैराहुतिगंधिभिः ५४

भागधेयैरंशैः रूपनामभागेभ्यो धेय इति प्रत्ययो वक्तव्य इति
स्वार्थे धेयप्रत्ययः तस्योचितैः अतएव उटजानां पर्णशालानां द्वाररोधिभिः द्वारावरोधकैः मृगैः ऋषिपत्नी
नामपत्यैरिवाकीर्णं व्याप्तं ५३ अभ्युत्थितेति अभ्युत्थिताः प्रज्वलिताः होमयोग्याः ऋत्विजः समिद्धे अग्नावाहुती
र्जुहोतीति वचनात् तेषां अग्नीनां पिशुनैः सूचकैः पवनोद्धूतैः आहुतिगंधिभिः आहुतिगंधयुक्तैर्धूमैः

रघु टी॰ स॰ १२

सर्ग १

गतो महानुभावश्रालापोचितः कुशलप्रश्न एव कृत इत्यनुसंधेयं परं अथेति अथ अनंतरं विजितारिपुरः विजितशत्रुनगरः वदतां वक्तॄणां वरः यतश्च निर्धारणमिति षष्ठी अर्थपतिः राजा अथर्वणोऽथर्ववेदस्य निधेः तस्य मुनेः पुरोऽग्रे अर्थ्याम् अर्थादनपेतां धर्मपथ्यर्थन्यायादनपेते इति यत्प्रत्ययः वाचमाददे वक्तुमुपक्रांतवानित्यर्थः अथर्वनिधिरित्यनेन पुरोहितकृत्याभिज्ञत्वात् कृतकार्यनिर्वाहकत्वं मुनेरभिसूच्यते यथाह कामंदकः त्रय्यां च दंडनीत्यां च कुशलः स्यात्पुरोहितः अथर्वविहितं कुर्यान्नित्यं शांतिकपौष्टिकं ५९ उपपन्नमिति हे गुरो सप्तस्वंगेषु स्वाम्यमात्यादिषु स्वाम्यमात्यसु

अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः। अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ५९ उपपन्नं ननु शिवं सप्तस्वंगेषु यस्य मे दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदां ६०

हृत्कोशराष्ट्रदुर्गबलानि च सप्तांगानीत्यमरः शिवं कुशलं उपपन्नं ननु युक्तमेव ननुरवधारणे प्रश्नावधारणानुज्ञानुनयामंत्रणे ननु इत्यमरः कथमित्यत आह यस्य मे दैवीनां देवेभ्य आगतानाम् अतिवृष्ट्यादीनां मानुषीणां मनुष्येभ्य आगतानां चौरभयादीनां उभयत्रापि तत आगत इत्यण् टिड्ढाणञित्यादिना ङीप् आपदां त्वं प्रतिहर्ता निवारयिता हि तथाह कामंदकः हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा इति पंचविधं दैवं मानुषं व्यसनं ततः आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात्

पृथिवीपतिलोभाच्च नराणां पंचधा भयं ६०॥

21

रा॰ ९

समित्कुशफलग्रसमं मृदन्वार्तत्पाणिकः जयहोमं चकुः गोमूत्राभिवाद्योऽग्निश्लो भवेदिति अनुष्ठानस्य मध्ये अभिवादन
निषेधाद्विधेरंते दर्शितमुक्तं अन्वासितं चात्र पतिव्रताधर्मत्वेनोक्तः तत्तु कर्मणामन्ते न विधेरंतः श्रुतिकर्माणः समाप्याभि
धानात् ५७ तयोरिति मागधी मगधराजसुता राज्ञी सुदक्षिणा राजा च तयोररुंधतीवशिष्ठयोः पादान् जगृहतुः पौग्र २३
कृ४ दृष्टा अभिवादने गुरुपत्नी गुरुश्चौ तौ सा च स च तौ सुदक्षिणादिलीपौ कर्मभूतौ प्रीत्या हर्षेण प्रतिनंदतुः आ

आन्वासीनमरुंधत्या स्वाहयेव हविर्भुजं ५७ तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी तौ गुरुर्गुरुपत्नी च प्रीत्या
प्रतिनंदतुः ५८ तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमं पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ५९ ॥

शिवीदादिभिः संभावयां चक्रतुरित्यर्थः ५८ तमिति मुनिरिति पृथ्वीपति था अतिथिर्ज्जनि आतिथ्यस्य क्रियाने
पाशांतो रथक्षोभेणायः परिश्रमः स यस्य तं तथोक्तं राज्यमेवाश्रमस्तत्र मुनिं तन्मुनितुल्यमित्यर्थः तं दिलीपं राज्ये कुशलं पप्रच्छ
एवमेव कमेकत्वमुक्तमिति पुपिरस्य शब्दः पुरोहितादिषु वर्तमानो लोकवचनः तथोक्तसमागवचनः उपपन्नं तु शि पा३
वंससर्वंगे पितुः रवि रेधाम तथा मनुः स्वाम्यमात्य सुहृत्कोशराष्ट्रदुर्गबलानि चेति सप्तैता नि समस्तानि लोके स्मिन्राज्य
मुच्यत इति तत्र ब्राह्मणं कुशलं पृच्छेत् क्षत्रबंधुमनामयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव चेति मनुवचनेस स्यपि तस्य

[illegible] प्रजा पुरुषायुषजीविन्यो भवंति तत्र तस्याः प्रजायाः तव ब्रह्मवर्चसं हेतुः
[illegible] ६४

सर्ग १

पुरुषेति आयुः जीवितकालः पुरुषस्यायुः पुरुषायुषं वर्षशतमित्यर्थः शतायुर्वै पुरुष इति श्रुतेः अचतु-
रादिसूत्रेणाच्प्रत्ययान्तो निपातः मदीयाः प्रजाः पुरुषायुषं जीवंतीति पुरुषायुषजीविन्यः निरातंकाः निर्भ-
याः आतंको ऽपस्मारशंकायामिति हलायुधः निरीतयः अतिवृष्ट्यादिरहिताः ईतिपर्यंतस्य सर्वस्य त्वद्ब्रह्मवर्च-
सं तव व्रताध्ययनसंपत्तिरेव हेतुः व्रताध्ययनसंपत्तिस्तेजो ब्रह्मवर्चसमिति हलायुधः ब्रह्मणः वर्चो ब्रह्म-

पुरुषायुषजीविन्यो निरातंका निरीतयः। यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मव-
र्चसं ६४ त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना। सानुबंधाः कथं न स्युः सं-
पदो मे निरापदः ६५

वर्चसं ब्रह्महस्तिभ्यां वर्चस इत्यच्प्रत्ययः अतिवृष्टिरनावृष्टिः मूषकाः शलभाः शुकाः अत्यासन्नाश्च राजानः
षडेता ईतयः स्मृताः इति कामंदकः ६४ त्वयेति ब्रह्मयोनिना ब्रह्मपुत्रेण गुरुणा त्वया एवं इत्थं चिं- राम २३
त्यमानस्य अनुध्यायमानस्य अतएव निरापदो ऽस्य मम संपदः सानुबंधाः साहस्राः अविच्छिन्नाः इति यावत् कथं न स्युः
स्युरेवेत्यर्थः ६५

[illegible]

12

तत्र मानुषप्रतीकारमाह तवेति मंत्रान्कृतवान्मंत्रकृत् सुकर्मपापमंत्रपुण्येषु कृञ इति क्विप् दूरात्परोक्ष एव
संशमितारिभिः मंत्रकृतो मंत्रज्ञस्य गुरोः प्रयोक्तुर्वा तव मंत्रैः कर्तृभिः दृष्टं प्रत्यक्षं यल्लक्ष्यं तन्मात्रभिदः इति दृष्टल
क्ष्यभिदो मे शराः प्रत्यादिश्यंत इव न समर्थाः किमेभिः पिष्टपेषकैरिति निराक्रियंत इव सुमंत्रेश्वा प्रत्यादि
ष्टा निराकृता इत्यमरः सर्वं मंत्रसामर्थ्यादेव नः योगक्षेमं इति भावः ६२ संप्रति दैविकापत्प्रतीकारमाह

तव मंत्रकृतो मंत्रैर्दूरात्संशमितारिभिः प्रत्यादिश्यंत इव मे दृष्टलक्ष्य
भिदः शराः ६२ हविरावर्जितं होतस्त्वया विधिवदग्निषु वृष्टिर्भव
ति सस्यानामवग्रहविशोषिणां ६३ घु घु घु घु घु घ घ घ

हविरिति हे होतः त्वया विधिवदग्निषु आवर्जितं प्रक्षिप्तं हविः आज्यादिकं कर्तृ अवग्रहो वर्षप्रतिबंधः
अवग्रहो वर्षप्रतिबंध इत्यमरः तेन विशोषिणां शुष्यतां सस्यानां वृष्टिर्भवति वृष्टिरूपेण सस्यान्यु
पजीवयतीति भावः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति
६३

रघु. टी. स. १४

सोहमिति ॥ इज्या यागः यजेर्भावे क्यप् इति क्यप् इज्यया विशुद्ध आत्मा चित्तं यस्य सः प्रजालोपेन संतत्यभावेन निमीलितः
कृतनिमीलनः सोहं लोक्यते इति लोकः न लोक्यते इत्यलोकः लोकश्चासावलोकश्च लोकालोकः प्रकाशाप्रकाशः स च
लक्ष्व लोकालोकश्चक्रवालः इत्यमरः प्रकाशश्चाप्रकाशश्च ... विभावनात् नप्रकाशश्चाप्रकाशश्च
तद्रूपाविभावनात् पक्षद्वयेऽप्यस्मीति शेषः लोकालोकोप्येकतः सूर्यसंपर्कादन्यतस्तदभावात् प्रकाशश्चाप्रकाशश्च
इत्येवमिति मंतव्यं ६९ ननु तपोदानादिसंपन्नस्य किमपत्येनेत्यत आह लोकांतरेति समुद्भवत्यस्मादिति समुद्भवः

सोहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ६९ लोकांतरे
सुखं पुण्यं तपोदानसमुद्भवं संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ७० तयाहीनं विधातर्मां कथं पश्यन्न
दूयसे सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकं ७१

23

कारणं तपोदानसमुद्भवो यस्य तत्तपोदानसमुद्भवं पु
ण्यं तत् लोकांतरे परलोके सुखं सुखकारणं शुद्धवंशे भवा शुद्धवंश्या संततिस्तु परत्र परलोके इह लोके च शर्मणे सुखा
य शर्म शातसुखानि चेत्यमरः भवतीति शेषः ७० तयेति हे विधातः स्रष्टः तया हीनं संतत्या रहितं मां स्नेहात् स्वयमेव सि
क्तं जलसेकेन वर्धितं वन्ध्यं अफलं वन्ध्योऽफलोऽवकेशी चेत्यमरः आश्रमस्य वृक्षकं ह्रस्वपोतकमिव पश्यन् कथं न दू राम
यसे परितप्यसे विधातरित्यनेन समर्थोऽप्युपेक्षसे इति गम्यते ७१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ राम ॥ १४

मंत्रत्यागमनप्रयोजनमाह किंत्विति किंतु तवैतस्यां वध्वां स्नुषायां वधूर्जायास्नुषा चेत्यमरः अदृष्टसदृशप्र
नुरूपापत्यं यथा तथा मां सद्वीपा रत्नानि सूयत इति रत्नसूरपि सद्वीपादिसादिना किंपुनर्मेदिनी नावति न प्रीणाति अवति प्रीतिः
रक्षणगतिप्रीत्याद्यर्थेषु इत्यादेः रत्नसूरपीत्यनेन न सर्वरत्नेभ्यः पुत्ररत्नमेव श्लाघ्यं इति सूचितं तदेव प्रतिपा
दयति ॥६६॥ मत्परमिति मत्तः परमदनंतरं अन्यदात्तनापचमी दुर्लभं दुर्लभं मत्वा मया आवर्जितं दत्तं प
यः पूर्वैः पितृभिः स्वनिःश्वासैः दुःखजैः कवोष्णं ईषदुष्णं यथा भवति तथोपभुज्यते कवोष्णमिति कुत्सायां कद्वादेशः को

किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजं नमामवति सद्वीपा रत्नसूरपि मेदिनी ॥६६॥ मत्परं दुर्लभं मत्वा नून
मावर्जितं मया पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ॥६७॥ नूनं मत्तः परं वंश्याः पिंडविच्छेददर्शिनः न प्र
कामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥६८॥

कोः कवो कमदोशंकद्वोष्णे विभुवत्कवोष्णमित्यमरः ॥६७॥ नूनमिति मत्तः प
रं मदनंतरं पंचम्यास्तसिल् पिंडविच्छेददर्शिनः पिंडदानविच्छेदमुत्प्रेक्षमाणाः वंशभवाः वंश्याः पितरः स्वधा
स्वधेयं पितृभ्यो नैवधेति तथा संग्रहतत्पराः आसक्ताः संतः श्राद्धे पितृकर्मणि पितृदानं निवापः स्याच्छ्राद्धं त
त्कर्म शास्त्रवत् इत्यमरः प्रकामभुजः पर्याप्तभोजिनो न भवंति कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितमित्यमरः निर्धनात्तापरनेके
यदपि संगृह्णंतीति भावः ॥६८॥ राम राम

कसंति ग्म्राक्रा गंगा पा: स्रोतस्युद्दाम दिग्गजे नदति सति

सर्ग १

पुरेति पुरा एकदा शक्रमिंद्रं उपस्थाय सेवित्वा उर्वीं प्रति भुवं प्रति यास्यतो गमिष्यतस्तव पथि कल्पतरुच्छायामाश्रिता सुरभिः कामधेनुरा
सीत् तत्रस्थितेत्यर्थः ७५ ततः किमित्यत आह धर्मलोपेति धर्मलोपभयाद्राज्ञीमृतुस्नातां च संस्मरन् ऋतुः पुष्पं रजः स्त्रियाव
त् ऋतुः स्त्रीकुसुमेऽपि चेत्यमरः ऋतुनाभिस्निग्धेन स्नातां राज्ञीं सुदक्षिणां धर्मस्य ऋतुकालाभिगमनरूपस्य लोपात् भया
द्धेतोस्तस्मात्संस्मरन् ध्यायन् मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथं प्रदक्षिणानि कुर्वीत विज्ञातांश्च वनस्पतीनिति स्मरणात् प्र
दक्षिणक्रियार्हायां तस्यां धेन्वां साधु प्रदक्षिणक्रियादि सत्कारं नाचरः नाचरितवानसि

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ७५ इमां देवीमृतुस्नातां स्म
रन् प्रदक्षिणक्रियातीतां तस्याः कोपमजीजनत् ७७ धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन् प्रदक्षिणक्रिया
र्हायां तस्यां त्वं साधु नाचरः ७८ अवजानासि मां यस्मादतस्ते न भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ७९ स शापो न
त्वया राजन्न च सारथिना श्रुतः नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ८०

दिग्विसर्जनेति भावः ऋतुकालाभिगम
नेमनुः ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदेति मनुवचनात् करणे दोषमाह पराशरः ऋतुस्नातां तु यो भार्यां स्वस्थः सन्नोपगच्छ
ति घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति ७८ अवजानासीति यस्मात्कारणान्मामवजानासि तिरस्करोषि अतः कारणान्म
त्प्रसूतिं मम संततिमनाराध्य असेवित्वा ते तव प्रजा न भविष्यतीति सा सुरभिस्त्वां शशाप शप्तवती ७९ कथं तस्मान्मम न ज्ञात
मित्यत आह स शाप इति हे राजन् स शापः त्वया न श्रुतः सारथिना न च श्रुतः अश्रवणे हेतुमाह कीदृशे आगताः उद्दाममत्तः दि

तः   त्स्नातामिमां स्मरन् ८२

14

असह्यमिति हेभगवन् मिममक्लेत्यंक्षणांपेतत्वं कंदणं अनिर्वाणस्यमज्जनरहितस्यनिर्वाणानिर्वृतोमोहेविनाशेगज
बंधनेकृतियादव: इतिनोगजस्यअरुमर्मनुदतीत्यरुंनुदंमर्मस्पृक् अणोक्रियामिमिमरु: अरुंतुदस्तुमर्मस्पृगत्य
मरः विज्ञहषोतुदइतित्वअप्रत्ययः अराहिंषदित्यादिनामुमागमः आलानंगजबंधनस्तंभमिव असह्यासाहम
त्राक्यापीडयाक्षयमिन्नतत्र अवेहि दुःसहदुःखजनकंविद्धीत्यर्थः निर्वाणोत्यानत्रापनीनिअभिगजकर्मणीति
तियात्वकार्यतद्युतंत्रणांदेवस्यपागेनरूपीणापाठकमणा सतत्यापितलोकानात्रोधयित्वापरितृजेत् ७२ तया

असह्यपीडंभगवन्नृणमन्त्यमवेहिमे अरुंतुदमिवालानमनिर्वाणस्यदंतिनः ७२ तस्मान्मुच्येयथातातसंवि
धातुंतथार्हसि इक्ष्वाकूणांदुरापेर्थेत्वदधीनाहिसिद्धयः ७३ इतिविज्ञापितोराज्ञाध्यानस्तिमितलोचनः
क्षणमात्रमृषिस्तस्थौसुप्तमीनइवह्रदः ७४ सोपश्यत्प्रणिधानेनसंततेःस्तंभकारणं भावितात्माभुवोभर्तुरथै
नंप्रत्यबोधयत् ७५

इति हेताततस्मात्येनकारणात् यथामुच्येमुक्तोभवामि कर्मणिलुट् तथासंविधातुंअर्हसि
यस्मात्कारणात् इक्ष्वाकूणांदुरापेर्थेत्वदधीनाहिसिद्धयः तेषांदुरापेदुःप्रापेर्थेसिद्धयस्त्वदधीनास्त्व
दायत्ताः इक्ष्वाकूणामिति ... लोकेत्यार्थ ... ७३ इतिविज्ञापितोराज्ञाविज्ञापितः ... ध्यानेनस्तिमि
तलोचनोनिश्चलो ... सुप्तमीनोह्रदइवतस्थौ ७४ सऋषिःप्रणिधानेनचित्तैकाग्र्येणभावितात्मा भुवोभर्तुः
संततिस्तंभकारणंसंततेःप्रतिबंधकारणंअपश्यत् अथानंतरमेनंनृपंप्रत्यबोधयत् ... एनमितिगतिबुद्धि

लतेति लतानां वल्लीनां प्रतानैः कुटि[illegible]भिन्न[illegible]ग्रथिताः ये केशाः तैरुपलक्षितः इत्थंभूतलक्षणे तृतीया स राजा अधि
ज्यमारोपितमौर्वीकं धनुर्यस्य सोऽधिज्य[illegible]धनुषश्चेत्यनङ्‌ादेशः मुनिहोमधेनोः रक्षापदेशात् रक्षाव्याजेन वन्यान्
वने भवान् दुष्टसत्वान् दुष्टजन्तून् दुष्टमृ[illegible]मा[illegible]सत्वमस्त्री तु जन्तुष्वित्यमरः विनेष्यन् शिक्षयिष्यन्निव दावं वनं विचचार वने
च वनदवौ दावदवाविह्यान्ते इति यादवः एनेन च चा[illegible]र्थः देशकालाद्यपगतव्याः कर्मसंज्ञा इत्यकर्मकाणामिति दावस्य कर्मत्वं ८

लताप्रतानोद्ग्रथितैः स केशैरधि[illegible]धन्वा विचचार दावं रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विने
ष्यन्निव दुष्टसत्वान् ८ विसृष्टपार्श्वा[illegible]चरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासु
रिवोन्मदानामालोकशब्दं वयसां वि
रावैः ९ ॥

विसृष्टेत्यादिषड्भिः श्लोकैः तस्य महामहिमत्वं द्रुमादयोऽपि राजोपचारं चक्रुरित्याह । विसृष्टेति विसृष्टाः पार्श्वानुचराः पा
र्श्ववर्तिनो जनाः येन तस्य पाशभृता वरुणेन समस्य तुल्यस्य अनुभावो[illegible]चितः तस्य राज्ञः पार्श्वयो द्रुमा उन्मदा
नां हृष्टानां वयसां खगानां बाल्यादिनां वयसि खगबाल्यादौ वय इत्यमरः विरावैः आलापैः आलोकशब्दं आलोकनं[illegible]ने आलोका

आस्वादवद्भिरिति सम्राट्। येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञः स सम्राट् कु-
कलितश्चमरः। आस्वादवद्भिः रसवद्भिः स्वादुयुक्तैरित्यर्थः। तृणानां कवलैः ग्रासैः। कण्डूयनैः खर्जनैः दंशाना-
नां वनमक्षिकाणां निवारणैश्च। दंशस्तु वनमक्षिका इत्यमरः। अव्याहतैः अप्रतिहतैः स्वैरगतैः स्वच्छन्दगमनैश्च तस्याः
धेन्वाः समाराधनतत्परः शुश्रूषासक्तोऽभूत्। तदेकपरः। परायणेऽभिधेयेऽपि तत्परः। तत्परासक्ता इत्यमरः। ५ स्थित इति
भूपतिस्तां गां स्थितां सतीं स्थितः सन् स्थिरीभूत्वा प्रयातां प्रस्थितामुच्चलितः प्रस्थितः निषेदुषीमुपविष्टां पवि-

आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत्॥ ५
स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥ ६
स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः। आ-
सीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः॥ ७

ष्टामित्यर्थः। भावकर्मणोः क्वसुरिति क्वसुप्रत्ययः।
आसनबन्धे उपवेशने धीरः स्थिरः सन्नित्यर्थः। जलमाददानां पिबन्तीं जलाभिलाषी सन् पिबन्नित्यर्थः। इत्थं गां
छायेवान्वगच्छदनुसृतवान्। ६ स इति। न्यस्तानि त्यक्तानि चिह्नानि छत्रचामरादीनि यस्यास्तां तथाभूतामपि तेजोविशेषेण प्रभावातिशयेनानु-

टी॰ म॰ २

पृक्त इति गिरिषु निर्झराणां प्रवाहाणां प्रवाहो निर्झरो झर इत्यमरः तुषारैः सीकरैः तुषारौ सीकरै तुषारौ हिमसीकराविति
शाश्वतः पृक्तः संपृक्तः अनोकहानां वृक्षाणामाकंपितानि ईषत्कंपितानि पुष्पाणि तेषां गंधः सोऽस्यास्तीति तथोक्तः
एवं शीतो मंदः सुरभिः पवनो वायुः अनातपत्रं व्रतार्थं परिहृतछत्रं अत एव आतपक्लांतं आचारेण पूतं तं नृपं सि
षेवे आचरणपूतत्वात् राजा जगत्पावनस्यापि सेव्य आसीदिति भावः १३ शशामेति गोप्तरि रक्षितरि राजनि वनं गाहमाने
प्रविशति सति वृष्ट्या विनापि दवाग्निः वनाग्निः दवदावौ वनानले इत्यमरः शशाम फलानां पुष्पाणां च वृद्धिः विशेषा

२८

पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे १३ शशाम
वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने १४ संचारपू
तानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५

इति विशेषा अधिका जाता आसीत् कर्मार्थे ... सत्त्वेषु जंतुषु मध्ये यतश्च निर्धारणमिति सप्तमी अधिकः प्रबलः ऊनं दुर्बलं हरिणादिकं न बबाध
१४ संचारेति पल्लवस्य रागो वर्णः पल्लवरागः रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिष्विति शाश्वतः सद्वत्ताम्रा पल्लवरागता
म्रा पतंगस्य सूर्यस्य प्रभा कांतिः पतंगौ पक्षिसूर्यौ च पतंगः पक्षिसूर्ययोरिति शाश्वतः मुनेः धेनुश्च दिगंतराणि दिशामवकाशान् ॥
अंतरमवकाशावधी इत्यमरः संचारेण पूतानि शुद्धानि कृत्वा दिनांते सायंकाले निलयाय गृहाय गंतुं ... प्रच
क्रमे ॥ १५ ॥ राम ॥ राम ॥राम ॥ राम ॥

राम २

मरुद्भिरिति मरुत्प्रयुक्ताः वायुना प्रेरिताः बाललताः आरात् समीपे वर्तमानं आराद्दूरसमीपयोरित्यमरः मरुतः वायोः सखा
इति मरुत्सखोऽग्निः स इव आभातीति मरुत्सखाभम् आङ् ईषदुपसर्गः इति कः प्रत्ययः अर्च्यं पूज्यं तं दिलीपं प्रसूनैः पुष्पैः पौ
रकन्याः पौराङ्गनाः कन्याः आचारार्थैः लाजैरिव अवाकिरन् तस्योपरि विक्षिप्तवत्य इत्यर्थः सखा हि सखायमागतमुपचरती
ति भावः १० धनुर्भृत इति धनुर्भृतोऽप्यस्य राज्ञः एतेन भयसंभावना दर्शिता तथापि विशङ्कैः निर्भीकैः अन्तःकरणैः कर्तृभिः दयया
आर्द्रः परसेनजन्यो भावोऽभिप्रायो यस्य तत् दयार्द्रभावं तदाख्यातं दयार्द्रभावमेतदित्याख्यातमित्यर्थः भावः सत्तास्वभावाभिप्रा

मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानं अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः १० धनुर्भृ
तोऽप्यस्य दयार्द्रभावमाख्यातमन्तःकरणैर्विशङ्कैः विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ स कीचकैर्मा
रुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यं शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः १२ यचेष्टात्मजन्मस्वित्यमरः त

थाविधं वपुर्विलोकयन्त्यो हरिण्यः अक्ष्णां प्रकामविस्तारस्य अत्यंतविशालतायाः फलमापुः विमलेक्षणतुल्यीभवने ततः कथयते वहि
र्नेत्राणां सृष्टेर्विनिर्माणेन सांतःकरणानां निजाभावमादेन विलक्षणं दृष्टुमित्यर्थः ११ स इति मारुतपूर्णरन्ध्रैः अत एव कूजद्भिः स्वनद्भिः की
चका२ चकैर्वेणुविशेषैः वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यमरः वंशः सुषिरवाद्यविशेषः वंशादिकं तु सुषिरमित्यमरः उक्रापा
दितं संपादितं वंशस्य कृत्यं कार्यं यस्मिन् कर्मणि तत्तथा कुञ्जेषु लतागृहेषु निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे इत्य
मरः वनदेवताभिः उद्गीयमानं उच्चैर्गीयमानं स्वं यशः शुश्राव श्रुतवान् १२ राम राम राम राम राम राम ॥

॥२

वसिष्ठेति वसिष्ठधेनोरनुयायिनमनुचरं वनांतादावर्त्तमानं प्रत्यागतं तं दिलीपं वनिता सुदक्षिणा निमेषेणालसा मंदा पक्ष्म
पङ्क्तिर्यस्याः सा अनिमेषा सतीत्यर्थः लोचनाभ्यां करणाभ्यां उपवासो भोजननिवृत्तिः तद्वद्भ्यामिव वसतेः कर्त्तरि क्तः पपौ पयोर्चाभिते
त्युक्तस्याः ... इत्यर्थः १९ पुरस्कृतेति वर्त्मनि पार्थिवेन पथि स्था
अतिरस्याज्जलमधिकं पिपासति तद्वदतितृष्णयाधिकं व्यलोकयदित्यर्थः
श्रेणान्स्यम्बरञ्जलं ... पुरस्कृताग्रतः कृता धर्मस्य पत्नी धर्मपत्नी धर्मार्थपत्नीत्यर्थः ... प्रासादिनादर्थम
... पार्थिवस्य धर्मपत्न्या प्रत्युद्गता सा धेनुस्तदन्तरे तयोर्दंपत्योर्मध्ये दिनक्षपयोर्दिनरात्र्योः मध्यगता संध्येव रराज २०

१९ वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्यां १९ पुरस्कृ
ता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या २० प्रदक्षिणीकृत्य प
यस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः २१ वत्सोत्सुकापि स्तिमिता
सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरःफलानि २२

प्रदक्षिणीकृत्येति अक्षतानां पात्रेण
सह वर्त्तत इति साक्षतपात्रे हस्तो यस्याः सा सुदक्षिणा पयस्विनीं प्रशस्तक्षीरां तां धेनुं प्रदक्षिणीकृत्य प्रणम्य च अस्याः धेन्वाः विशालं शृं
गान्तरं ... अर्थसिद्धेः कार्यसिद्धेः द्वारमिव प्रवेशमार्गमिव आनर्च पूजयामास ... इत्यादिकं तदाह २१ वत्सोत्सुकेति
सा धेनुर्वत्सोत्सुकापि वत्से उत्सुकाप्युत्कंठितापि स्तिमिता निश्चला सती सपर्यां पूजां प्रत्यग्रहीत् इति हेतोस्तौ दंपती ननंदतुः ...
... हेतुमाह भक्त्येति पूज्येष्वनुरागो भक्तिस्तया उपपन्नेषु युक्तेषु विषये तद्विधानां महतां ... प्रसादचिह्नानि पुरः फलानि ...

17

नामिति मध्यमलोकपालः भूलोकपालः देवतापितृअतिथीनां क्रियाः यागश्राद्धदानानि तासामर्थः प्रयोजनं यस्यास्तां ताम्।
धेनुं अन्वक् अनुपदं ययौ सतां मतेन सद्भिर्मानितेन गतिबुद्धीत्यादिना वर्तमाने क्तः इत्यस्य च वर्तमाने इति षष्ठी तेन राज्ञा उपपन्ना
युक्ता सा धेनुः सतां मतेन विधिना अनुष्ठानेन उपपन्ना युक्ता साक्षाच्छ्रद्धा आस्तिक्यबुद्धिरिव बभौ च १६ स इति स रा
जा पल्वलेभ्यः अल्पजलाशयेभ्य उत्तीर्णानि निर्गतानि वराहाणां यूथानि कुलानि येषु तानि बर्हाणि सन्ति एषामिति बर्हिणः
मयूराः मयूरो बर्हिणो बर्हीत्यमरः फलबर्हाभ्यामिनच् वक्तव्यः आवासवृक्षाणामुन्मुखा बर्हिणो येषु तानि श्यामायमानानि

७२

तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना १६।
स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौ मृगाध्यासितशाड्वलानि श्यामायमानानि वनानि पश्यन् १७
आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः उभावलंचक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्यां १८

वराहबर्हिणादिरूपा

मलिनाः श्यामा भवन्ति श्यामायमानानि लोहितादिडाज्भ्यः क्यष् इति क्यष्प्रत्ययः वा क्यषः इत्यात्मनेपदे शानच् मृगैरध्यासिता अ
धिष्ठिताः शाड्वला येषु तानि शादाः शष्पाणि येषु देशेषु सन्तीति शाड्वलाः शाड्वलः शादहरित इत्यमरः शादः कर्दमशष्पयोरिति विश्वः
नडशादाड्ड्वलच् इति ड्वलच्प्रत्ययः वनानि पश्यन् ययौ १७ आपीनेति गृष्टिः सकृत्प्रसूता गौः गृष्टिः सकृत्प्रसूता गौरिति हलायुधः।
नरेन्द्रश्च सौ यथाक्रमं आपीनम् ऊधः ऊधस्तु क्लीबमापीनमित्यमरः आपीनभारोद्वहने प्रयत्नात् प्रयासात् वपुषो गुरुत्वात् दार्ढ्याच्च अ
ञ्चिताभ्यां चारुभ्यां गताभ्यां गमनाभ्यां तपोवनादावृत्तेः पन्थाः तं तपोवनावृत्तिपथं ऋक्पूरित्यादिना अप्रत्ययः समासान्तः अलंचक्रतुः

४१

र. टी. म. २२ अन्येद्युरिति अन्येद्युः अन्यस्मिन्दिने द्वाविंशे दिने सद्यःपरुत्परार्यैषम इत्यादिना निपातनमाद्यन्तं अयात्रा मपयपूर्वेन्ही त्यारो
पूर्वोत्तरापराद् तथापरस्मात् अन्यतरेनाम्यूर्वे पुरादह इत्यमरः मुनिहोमधेनुरात्मानुचरस्य नृपस्य भावं अभिप्रायं दृढभक्तित्व
भावोभिप्रायआशयइत्यमरः जिज्ञासमाना ज्ञातुमिच्छन्ती ज्ञाश्रुस्मृदृशांसन इत्यात्मनेपदे शानच् प्रपतत्यस्मिन्निति प्रपातः पतन
प्रदेशः गंगायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि शष्पाणि बालतृणानि यस्मिन्तत् शष्पं बालतृणं घासइत्यमरः गौरीगुरोः पार्व
तीपितुः हिमवतो गह्वरं गुहां आविवेश २६ सेति साधेनुः हिंस्रैः घातुकैः श्वापदादिभिर्मनसापि दुष्प्रधर्षा दुर्धर्षेति हेतोः अद्रिशोभायां प्रहितेक्षणेन

अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गंगाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश २६ सा दुःप्रधर्षा मन
सापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष २७ तदीयमाक्रन्दितमार्तसाधोर्गु
हानिबद्धप्रतिशब्ददीर्घं रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिं २८ स पाटलायां गवि तस्थिवांसं धनुर्धरः केस
रिणं ददर्श अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं २९ दत्तदृष्टिना नृपेण अलक्षितमभ्युत्पतनमभिमुखोत्पातो यस्य सः

सिंहस्तां धेनुं प्रसह्य हठात्प्रसह्य तु हठार्थकमित्यमरः चकर्ष किल २७ तदीयमिति गुहानिबद्धेन प्रतिशब्देन प्रतिध्वनिना दीर्घं तस्याः इदं तदी
यं आक्रन्दितमार्तघोषणं आर्तः क्लेशं प्राप्तस्तेषु साधोर्हितकारिणो नृपस्य नगेन्द्रसक्तां दृष्टिं रश्मिषु प्रग्रहेषु किरणप्रग्रहौरश्मी इत्यमरः आदायेव
गृहीत्वेव निवर्तयामास २८ सेति धनुर्धरः स नृपः पाटलायां रक्तवर्णायां गवि तस्थिवांसं स्थितं कस्मिन्निव प्रफुल्लं केसरिणं सिंहं सानुमतोद्र
रेर्धातुमय्यां गैरिकस्य विकारो धातुमयी तस्यामधित्यकायां ऊर्ध्वभूमौ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकः
प्रफुल्लो विकसितस्तं फुल्लविकसने इति धातोः पचाद्यच् लोध्राख्यं द्रुममिव ददर्श प्रफुल्लमिति तकारपाठे ञिफला विशरणे इति धातोः कर्तरि क्तः उत्परस्यात

गुरोरिति। भुजोच्छिन्नरिपुर्दिलीपः सदारस्य दारैः सह वर्तमानस्य गुरोः क्रमयोरित्यर्थः। पादौ निपीड्य अभिवंद्य सांध्यं सं
ध्यायां भवं विहितं विधिं अनुष्ठानं च समाप्य दोहावसाने निवृत्तं आसीनां दोग्ध्रीं दोहनशीलां धेनुमेव वत्सनिवृत्तिरनुकृत्यर्थः पुन
र्भेजे सेवितवान्। दोग्ध्रीमिति निरुपपदप्रयोगात् कामधेनुत्वं गम्यते ॥२३॥ तामिति। गोप्ता रक्षकः गृहिणीसहायः पत्नीद्वितीयः सन्नुमा
वयीत्यर्थः। अंतिके न्यस्ताः बलयः प्रदीपाश्च यस्यास्तां तथोक्तां तां धेनुं निषण्णां धेनुमन्वास्य अनूपविश्य क्रमेण सुप्तामनु अनंतरं
संविवेश सुष्वाप प्रातः सुप्तोत्थितां अनूदतिष्ठत् उत्थितवान्। अत्रानुशब्देन धेनुराजयोः पौर्वापर्यमुच्यते क्रमशब्देन धेनुव्या

गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः। दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपु
र्निषण्णां ॥२३॥ तामंतिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः। क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूद
तिष्ठत् ॥२४॥ इत्थं व्रतं पालयतः प्रजार्थं समं महिष्या महनीयकीर्तेः। सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचित
स्य ॥२५॥

पारणमित्युपेत्य नहस्तंचे कर्मप्रवचनीययुक्ते इति द्वितीया ॥२४॥ इत्थमिति। इत्थमनेन प्रकारेण प्रजार्थं संता
नार्थं महिष्या समं साभिषिक्तया पत्न्या सह कृताभिषेका महिषीत्यमरः। व्रतं धारयतः महनीया पूज्या कीर्तिर्यस्य तस्य दीना दि दी
नामुद्धरणे दीनविमोचने उचितस्य नृपस्य सप्तत्रिगुणा आहत्य पादोनानि त्रिगुणानि त्रिरावृत्तानि सप्त दिना
नि एकविंशति दिनानि व्यतीयुः ॥२५॥

स.१
२

ह.टी.मि. २८ प्र नीति सएवं वर्द्धः प्रथमः संगः प्रतिबंधोऽस्य नासिन् तस्मै वेसिंगेऽष्णु प्रयोगे वितपश्रमलोपिफलस्य प्रयासः अतएव वंशं तुणितिबोषु
स्तनमोक्तु मिन्तुन् अंबकं लोचनं इगाहयिनेन लोचनेन चक्षुर्नेत्रं लोचने सहस्रा दिशो तिहल्लायुधः शीघ्रं अंबका नियस्य सल्येवको
हरस्तस्य वोद्गोनज शीघ्र नेमिः स्पंदीकृतः वज्रं पाणौ यस्य सवज्रपाणिः इंद्रः प्रहृष्टशा यैभ्यः परैनिश्वास समो भवत इति वक्तव्यमिति थांतो
संप्रमंतस्योत्तरं निपातः सङ्कवस्थितः सपः एनं सिद्धं प्रत्यब्रवीत् वाहं सकलं राजस्य कुध्यस्यात्तं भयतां मुरिति महाभारते ५२ सर्गः ५ति हैम

प्रत्यब्रवीदेनमिषुप्रयोगे तत्पूर्वसंगे वितपप्रयत्नः जलीकृतं लोचनवीक्षितेन वज्रं मुमुक्षन्निव वज्रपाणिः॥ ५२॥
संप्रधवेयस्तु मगोद्गकामं तस्यैव चंतं य यदहं विवक्तुः अंगीतं ज्ञाराम तां श्विदस्वं भवान् भावसलोमिधास्ये॥ ५३॥

गेंद्र संप्रधवेयस्य प्रतिबंधव्यापारस्य मम तव वः वांवंकामं तस्य परिहसनीयं पद्मः सतांमदीयेनेत्यादि कमहं विवक्तुः वक्तुमिच्छुरस्मि नहिंद
लोस्थीयतामित्याशंक्य ईश्वर किं करवात्सर्वज्ञं त्वां प्रति न हास्यमित्याह अंगेति हियतः भवान् ज्ञारामतामतगतिं इं जनं वाद्यस्याचक्षिरज्ञकाशितमेव
सर्वेषां वेदवेत्ति विदोलटोवेति णलंदेशः अतोहमभिधास्येवस्याभिवचप्रतिप्रकृतं कर्म संबध्यते अन्येतु इदं गच्छन्नाक मर्दसंभावना थेसत राम २४
दिस्तुपहसंति अतएवमौनमेवभूषणा तंतु वाञ्जनस्य पारेकविषयत्वायामिति जानासि अतोऽन्नभिधास्येयच्चोहं विव [illegible] नुरित्यर्थः॥ ५३॥ ॥

तदेति तदा तत्कालः प्रभृतिरादिर्यस्य कर्मणस्तत्तथा तदाप्रभृत्येव वनद्विपानां त्रासार्थं शूलभृता शिवेन अंकं समीपमागताः प्राप्ताः सत्वाः
प्राणिनो वृत्तिर्यस्मिन् तत्तथा अंकः समीप उत्संगश्च इत्युभयत्रापि अमरः सिंहत्वं विधाय अस्मिन्नद्रिकुक्षौ गुहायामहं व्यापारितः नियु
क्तः ३८ तस्येति परमेश्वरेण प्रदिष्टकाला निर्दिष्टः कालो भोजनवेला यस्याः सा उपस्थिता प्राप्ता एषा गोरूपा शोणितपारणा सुरद्विषो राहोश्चन्द्रमसः इयं चा
न्द्रमसी सुधेव तस्य क्षुधितस्य मे तृप्त्यै अलं पर्याप्ता नमःस्वस्ति स्वाहादिना चतुर्थी ३९ स इति स त्वं लज्जां विहाय ... निवर्तस्व

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ व्यापारितः शूलभृता विधाय सिंहत्वमंकागतसत्त्ववृत्ति ३८ तस्यालमेषा
क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ३९ स त्वं निवर्तस्व विहाय
लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ४० इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ४१

भवानिति त्वं गुरोर्दर्शिता प्रकाशिता शिष्यभक्ति
र्येन स तथाभूतोऽसि ननु गुरुधनं विनाश्य कथं तत्समीपं गन्तव्यमत आह शस्त्रेणेति यद्रक्ष्यं धनं शस्त्रेणायुधेन रक्षितुमशक्यं
त्यमशक्यरक्षं ... रक्षितुमशक्यमित्यर्थः तद्रक्ष्यं नष्टमपि शस्त्रभृतां यशो न क्षिणोति न हिनस्ति ... न
रोषायेति भावः ४० इतीति पुरुषाणामधिराजो नृप इति प्रगल्भं मृगाधिराजस्य वचो निशम्य गिरिशस्येश्वरस्य प्रभावात् प्रत्याहतास्त्रः कुंठि
तास्त्रः सन् आत्मनि विषये अवज्ञां ... शिथिलीचकार ... सति

टी.म. २५

न धर्मलोपादियं प्रवृत्तिः किं तु गुरुभयादित्यत्राह अथेति अथेति पक्षान्तरे अथवा एकैव धेनुर्यस्य तस्मादेकधेनोराकरणोऽयन्यासङ्गतिदिश्यं अ
त एवापराधे सति गवोपेक्षणे सति चण्डादतिकोपनात् चण्डस्त्वत्यन्तकोपन इत्यमरः अतएव कृशानुः प्रतिमा उपमा यस्य तस्मादग्निकल्पाद्गुरोर्बिभे
षीति काकुः भीत्रार्थानां भयहेतुरित्यपादानात्पंचमी अल्पविनाशस्य धनलाभे निरतिः सर्वेति भावः अस्य गुरोर्मन्युः क्रोधः मन्युर्दैन्ये क्रतौ क्रुधीत्य
मरः घटा इव ऊधांसि यासां ताः घटोध्नीः ऊधसोऽनङित्यनङादेशः बहुव्रीहेरूधसो ङीप् कोटिशो गाः स्पर्शयता प्रतिपादयता विप्रेभ्यो वितरता
स्पर्शनं प्रतिपादनमित्यमरः भवता विनेतुमपनेतुं शक्यः ४९ तदिति तत्तस्मात्कारणात्कल्याणपरंपराणां भोक्तारं कर्मणि षष्ठी ऊर्जस्वलमस्या

अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद्बिभेषि शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः ४९ तद्रक्ष
कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहं महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥ ५० ॥ एता
वदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ५१ ॥ राम

स्तीत्यूर्जस्वलं ज्योत्स्नातमिस्रेत्यादिना वलच्प्रत्ययान्तो निपातः आत्मदेहं रक्ष ननु गामुपेक्ष्यात्मदेहरक्षणे स्वर्गहानिः स्यादित्यत्राह मही।
तिऋद्धं समृद्धं राज्यं महीतलस्पर्शनमात्रेण भूतलसंबन्धमात्रेण भिन्नं ऐन्द्रं इन्द्रसंबन्धि पदं स्थानमाहुः स्वर्गान्न भिद्यत इत्यर्थः ५० एता
वदिति मृगेन्द्रे एतावदुक्त्वा विरते सति गुहागतेनास्य सिंहस्य प्रतिस्वनेन शिलोच्चयः शैलोऽपि प्रीत्या तमेवार्थं क्षितिपालमुच्चैरभाषतेवेत्युत्प्रे
क्षा भाषिरविसमानार्थत्वाद्द्विकर्मकः ब्रुविस्तु द्विकर्मकेषु पठितः तदुक्तं दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्ववि।
धौ ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविनेति। ५१ ॥ राम श्रीगुरुचरणकमलेभ्यो नमः हरि ॐ राम॥

20

राम

मान्य इति प्रत्यवहारः प्रलयः स्थावराणां तरुशैलादीनां जंगमानां मनुष्यादीनां सर्गस्थितिप्रत्यवहारेषु हेतुः स ईश्वरो मे मम मान्यः पूज्यः अलंघ्याज्ञः
न इत्यर्थः आसन्नं च सिंहत्वं अंकागतसत्ववृत्तीत्युक्तरूपं तर्हि विसृज्य आगमनतो नेत्याह गुरोरपीति पुरस्ताद् अग्रे नश्यदिदम् आहिताग्नेर्गुरोर्धनं अ
पि गोरूपं अनुपेक्षणीयं आहिताग्नेरिति विशेषणेन अनुपेक्षाकरणे हविःसाधनत्वं सूचयति ४४ सेति अंकागतसत्ववृत्तिस्त्वं मदीयेन देहे
न शरीरस्य वृत्तिं जीवनं निर्वर्तयितुं संपादयितुं प्रसीद अपितु दिनावसाने उत्सुको मातरमागमिष्यतीत्युत्सुकः बालो वत्सो यस्याः सा महर्षेरियं धेनु
२५ र्विसृज्यतां ४५ अथेति अथ भूतेश्वरस्य पार्श्ववर्ती अनुचरः सः सिंहः गिरिगह्वराणां गुहानां देवखातबिलं गुहा गह्वरमित्यमरः अंधकारं ध्वांतं दंष्ट्रा॥

मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ४४ स त्वं मदीयेन शरीरवृत्तिं देहेन निर्व री
र्तयितुं प्रसीद दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ४५ अथांधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् भूयः स भूतेश्व रैः
रपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ४६ एकातपत्रं जगतः प्रभुत्वं नवं वयः कांतमिदं वपुश्च अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभा
सि मे त्वं ४७ भूतानुकंपा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदंते जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ४८ दोर्मयूखैः शकलानि खंडा

नि कुर्वन् विहस्य स्मित्वेत्यर्थः किंचिद्विहस्यार्थपतिं भूयो बभाषे हासकारणं अल्पस्य हेतोर्बहु हातुमिच्छन्निति वक्ष्यमाणं स्मरणीयं ४६ एकेति एकातपत्रं ऐकच्छत्र्यं जगतः क२
प्रभुत्वं स्वामित्वं नवं वयो यौवनं इदं कांतं रम्यं वपुश्चेति एवं बहु अल्पस्य हेतोः अल्पेन फलेन कारणेन अल्पफलायेत्यर्थः यद्यपि हेतुप्रयोग इति षष्ठी हातुं त्यक्तुमिच्छ
न् त्वं विचारे कार्याकार्यविमर्शे मूढो मंदः प्रतिभासि ४७ भूतेति तव भूतेषु अनुकंपा दया करुणा चेत् कृपा दयानुकंपा स्यादित्यर्थः तर्हि त्वदंते तव नाशे सति इयं गौ
रेका स्वस्तिः क्षेममस्या अस्तीति स्वस्तिमती भवेत् जीवेदित्यर्थः स्वस्त्याशीः क्षेमपुण्यादिष्वित्यमरः हे प्रजानाथ जीवन् पुनः पितेव उपप्लवेभ्यः विघ्नेभ्यः शश्वत्स नः२
दा पासि रक्षसि सदा च प्राणव्ययेन एकधेनुरक्षणापेक्षया जीवितमेव श्लाघ्यं सकलजगत्त्राणमित्यर्थः ४८ राम राम राम राम राम राम राम॥

अथैकधेनोरित्यत्रोत्तरमाह कथमिति अनुनयः क्रोधापनयः चकारो वाकारो वाकारार्थः महर्षेरनुनयो वान्यासां पयस्विनी
नां दोग्ध्रीणां गवां वितरणेन दानेन कथं नु शक्य इत्यर्थः अत्र हेतुमाह इमां गां सुरभेः कामधेनोः पंचमी विभक्ते इति पंचमी: अन
न्यूनां अवेहि जानीहि तर्हि कथमस्याः परिभवो ऽभूदित्याह रुद्रेति अस्यां गवि त्वया कर्त्रा प्रहृतं तु प्रहारस्तु नपुंसके भावे क्तः रु
द्रौजसा रुद्रस्य सामर्थ्येन न तु वेत्यर्थः सप्तम्यधिकरणे चेति सप्तमी ५४ तर्हि किं चिकीर्षितमित्यत्राह सेयमिति सेव्यो गौर्यया निष्क्री
यते प्रत्याह्रियते ऽनेन परगृहीतमिति निष्क्रयः प्रतिशीर्षकं एरजिति अच्प्रत्ययः स्वदेहार्पणमेव निष्क्रयस्तेन भवतः त्वत्तः पंचम्या

कथं नु शक्यो ऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां ५४ सेयं स्वदेहार्प
णनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ५५ भवानपीदं परवानवैति
महान्हि यत्नस्तव देवदारौ स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ५६ सासितु मोचयितुं न्याय्या न्यायादनपेता युक्तेत्यर्थः पा.१

धर्मपथ्यर्थेत्यादिना यत्प्रत्ययः एवं सति तव पारणा भोजनं विहता न स्यात् मुनेः क्रियार्थो होमादिः सेवार्थः प्रयोजनं स चाप्यलुप्तो भवेत् त्वद्वारणाव्यये
नापि स्वामिगुरुधनं संरक्ष्यमिति भावः ५५ अत्र भवानेव प्रमाणमित्याह भवानिति परवान्स्वामिपरतंत्रो भवानपीदं वक्ष्यमाणमवैति वेत्ति
भवता ऽनुभूयत एवेत्यर्थः शेषे प्रथम इति प्रथमपुरुषः किमित्यत्राह हि यस्माद्धेतोः हि तावद्धारणा इत्यमरः तव देवदारौ विषये महान्यत्नः महता यत्नेन रक्षणीय राम
र्थं इदमग्रश्चेत्तमर्थं दर्शयति स्थातुमिति रक्ष्यं वस्तु विनाश्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन नियुक्तेनेति शेषः नियोक्तुः स्वामिनो ऽग्रे स्थातुं अशक्यं ५६॥

निशम्येति देवानुचरस्येश्वरकिंकरस्य सिंहस्य वाचं निशम्य मनुष्यदेवो राजा पुनरपि उवाच किंभूतः सन् तेन सिंहेन तदध्यासि
तं व्याक्रमणं नपुंसके भावे क्तः तेन कातरे अक्षिणी यस्याः सा तया बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् टिड्ढाणञ् इति ङीप् किं
वा वक्ष्यतीति भीत्या व्याकुलनयनयेत्यर्थः धेन्वा निरीक्ष्यमाणोऽत एव सुतरां दयालुः सन् सुतरामित्यत्र द्विवचनविभज्येत्यादिना सुत्रा
दात्तरप् किमेत्तिङव्ययघादित्यादिना आमुप्रत्ययः नद्युतश्चासर्वविभक्तिरित्यव्ययसंज्ञा ५२ क्षतादिति क्षणु हिंसायाम्
इति धातोः संपदादित्वात् क्विप् गमादीनामिति वक्तव्यादनुनासिकलोपे तुगागमे च क्षतादिति रूपसिद्धं क्षतात् नाशात् त्रायत इति

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ५२ क्षतात्
किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ५२ क्षत्रे सुपीति योगवि

भागात्कः तामेतां व्युत्पत्तिं कविरर्थतोऽनुक्रामति क्षतादित्यादिना उदग्रः उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो वाचकः क्षत्रशब्द इत्यर्थः क्षतात्
त्रायत इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु नाम्न कर्णादिवत् केवलरूढः किं तु पंकजादिवद्योगरूढ इत्यर्थः अत
तः किमित्यत आह तस्य तत्क्षत्रशब्दस्य विपरीतवृत्तेः विपरीतव्यापारस्य क्षतत्राणमकुर्वतः पुंसो राज्येन किं उपक्रोशमलीमसैः निंदामलिनैः उप
क्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे इत्यमरः ज्योत्स्नातमिस्र [illegible] त्यादिना मलिमसशब्दो निपातः तैः प्राणैर्वा किं नि
दितस्य सर्वं व्यर्थमित्यर्थः एतेनैकातपत्रमित्यादिना श्लोकद्वयेनोक्तं दूषणद्वयमिति वेदितव्यं ५२ श्रीमते रामानुजाय नमः ॥

टी॰ म॰ २३

तस्मिन्निति तस्मिन् क्षणे उत्तंसिंहनिपातं उत्पश्यतः उत्प्रेक्षमाणस्य तर्कयतो अवाङ्मुखस्याधोमुखस्य प्रजानां पालयितुः राज्ञः उपरिष्टात् उपर्युपरिष्टादिति निपातः विद्याधराणां देवयोनिविशेषाणां हस्तैर्मुक्ता पुष्पवृष्टिः पपात ६० उत्तिष्ठेति राजा अमृतमिवाचरतीत्यमृतायमानं उपमानादाचारे इति क्यच् ततः शानच् उत्थितं उत्थन्ने हे वत्स उत्तिष्ठेति वचो निशम्य श्रुत्वा उत्थितः सन् अग्रे तत्त्रातत्र्यपः अग्रतो अग्रे प्रस्नवः क्षीरस्रावो अस्त्यस्याः प्रस्रविणीं स्वां जननीमिव ददर्श सिंहं न ददर्श ६१ तमिति विस्मितमाश्चर्यं गतं कर्तरि क्तः तं दिलीपं धेनुरुवाच किमित्याह हे साधो मया मायामुद्भाव्य कल्पयित्वा परीक्षितोऽसि ऋषिप्रभावान्मयि अन्तकोऽपि यमोऽपि प्रहर्तुं न प्रभुर्न समर्थः अन्ये हिंस्राः घातुकाः शरारुर्घातुको हिंस्र इत्यमरः नाम कंपोत्यादिना ल्यपः किमुत सुतरां न भवन्तीत्यर्थः

तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥ ६० उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहं ६१ तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ६२ भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते पुत्र वरं वृणीष्व न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नां ६३ ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ६४

वलवत्सु किमुत स्वस्यती वचनिर्भर इत्यमरः ६२ भक्त्येति हे पुत्र गुरौ भक्त्या मयि अनुकंपया च ते तुभ्यं प्रीतास्मि क्रियाग्रहणामपि कर्तव्यमिति चतुर्थी वरं देवेभ्यो वरणीयमर्थं देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रियमित्यमरः वृणीष्व स्वीकुरुष्व तथाहि मां केवलानां पयसां प्रसूतिं कारणं न अवेहि न विद्धि किं तु प्रसन्नां मां दोग्धीति कामदुघां कामानामवेहि दुहः कप् घश्चेति कप्रत्ययः ६३ ततइति ततो मानितार्थी स्वहस्तार्जितो वीर इति शब्दो येन सः स तेन स्यद्रात्वं दैन्यराहित्यं चोक्तं स राजा हस्तौ समानीय संधाय अञ्जलिं बद्ध्वेत्यर्थः वंशस्य कर्ता

22

कामो

जा धारा

सर्वथा चेतदप्रतिदार्यमित्याह किमिति किमपि किं वा हंत बाहिस्य: अवध्यो मत त्वं मदिमिय शरीरं तस्मिन् दया तुभ्यं
तथात्वं न भवति कुमारः इहात्वं तामुपेक्षतामस्मिन् अनुकंपमवत्सु शरीरं मम कान्ते विधे स्मिन् विरूपविना शिशु भौतिके
नमुष्यस्य शरीरके अभिनिवेश श्रुत इत्याह एकांतेति मादृशानां मादृशानां विवेकिनां एकांतेन विध्वंसिषु इति विग्रहः ५० सो ।
षु पृथिव्यादिभूत विकारेषु पिंडेषु शरीरेषु अनास्था अनपेक्षा आस्था आलंबनास्थानयत्नापेक्षासु कथ्यते इति विश्वः स्मादाभावत्ता माल्लायइत्यमरः सतोह्येकसं
पो८ कार्यादद्य मनुष्यरसीसीत्याह संबंधमिति संबंधम सख्यम् आभाषणमालापः पूर्वकारतांयस्यतमाह: स्यादाभाषणमालाय इत्यमरः संबंध चयनि अनतएव संबंधिनो मित्रस्य मे आप
संबंधो वनांतसंगतयोः भोः आव योर्वनेजातः तद्भूतनाथानुगमिवानु चरणेनतस्यमह लसंचयनि अनत एव संबंधिनो मित्रस्य मे श्रुत
किं मर्त्येहिंस्य एव वैनमतोहं यशः शरीरे भवमेदयालुः एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिकेषु ५७ संबंधमाभाषण
पूर्वमाहुर्वृत्तः सनौ संगतयोर्वनांते तद्भूतनाथानुगनार्हसि संबंधिनो मे प्रणयं विहंतुं ५८ तथेति गामुक्तवते दिलीपः सद्यः इति
दंभविमुक्तबाहुः संन्यस्तशस्त्रोहरये स्वदेहमुपानयत्पिंडमिवामिषस्य ५९ तथा चो शुश्रावात्मनि मिथ्याभाषात्रोधे मारणाइत्यमरः किं ।
विहंतुं नार्हसि ५८ तथेति तथेति गामुक्तवते हरयेसिंहाय कपोतिस्तु वर्गो च विकोव गौर्हरिविरुतेति शाश्वतः सद्यसतत्काल शुभ्रांति भुभाति पिंडं कवल
बंधाद्विमुक्तो बाहुर्यस्य स दिलीपो संन्यस्तशस्त्रः पुंधः सन् स्वदेहमामिषस्य मांसस्य पललं क्रव्यमामिषमित्यमरः पिंडं कवल राम राम श्रीगुरुभरताकवलेभ्यो नमः राम राम श्रीरामाय नमः राम:
प्त्री मर मिवउपानयत्समर्पितवान् एतेनतिर्मत्वेक्तं ५९ राम राम श्रीगुरु भरताकवलेभ्यो नमः

न्य२म२

प्रातरिति ॥ वशी वसिष्ठः प्रातर्यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोसेवारूपस्य नियमस्य पारणायाः अंते प्रास्थानिकं प्रस्थाने भवं तत्कालोचितमित्यर्थः । का
लाट्ठञ् इति ठञ्प्रत्ययः । यथाकथंचिद्गुणवृत्त्यापि काले वर्तमानत्वाट्ठञ्प्रत्ययः । अश्नुत इति ईतिकारः ईयते प्राप्यते अनेनेत्ययनं स्वस्त्ययनं शुभावहमाशीर्वादं प्र
युज्य तौ दंपती स्वां राजधानीं पुरीं प्रति प्रस्थापयामास ॥७०॥ प्रदक्षिणीति ॥ यथाहुतमग्नावाहितं हुताशनं कर्मसमाप्तौ तं भर्तुर्मुनेरनंतरं प्रदक्षिणानंतरमित्यर्थः । अरुं
धतीं च सवत्सां धेनुं च प्रदक्षिणीकृत्य अप्रगताद्दक्षिणं निष्कुष्य अव्ययीभावः । ततश्च्वि तः अप्रदक्षिणं प्रदक्षिणं संपद्यमानं कृत्वा प्रदक्षिणीकृत्य स
न्मंगलैः प्रदक्षिणादिभिर्मंगलाचारैरुदग्रतरप्रभावः सन् प्रतस्थे ॥७१॥ श्रोत्रेति ॥ धर्मपत्नीसहितः सहिष्णुः व्रतादिदुःखसहनशीलः स नृपः श्रोत्राभिरामध्वनिना

प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य । तौ दंपती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ॥७०॥ प्रदक्षिणीकृत्य हुतं हुताशमनंतरं भर्तुररुं
धतीं च । धेनुं सवत्सां च नृपः प्रतस्थे सन्मंगलोदग्रतरप्रभावः ॥७१॥ श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः । ययावनुद्घातसुखेन
मार्गं स्वेनैव पूर्णेन मनोरथेन ॥७२॥ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शितांगं । नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनां ।
॥७३॥ पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनंद्यमानः । भुजे भुजंगेंद्रसमानसारे भूयः स भूमेर्धुरमाससंज ॥७४॥

गमनुद्घातः पाषाणादिप्रतिघातरहितोऽत एव सु
खयतीति सुखस्तेन रथेन स्वेन पूर्णेन सफलेन मनोरथेनेव ययौ । मनोरथपक्षे ध्वनिः स्तुतिः अनुद्घातः प्रबंधनिवृत्तिः ॥७२॥ तमिति ॥ अदर्शनेन प्रवासनिमित्तेनाहितौत्सु
क्यं जनितदर्शनोत्कंठं प्रजार्थेन संतानार्थेन व्रतेन नियमेन कर्शितं कृशीकृतमंगं यस्य तं नवोदयं नवाभ्युदयं प्रजास्तृप्तिमनाप्नुवद्भिरतिगृध्नुभिर्नेत्रैरोषधीनां
नाथं सोममिव पपुः अत्यास्थया ददृशुरित्यर्थः । चंद्रपक्षे दर्शने कलाक्षयनिमित्ते प्रजार्थं लोकहितार्थं व्रतं देवताभ्यः कलादाननियमः । तं च सोमः पर्युदेव पर्यायेणा
नुपूर्वश इति व्यासः । उदयश्चाविर्भावोऽभ्युत्थानं ॥७३॥ पुरंदरेति ॥ पुरः पुरीरसुराणां दारयतीति पुरंदरः । पूःसर्वयोर्दारिसहोरिति खच्प्रत्ययः । वाचंयमपुरंदरौ चे
ति मुमागमनिपातः । तस्य श्रीरिव श्रीर्यस्य स नृपः पौरैरभिनंद्यमानः उत्पताकमुच्छ्रितध्वजं पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियामित्यमरः । पुरं प्रविश्य भुजंगेंद्रे

णा समानसारे तुल्यबले [illegible]

भूयः पुनर्भूमेर्धुरमासंजितवान् ॥७४॥ इति

कामार्थे चन्द्रप्रत्ययः तेत्रतिश्रुत्य प्रति

संतानेति सा पयस्विनी गौः संतानं काम्यत इति संतानकामः कर्मण्यण् तस्मै राज्ञे तथेति काम्यते इति कामो वरः कामार्थे चन्द्रप्रत्ययः तेत्रतिश्रुत्य प्रति

ज्ञाय हे पुत्र मदीयं पयः पत्रपुटे पत्रनिर्मिते पात्रे दुग्ध्वा उपभुंक्ष्व पिबेति उपपुंक्ष्वेति वा पाठः तमादिदेश आज्ञापितवती ६५ वत्सस्येति हे मातः वत्सस्य वत्स

पीतस्य शेषं वत्सपीतावशिष्टमित्यर्थः होमार्थः तस्य विधिरनुष्ठानं तस्य शेषं होमावशिष्टमित्यर्थः तवकुधसि भव्यं ऊधस्यं क्षीरं शरीरावयवाच्चेति यत्

ग्रं ६ स्यापः रक्षितायाः उर्व्याः षष्ठांशं षष्ठभागमिव ऋषेरनुज्ञामधिगम्य उपभोक्तुमिच्छामि ६६ इत्थमिति इत्थं क्षितीशेन विज्ञापिता वशिष्ठस्य धेनुः प्रीततरा पूर्वस्मु

ष्मयाप्रीतासे प्रतिज्ञनया विज्ञापनया प्रीततराज्ञति संतुष्टा बभूव तदन्विता तेन नंदिनी पिनान्विता हैमवतात् हिमवत्संबंधिनः कुक्षेः गुहायाः सकाशात् अश्र

संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश ६५ वत्सस्य होमार्थविधेश्च शेषं

ऋषेरनुज्ञामधिगम्य मातः ऊधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ६६ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव

४ तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ६७ तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा

पुनरुक्तयेव ६८ स नंदिनीस्तन्यमनिंदितात्मा सद्वत्सलो वत्सहुतावशेषं पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ६९ प्रातर्यथोक्तेन श्रमं

प्रत्याययौ आगता ६७ तस्या इति प्रसन्नेंदुरिव मुखं यस्य स नृपाणां गुरुर्दिलीपः प्रहर्षचिह्नैर्मुखरागादिभिरनुमितं तस्याः धेन्वाः प्रसादमनुग्रहं प्रहर्षचि

ह्नैरेव ज्ञातत्वात् पुनरुक्तयेव वाचा गुरवे निवेद्य विज्ञाप्य पश्चात् प्रियायै शशंस कथितवान् कथनं पुनरुक्तिः न चेहास्ति किंतु निवेद्य कथितत्वात् पुनरु

क्तेरेव ज्ञातत्वात् पुनरुक्तेव वाचा गुरवे निवेद्य विज्ञाप्य पश्चात् प्रियायै वाचा संसकथितस्येव कथनं पुनरुक्तिः न चेहास्ति किंतु निवेदनं कर्षितत्वात् वसिष्ठेन कृता

नेनापि तयेनु श्रेद्धा ६८ स इति अनिंदितात्मा अगर्हितस्वभावः सन्तुवत्सल ज्ञेम वात्सल्यवान् वत्सस्य आभ्यामा होमशेषं इति वत्सहुतावशेषं वसिष्ठेन कृता

भ्यनुज्ञः कृतानुमतिः सन् वत्सस्य हुतस्य चावशेषं पीतहुतावशि

ष्टं नंदिन्याः स्तन्यं क्षीरं शुभ्रं मूर्तं यश इव अतितृष्णः सन् पपौ ६९

श्रीगणेशाय नमः ॥ उपाधिगम्योऽप्यनुपाधिगम्यः समाधिनैवाप्यसमाधिलोकः । भवे विधेयो भवदुःखमेतु शिवो यं जगत्यया मादपितः
मयायात ॥ १ राज्ञी गर्भमाधत्तेत्युक्तं संप्रति गर्भलक्षणानि वर्णयितुं प्रस्तौति अथेति अथ गर्भधारणानन्तरं सुदक्षिणा उपस्थितोदयं
प्राप्तकालं भर्तुरीप्सितं मनोरथं मा भवेत् पुनः सखीजनस्योद्वीक्षणानां दृष्टीनां कौमुदी मुखं चन्द्रिकाप्रादुर्भाव यथा कौमुदी नामदीयो
त्सवतिथिः तदुक्तं भविष्योत्तरे कौमोदं तज्जनाय स्यां तेन नाम्नो कौमुदी मतेति तस्या मुखं प्रारंभः अतः केचित्कौमुदी महमिति पाठं पठंति
इक्ष्वाकुकुलस्य संततेरविच्छेदस्य निदानं मूलकारणं निदानं त्वादिकारणमित्यमरः एवं विधं दौर्हृदलक्षणं गर्भचिह्नं व्यमाणां दधौ
स्वहृदयेन गर्भहृदयेन च द्विहृदया गर्भिणी यथोऽवाहनः मातुर्यस्य हृदयं मातुश्च हृदयेन सम सह तेन गर्भिणी तेष्टं अथ धारिमति

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौर्हृदलक्ष
णं दधौ ॥ १ शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपांडुना तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्व

॥ र्वरी २ ॥

णमिति ततसंबंधित्वाद्गर्भो दौर्हृदमित्युच्यते तच्च तद्योगाद्दौर्हृदिनीति तदुक्तं संग्रहे द्विहृदयां नारीं दौर्हृदिनीमाचक्षत इति अन्यत्र दौर्
हृदलक्षणा प्येप्सितत्वेन कौमुदीमुखत्वेन च निरूपणाद्रूपकालंकारः अस्मिन्सर्गे वंशस्थं वृत्तं जतौ तु वंशस्थमुदीरितं जराविति ॥ १ संप्रति सामान्य
लक्षणमलिंगानि वर्णयति शरीरेति शरीरस्य सादात्कार्श्यादसमग्रभूषणा परिमितामरणा लोध्रपुष्पवत्पांडुना मुखेनोपलक्षिता सा सुदक्षिणा विचेया
न्याः तारका यस्यां सा तथोक्ता विरलनक्षत्रेत्यर्थः तनुप्रकाशेनाल्पकांतिना शशिनोपलक्षिता प्रभातकल्पा प्रभातादीषदूनेत्यर्थः शर्वरी रात्रिरिव
अलक्ष्यत दृष्टा प्रभातशब्दस्येषदूनार्थे कल्पप्रत्ययः शर्वरीलाक्षणिकतया शरीरसादादिगर्भलक्षणोपादानं ...नानामाल... हृदिरोगक... भाप्ररो...सदनरो...

२४

अथेति अथ द्यौः सुरवर्त्म द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः अत्रेर्महर्षेर्नयनात्समुत्थमुत्पन्नं निर्यस्यतत् आतश्चोपसर्ग इति कः ७५ न
ज्योतिरिव चंद्रमिवेत्यर्थः स्कंदेत्राः स्यादत्रिनेत्रप्रसूत इति हलायुधः चंद्रस्यात्रिनेत्राज्जन्मोक्तं हरिवंशे नेत्राभ्यां परिप्लुतास्तावद्दशधा द्यो
तयन्दिशः तं गर्भं दशधा पांडु द्योतयंत्यो दधुस्ततः १ समेत्य धारयामासुर्न चैतास्तमशक्नुवन् ततस्ताभ्यः सहसैवाग्रादिग्भ्यो गर्भः प्रभान्वि
तः २ पपात भासयन्लोकान् शीतांशुः सुरभावन इति सुरसरिद्गंगा वह्निना निष्ठ्यूतं क्षिप्तं क्तो छ्वोः शूडनुनासिके चेत्यनेन निपूर्वात् ष्ठीवते
र्वकारस्य ऊठ् तुरनुलस्तनिष्ठ्यूतविक्षिप्तमिति सैरिताः समाद्यमरः ऐशं शैवं तेजः स्कंदमिव अत्र रामायणं ते गत्वा पर्वतं राम कैलासं धातुमंडितं अ
ग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः १ देवकार्यमिदं देव समाधत्स्व हुताशन शैलपुत्र्यां महत्तेजो गंगायां तत्समुत्सृज २ देवतानां प्रतिज्ञाय
गंगामभ्येत्य पावकः गर्भं धारय वै देवि देवतानामिदं प्रियं ३ इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत् तस्या महिमानं दृष्ट्वा समंतादवकीर्यत ४

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोक
पालानुभावैः ७५ इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ नंदिनीवरप्रदानो नाम द्वितीयः सर्गः ॥ २ ॥ तमापनमः

समंततस्तदा देवीमभ्यषिंचत पावकः सर्वस्रोतांसि पूर्णानि गंगाया रघुनंदनेति ५ राज्ञी सुदक्षिणा नरपतेर्दिलीपस्य कुलस्य संततिलक्षणायै
गुरुभिर्महद्भिर्लोकपालानामनुभावैस्तेजोभिरभिनिविष्टं गर्भमाधत्त दधावित्यर्थः अत्र मनुः अष्टानां लोकपालानां वपुर्धारयते नृप इति अथवे
स्यनेनानुक्ती कर्तृ धारणामात्रमुच्यते न पाचमंत्रे इत्यर्थे यथेप्रयथ वीमप्सुजा नागर्भमाधत्ते रावत्सं गर्भमाधत्ते हृद्रोमिमासिसिक्तं तेद्भ्या ग्लायनानां
सीमंततते स्त्रीव्यापारं अप्रोत्ताद्भयोगदर्शनादिति मालिनी वृत्तमिति तदुक्तं ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात् ७५ इति श्रीपदवा
क्यप्रमाणपारावारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां संजीविनीसमाख्यायां द्वितीयः सर्गः ॥ २ ॥ ॥ ॥

र० टी०

उपेत्येति दोहदं गर्भिणीमनोरथः दोहदं दौहृदं श्रद्धा लालसं च समं स्मृतमिति हलायुधः सा सुदक्षिणा दोहदेन गर्भिणीमनोरथेन दुःखशीलतां दुः
खस्वभावतामुपेत्य प्राप्य यद्वस्तु वव्रे ऐच्छत् आकांक्षत तदाहृतमानीतमद्राक्षीत् नियोगः न त्वनुपलब्धमेवासम्भवेनेत्यर्थः कुतः हि यस्मात् अस्य भूपतेस्त्रिदिवे
स्वर्गेऽपि स्वर्गेऽपि अनासाद्यमनवाप्यं नाभूत् किं पात्र भूलोके स्यात् अधिज्यधन्वन इति नहि वीरपत्नीनामलभ्यं नाम किंचिदस्तीति भावः
अत्र वाग्भटः पादशोफो विदाहश्च ... विविधालिंके ति एतच्च पत्नीमनोरथस्य पूरणाकरणे दृष्टदोषसंभवात् न तु राज्ञः स्त्रीलौल्यात् तदुक्तं
देयमप्यहितं तस्यै हितोपहितमल्पकं अदत्ते विघातो गर्भस्य विकृतिश्च्युतिरेव च अन्यत्र च दोषमवाप्नुयादिति ६ क्रमेणेति सा सुदक्षिणा क्रमेण
दोहदव्यथां च निस्तीर्य प्रचीयमाना अवयवाः पुष्यमाणा अवयवा यस्याः सती पुराणपत्रापगमादनन्तरं संनद्धाः संजाताः प्रत्यग्रा मनोज्ञाः पल्लवा

उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतं न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ६ क्रमेण
निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा पुराणपत्रापगमादनन्तरं लतेव संनद्धमनोज्ञपल्लवा ७ दिनेषु गच्छ
त्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयं तिरश्चकाराभ्रमराभिलीनयोः सुजातयोः पंकजकोशयोः श्रियं ८ निधानगर्भामि
व सागराम्बरां शमीमिवाभ्यन्तरलीनपावकां नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत ९ यस्याः सा लतेव रराज ७

लतेव रराजेत्यर्थः दिनेष्विति दिनेषु दोहददिवसेषु गच्छत्सु नितान्तपीवरमतिस्थूलमासमन्तान्नीलमुखं चूचुकं यस्य तत्तदीयं स्तनद्वयमभ्रमरै
रैरभिलीनयोरभिव्याप्तयोः सुजातयोः सुन्दरयोः पंकजकोशयोः पद्ममुकुलयोः श्रियं तिरश्चकार अत्र वाग्भटः आस्ये स्तनौ पीनौ कृष्णतामौ
मुखे च चूचुकाविति ८ निधानेति नृपः ससत्त्वामापन्नसत्त्वां गर्भिणीमित्यर्थः महिषीं निधानं निधिर्गर्भे यस्यास्तां सागराम्बरां समुद्रवसनां भुवमिव राम
स्थिताम् अभ्यन्तरे लीनः पावको यस्यास्तां शमीमिव शमीतरौ वह्निरस्तीत्यत्र लिंगं शमीगर्भादग्निं मथ्नातीति अन्तःसलिलां नदीं सरस्वतीमिवाम २
न्यत एतेन गर्भस्य भाग्यबलतेजस्वित्वपावनत्वानि विवक्षितानि ९ श्रीगुरुचरणकमलेभ्यो नमः श्रीमते रामानुजाय नमः राम रा रा

25

तदिति क्षितीश्वरो रहसि मृत्सुरभिं मृदा सुगंधि तस्याः आननमुपाघ्राय तृप्तिं न आययौ कथमिव शुचिव्यपाये ग्रीष्मावसाने शुचिः ... सुगंधे
मासाषाढयोः सिते ग्रीष्मेऽनलेऽपि पाण्डुपर्यायेषु च मंत्रिणीति विश्वः पयोमुचां मेघानां पृषतैर्बिंदुभिः पृषंति बिंदुपृषता इत्यमरः सिक्तं वनराजौ
पल्वलमुपाघ्राय करी वन्यगज इव नतृप्यत्वनराजिपल्वलानां कांतकादिभीवदनसमाधिरनुसंधेयः गर्भिणीनां मृत्सु रागो लोके प्रसिद्ध एवेति
दोहदक्षेत्रं गर्भलक्षणमुच्यते २ दोहदलक्षणमाह दिवमिति हि यस्माद्दिगंतविश्रांतरथश्चक्रवर्ती तस्याः सुतः ... विकारमं
मरुत्वानिंद्रः इंद्रो मरुत्वान्मघवा इत्यमरः दिवं स्वर्गमिव भुवं भोक्ष्यते भुजोऽनवने इत्यात्मनेपदं अतः अयं मे मातुर्दक्षिणान्वादि ...

तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ करीव सिक्तं पृषतैः पयोमुचां शुचिव्य-
पाये वनराजिपल्वलं २ दिवं मरुत्वानिव भोक्ष्यते भुवं दिगंतविश्रांतरथो हि तत्सुतः अतोऽभिला-
षे प्रथमं तथाविधे मनो बबंधान्यरसान्विलंघ्य सा ३ न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती
वस्तुषु केषु मागधी इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ४ राम राम

षेऽभिलष्यत इति अभिलाषो भोग्यवस्तुनि तस्मिन् कर्मणि घञ् स्पृहेते आस्वाद्यंत इति रसाः भोग्यार्थाः अन्ये च ते रसाश्च तान् विलंघ्य विहाय मनो
बबंध निदधे निदधावित्यर्थः दोहदहेतुकस्यायं ... सत्पुत्रभोगस्य सूचनार्थमनुष्ठेयं ३ नेति मगधस्य राज्ञोऽपत्यं स्त्री मागधी सुदक्षिणा
घ्नंगमगधकलिंगसूरमसादण् इत्यण्प्रत्ययः ह्रिया किंचिदीप्सितमभिलषितं मे मह्यं न शंसति न ब्रूते केषु वस्तुषु स्पृहावती अनुवेलं
अनुसमयमादृतवान् कर्तरि क्तः आदृतौ सादराचिताविति अमरः प्रियायाः सखीः इत्यस्य ... उत्तरकोशलेश्वरो दिलीपः पृच्छति स्म अपृच्छत् लट् स्मे
तार्थे लट् स्मे इत्यनेन सखीनां विश्रंभभूमित्वादिति भावः ४
श्रीगुरुचरणकमलेभ्यो नमः श्रीमद्रामानुजाय नमः राम

मू. ३२ टी. प. ३१

ग्रहैरिति ततः शच्याइन्द्राण्याः समा तुल्या पुलोमजा शचीन्द्राणीत्यमरः सा सुदक्षिणा समये प्रसूतिकाले सति दशमे मासीत्यर्थः दशमे मासि जा
यत इति श्रुतेः उच्चसंश्रयैः उच्चसंस्थैः तुंगस्थानगैः असूर्यगैः अनस्तमितैः कैश्चिद्यथासंभवं पंचभिर्ग्रहैः सूचिताभाग्यसंपद्यस्य तं पुत्रं त्रीणि
प्रभावमंत्रोत्साहात्मकानि साधनान्युत्पादकानि यस्याः सा त्रिसाधना शक्तिः शक्तयस्तिस्रः प्रभावोत्साहमंत्रजा इत्यमरः अक्षयमर्थमिवा
सूत अत्र प्राणिगर्भविमोचने इत्यस्माद्दिवादिकपचने तस्माद्धातोः कर्तरि लङः अत्रेदमनुसंधेयं अजवृषभमृगांगनाकुलीरा झषवणि
जौ च दिवाकरादितुंगाः दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेस्तनीचाः इति सूर्यादीनां सप्तानां ग्रहाणां मेष
माद्यो राशयः श्लोकोक्तक्रमविशिष्टस्त्वोच्चस्थानानीति तत्तुंगापेक्षया सप्तमस्थानानि नीचानि तत्रापि दशमाद्यो रांशास्त्रिंशा

ग्रहैस्ततः पंचभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदं ॥ १३
असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवार्थमक्षयं ॥

26

शापयाज्ञाम उच्चेषु परमोच्च नीचेषु परमनीचा इति जातकश्लोकार्थः अत्रांशाः त्रिंशो भागाः यथाह नारद त्रिंशद्भागात्मकं लग्नादि
तिसूर्यग्रस्तासन्निधिर्ग्रहाणां अस्तमयो नाम तदुक्तं लघुमानसे रविणास्तमयो योगो वियोगस्तूदयो भवेदिति तेच स्वोच्चस्थाः फलं तिग्मस्तगानपि
नीचगास्तदुक्तं राजमृगांके स्वोच्चे पूर्णं स्वर्क्षमधु सुहृद्भे पदं हीन्दोल्पं मुभं खेचरेंद्रः नीचस्थायो नास्तगो वा न किंचित्स्यादन्यत्रैवं सत्रिकोणे दशा
तितदिदमाह कवि उच्चसंस्थैरसूर्यगैरिति च एवं सति यस्य जन्मकाले पंच प्रभृतयो ग्रहाः स्वोच्चस्थाः स देवतुल्यो भवति तदुक्तं कमगाये॥
सुदिनः प्रकृष्टकार्यराजप्रतिरूपकाश्च राजेनः एकद्वित्रिचतुर्भिर्जायंतेऽतः परं दिव्याइति तदिदमाह पंचभिः ॥ १३ ॥

क्रियेति धीरः स राजा प्रियायामनुरागस्य मनसः समुन्नतेरौदार्यस्य भुजेन भुजबलेन निर्जितानां कोशानां वा ... इत्यादिना ब ... पुंसवनं प्रति दृशीः अनुरूपाः पुमान्सूयते अनेनेति पुंसवनं गर्भादेर्या

पुत्रो भविष्यतीति संतोषस्य च धृतिर्योगांतरे धैर्ये धारणा रतितुष्टिष्विति विश्वः स दृशीः अनुरूपाः ... अथ मासि द्वितीये वा पुंसवनं ...

नर सांताः क्रियाः यथाक्रमं क्रममनतिक्रम्य व्यधत्त कृतवान् आदिशब्देनानवलोभनसीमंतोन्नयनग्रहः ... षष्ठेऽष्टमे वा सीमंत इति याज्ञवल्क्यः १० सुरेंद्रेति

दृ पुंसा नक्षत्रेण चंद्रमा युक्तः स्यादिति भास्करः चतुर्थेऽनवलोभनमित्याश्वलायनः ... गर्भस्य गौरवाद्भारात्प्रयत्नेन मुक्तासनया आग

गतागतेन पः सुरेंद्रमातृर्देवमातरं ... नामिकाभिरंशैः आश्रितस्यानुप्रविष्टस्य गर्भस्य गौरवाद्भारात्प्रयत्नेन मुक्तासनया गृहागतः १०

प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगंतसंपदां । यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः सदृशीर्व्यधत्त सः १०

सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्नमुक्तासनया गृहागतः । तयोपचारांजलिखिन्नहस्तया ननंद पारिप्लवनेत्रया नृपः ११ व

कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि । पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव १२

उचितसपर्या उपचारस्तदंजलिः तत्करणे खिन्नहस्तया पारिप्लवनेत्रया तरलनयनया चंचलं चैव पारिप्लवपरिप्लवे ...

र: ननंद सुरेंद्रमात्राश्रितेत्यत्र मनु अष्टाभिश्च सुरेंद्राणां मात्राभिर्निर्मितो नृप इति ११ कुमारेति अथ कुमारभृत्या बालचिकित्सा संज्ञायां सम

जनिवदित्यादिना ... तस्यां कुशलैः ... भिषग्भिः ... गर्भस्य भर्मणि पोषणे भर्म हेम्नि भृतौ भर्मेति विश्वः ...

नः ... आप्तैः ... कालेऽत्र मासि ... प्रसवस्य गर्भमोचनस्योन्मुखीमासन्नप्रसवामित्यर्थः ... दिवमिव पतिः प्रतीतः तु

देके लेपुंधप्रसवो गर्भमोचनमित्यमरः प्रियां ... संजाता न्यस्त्रितां तारकादिभ्य इतच् प्रत्ययः दिवमिव पतिः प्रतीतः तु

र. टी. सं. ३२

स इति स दिलीपसूनुः तपस्विना पुरोधसा वसिष्ठेन तपस्वित्वात् नन्दनस्थितं कर्म सवीर्यं स्यादिति भावः तपोवनादेत्यागत्याखिले जा
तकर्मणि जातस्य कर्तव्ये संस्कारविशेषे कृते सति प्रयुक्तसंस्कारः शाणोल्लेखनादिर्यस्य स तथोक्तः आकरोद्भवः खनिप्रभवः ख
निः स्त्रियामाकरः स्यादित्यमरः मणिरिवाधिकं बभौ वसिष्ठमंत्रप्रभावात् तेजिष्ठोऽभूदित्यर्थः अत्र मनुः प्राङ्नाभिवर्धनात्पुंसो जा
तकर्म विधीयते इति १८ सुखश्रवेति सुखः श्रवः श्रवणं येषां ते सुखश्रवाः श्रुतिसुखा इत्यर्थः मंगलतूर्यनिस्वनाः मंगलवाद्य
ध्वनयः वारयोषितां वेश्यानां वारस्त्री गणिका वेश्या रूपाजीवेत्यमरः प्रमोदनृत्यैः सह मागधीपतेर्दिलीपस्य सद्मनि केवलं गृहेस

27

स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसा कृते। दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ १८।
सुखश्रवा मंगलतूर्यनिःस्वनाः प्रमोदनृत्यैः सह वारयोषितां न केवलं सद्मनि मागधीपतेः पथि व्यजृंभंत दिवौकसामपि ॥१९।
र्दी: न संयतस्तस्य बभूव रक्षितुर्विसर्जयेद्यं सुतजन्महर्षितः ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां मुमुचे स बंधनात् २०।

न व्यजृंभंत किंतु द्यौरोको येषां ते दिवौकसः पृषोदरादित्वात्साधुः तेषां पथि आकाशेपि व्यजृंभंत तस्य देवांशत्वात् देवोपकारित्वा
५२ च्च देवदुंदुभयोपि नेदुरिति भावः १९ नेति रक्षितुः सम्यक्पालनशीलस्य तृन्प्रत्ययः तस्य तादृशस्य चौराद्यभावान्न संयतो वंदीन बभूव
नास्तिस्म माभूत् किं तेन तत्राह यमिति सुतजन्मना हर्षितस्तोषितः सन् यं बंधं विसर्जयेत् विमोचयेत् किंतु राजा तदा पितॄणां ऋणा
भिधानाद्बंधनात् बंधनाख्याद्वा ऋणरूपात् स्वयमेव स्वयमेक एवेत्यर्थः केवलं कृत्स्नमेकं कृत्स्नं केवलश्चावधारित इति शाश्वतः [illegible]
नीरिति स्वयमेव मुक्त इत्यर्थः ऋषित्रयं सप्त वाग्जनतो यः पुत्रीति श्रुतिः प्रमाणं ॥२०॥ श्रीमते रामानुजाय नमः राम राम ॥

दिश इति तत्क्षणं तस्मिन्क्षणे अत्यंतसंयोगे द्वितीया दिशः प्रसेदुः प्रसन्ना बभूवुः मरुतो वाताः सुखाः मनोहराः ववुः अ
ग्निः प्रदक्षिणार्चिः सन् हविराददे स्वीचकार इत्थं सर्वं शुभशंसि शुभसूचकं बभूव तथाहि तादृशां रघुप्रकाराणां भवो
जन्म लोकाभ्युदयाय भवतीति शेषः ततो देवा अपि संतुष्टा इत्यर्थः १४ अरिष्टेति अरिष्टं सूतिकागृहमित्यमरः अरिष्टश
य्यां परितः अभितः परितः समया निकषा हा प्रतियोगेपि दृश्यते इति द्वितीया विसारिणा सुजन्मनस्तस्य शिशोर्निजेन नै
सर्गिकेण तेजसा सहसा हतत्विषो निशीथदीपाः अर्धरात्रप्रदीपाः रात्रकाहाः पुंसि अर्धरात्रनिशीथौ द्वावित्यमरः आलेख्ये

दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय
तादृशां १४ अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा निशीथदीपाः सहसा हतत्विषो बभूवुराले
ख्यसमर्पिता इव १५ जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरं अदेयमासीत्त्रयमेव भूपतेः शशिप्रभं
छत्रमुभे च चामरे १६ निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिबतः सुताननं महोदधेः पूर इवेन्दुदर्शनाद्गुरुः प्रहर्षः प्र

चित्रे समर्पिता इव बभूवुः निशीथशब्दो दीपानां प्रभाधिक्यसंभावनार्थः १५ जनायेति भूपतेरमृतसंमिताक्षरं अमृतसमानाक्षरं
सरूपममिश्रसंमिताक्षरं तादृशं कुमारजन्म पुत्रोत्पत्तिं शंसते कथयते शुद्धान्तचराय अंतःपुरचारिणे जनाय त्रयमेवादेयमासीत्
किं तत् शशिप्रभं छत्रं उभे चामरे च छत्रादीनां राज्ञः प्रधानांगत्वादिति भावः १६ निवातेति निवातो निर्वातप्रदेशः निवातावाश्रया
वातावित्यमरः तत्रत्यपद्मं तद्वत्स्तिमितेन निष्पंदेन चक्षुषा कांतं सुतानने पिबतः स्पृहया पश्यतो नृपस्य गुरुः महान् प्रहर्षः कर्ता
इंदुदर्शनाद्गुरुर्महोदधेः पूरो जलौघ इव आत्मनि शरीरे न प्रबभूव मातुं न शशाक अंतर्न ममावतिसेति यावत् न समाधारेः धिकंमा

रथांगेति रथांगनाम्नोः रथांगनामा नाम रथांगनामानौ चक्रवाकौ पुमान्स्त्रियेत्येकशेषः तयोरिव तयोर्दंपत्योर्भावबंधनं हृ
दयाकर्षकं परस्पराश्रयं अन्योन्यविषयं यत्प्रेम बभूव तदेकेन केवलेन ताम्रामस्येत्वा एके मुख्यान्यकेवलाः इत्यमरः सुतेन
विभक्तमपि कृतविभागमपि परस्परस्योपरि पर्यचीयत ववृधे कर्मकर्तरि लिट् अकृत्रिमत्वात्तथैवोपचितमित्यर्थः।
यदेकाधारं वस्तु तत् आधारद्वये विभज्यमानं हीयते अत्र तु द्वयोः प्रेमैकविषयं प्रेम संप्रति द्वितीयविषयलाभेन न हीयते प्र
त्युत उपचितमेवाभूदिति भावः २४ उवाचेति सोऽर्भकः शिशुः पोतः पाकोऽर्भको डिंभः पृथुकः शावकः शिशुरित्यमरः धात्र्या उ

॥ रथांगनाम्नोरिव भावबंधनं बभूव यत्प्रेम परस्पराश्रयं विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत २४॥
॥ उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलंब्य चांगुलिं अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः २५॥
॥ तमंकमारोप्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि उपांतसंमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ २६॥

28

पमात्रा धात्रीजनन्यामलकीवसुमत्युपमातृषु इति विश्वः प्रथममुदितान्युपदिष्टानि वचांसि उवाच तदीयामंगुलीमवलंब्य ययौ
च प्रणिपातस्य शिक्षया उपदेशेन नम्रः नतोऽभूदिति यत्तेन पितुः मुदं ततान २५ तमिति शरीरयोगजैः सुखैः त्वचि त्वगिंद्रिये अ
मृतं निषिंचंतमिव तं पुत्रं अंकं आरोप्य उपांतयोः प्रांतयोः संमीलितलोचनः सन् नृपः चिरात् सुतस्पर्शरसज्ञतां
ययौ रसः स्वादुः॥ २६॥

श्रुतस्येति अर्थविच्छब्दार्थज्ञः पार्थिवः अयमर्भकः श्रुतस्य शास्त्रस्यान्तं पारं यायात् तथा युधि परेषां शत्रूणामन्तं पारं यया
यात् शाकुभ्यादिस्यर्थः आकिलिङ् चेति शक्यार्थे लिङ् इति हेतोः रगि रघि लघि गत्यर्था इति लघि धातोर्गमनार्थमर्थं अर्थवि ५
त्वादेवावेक्ष्य आलोच्यात्मसंभवं पुत्रं नाम्ना रघुं चकार लघि वस्योर्नलोपश्चेत्युप्रत्ययः मत्वं लत्वमसत्सरांगुल्नीनांवालोर
त्वमापद्यत इति वैकल्पिके रेफादेशे रघुरिति सिद्धं अत्र गौरवः आशौचे तु व्यतिक्रान्ते नाम कर्म विधीयत इति २१॥
पितुरिति साधुः समग्रसंपदः पितुः प्रयत्नात्शुभैर्मनोहरैः शरीरावयवैर्हरिदश्वदीधितेः सूर्यस्य रश्मेरनुप्रवेशाद्बालचंद्रमाः

म १ श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवं २१
पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दिने दिने पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचंद्रमाः २२ उमा नु २
वृषांकौ शरजन्मना यथा यथा जयन्तेन शचीपुरंदरौ तथा नृपः सा च सुतेन मागधी ननंदतुस्तत्सदृशेन तत्समौ २३॥

वृद्धिं दिने दिने प्रतिदिनं नित्यवीप्सयोरिति द्विर्वचनं वृद्धिं पुपोष अत्र संहितावचने सति अमये शशिनि रवेर्दीप्तिप्रवेशो मूर्छितासम
मोनेत्रांसपंपंसि हर्षलोदर निहिताद्भुमंदिरस्यानरीति २२ उमेति उमावृषांकौ पार्वतीवृषभध्वजौ शरजन्मना कुमारेण
कार्तिकेयेन सत्सेनः शरजन्मषडाननस्यमरः यथा ननंदतुः तथा तत्समौ ताभ्यां उमावृषांकाभ्यां शचीपुरंदराभ्यां च समौ सा मागधी
च नृपश्च तत्सदृशेन ताभ्यां कुमारजयंताभ्यां सदृशेन सुतेन ननंदतुः मागधी ख्याता २३ श्रीमतेरामानुजाय नमः रामायनमः

र॰टी॰ ३४

धिय इति अत्र कामंदकः शुश्रूषाश्रवणं चैव ग्रहणं धारणं तथा ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणाः इति आन्वीक्षिकी त्रयी वार्ता
दंडनीतिश्च शाश्वती एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतव इति उदारधीः सरघुः समग्रैः धीयगुणैः चत्वारोऽर्णवा उपमा यासां ताश्च
तुरर्णवोपमाः नद्वितार्थोत्तरपदसमाहारेति उत्तरपदसमासः चतस्रो विद्याः हरितां दिशामीश्वरः सूर्यः पवनातिपातिभिः हरिद्भिर्निजा
श्वैः हरित्ककुभि वर्णे च तरुणवाजिविशेषयोरिति केशवः चतस्रो दिश इव क्रमात्ततार चतुररवोपमत्वं दिशामपि द्रष्टव्यं ३० त्वचमिति
कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः वसीरन्नानुपूर्व्येण शाणक्षौमादिकानि चेति मनुस्मरणात् मेध्यां शुद्धां रौरवीं रुरुसंबंधिनीं रुरुर्महा ३५

धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ३० त्वचं
स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मंत्रवित् न केवलं तद्गुरुरेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ३१ महोक्षतां व
त्सतरः स्पृशन्निव द्विपेंद्रभावं कलभः श्रयन्निव रघुः क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ३२

कृष्णमृग इति यादवः त
च्चर्म परिधाय वसित्वा मंत्रकं अस्त्रं आग्नेयादिकं पितुरेवोपाध्यायादशिक्षत ततः अभ्यस्तवान् आर्त्विज्योपयोगकृत्यादानेनाविंतुतदितो
सएकधनुर्धरोऽप्यभूत् ३१ महोक्षतामिति रघुः क्रमाद्यौवनेन भिन्नशैशवो निरस्तशिशुभावः सन् वत्सानुक्षामतोन्नः मर्हर्षभः अवत्सरा
दिभ्यस्तनुत्वे इति तरप् अस्य भावस्तत्तां स्पृशन्नुपगच्छन्वत्सतरो दम्यइव दम्यवत्सतरौ समावित्यमरः द्विपेंद्रभावं महागजत्व
श्रयन् व्रजन्कलभः करिपोत इव गांभीर्येणाचापलेन मनोहरं वपुः पुपोष ॥ ३२ ॥ श्रीमते रामानुजाय नमः श्रीगणेशाय नमः ॥

रघु ३४

अमंस्तेति स्थितेरभेत्ता मर्यादापालकः स नृपः परार्ध्यजन्मना उत्कृष्टजन्मना अनेन रघुणा अन्वयं वंशं प्रजानां पतिर्ब्रह्मा गु
णाः सत्त्वादयः तेषु अग्र्यं मुख्यं सत्त्वं तेन वर्तते व्याप्रियते इति गुणाग्र्यवर्ती तेन स्वस्य मूर्तिभेदेन अवतारविशेषेण विष्णुना
आत्मनः सर्गमिव स्थितिमंतमंस्त अमंस्त मन्यतेरनुदात्तत्वादिट्प्रतिषेधः अत्रोपमानोपमेययोरितरेतरविशेष
णानीतरेतरत्रयोज्यानि तत्र रघुपक्षे गुणा विद्याविनयादयः गुणोऽप्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे सत्त्वे सत्त्वादिसंध्यादिवि
द्यादिहरिनादिषु चेति विश्वः शेषं सुगमं २७ सेति चूडा कार्या द्विजातीनां सर्वेषामेव धर्मतः प्रथमेऽब्दे तृतीये वा कर्तव्या श्रुतिचोद

अमंस्त चानेन परार्ध्यजन्मना स्थितिमंतमन्वयं स्वमूर्तिभेदेन गुणाग्र्यवर्तिना पतिः प्रजानामिव सर्गमात्मनः २७ स वृ
त्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् २८
अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियं अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥ २९

नात्स्मृतिमनुसरणात् तृतीये वर्षे वृत्तचौलः निष्पन्नचूडाकर्मा सन् चूलचूडयोरभेदः स रघुः प्राप्ते तु पंचमे वर्षे विद्यारंभं च कारयेदिति
वचनात् पंचमे वर्षे चलकाकपक्षकैः चलशिखंडकैः बालानां तु शिखा प्रोक्ता काकपक्षः शिखंडक इति हलायुधः सवयोभिः स्निग्धैः सि
ग्धैर्वयस्थस्सवयास्समः इत्यमरः अमात्यपुत्रैरन्वितः सन् लिपेः पंचाशद्वर्णात्मिकाया मातृकाया यथावद्ग्रहणेन सम्यग्बोधेनोपायभूतेन वाङ्म
यं शब्दजातं नद्या मुखं द्वारं मुखं तु वदने मुख्यारंभे द्वारोपाययोरिति यादवः तेन कश्चिन्मकरादिः समुद्रमिव विवेश प्रविष्टः ज्ञानवानित्य
र्थः २८ अथेति गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनयनं गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश इति स्मरणात् अथ गर्भैकादशे विधिव

सर्ग

टी॰ प्र॰ ५ तारकादित्यादिति च त्रयः आत्मनः पदं स्थानमास्पदं आस्पदं प्रतिष्ठायामिति निपातः सम्पुरिस्मास्पदं कमलात्मिशेत्यनात्म वाचनारं अधिरो
त्सवं उत्सवमिव गैरोनन्द्रगवनुस्थितो हि पूनिरञ्जनीतिभावः ३६ विभावसुरिति सारथिना सहायभूतेनैव नद्रिलोवरामुत्तरवाक्येष्वप्यनुसं
जनीयं तेन वायुना विभावसुरग्निरिव सर्यवती विभावसुरित्यमरः घनव्यपायेन शरत्समयेन सारथिना गजमत्तिमानत्यपइव कटो गंडः ग
डः कटो मदो दानमित्यमरः तस्य प्रभेदात्स्य दनं मदोदयइत्यर्थः तेन करीव पार्थिवो दिलीपस्तेन रघुणा अजितराम ऋषपंनेष्टु सह मुख्यस्य सोव
ब्धव ३७ निपुत्यति शतक्रतुरि ३ उपमोपमेयस्य शतक्रतोस्यमः सो दिलीपः शतेनैव तस्य राजपुत्रो देवा अर्जुना जगाइत्यादि अत्यराजसुते
रघुनेत्रनुगत धनुर्धरं रघुं हेमतुरंगगोसारं ३८ शोभितुम्यराकेन क्रतुना अप्रत्यकोनकेन्द्रोन्न अयमेघनाशं मिपावि पूजाप्रपातेविं

अगस्त्यं शोनं गुरुमविलाषिणी जवावतारं कमलादिवोत्पलं ३६ विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव यम
वेनेवनितिनपदुः मह कटप्रभेदेन करीव पार्थिवः ३७ निपुत्यतेन तमनुज्ञगामसाक्षी धनुर्धरं राजसुतैरनुद्रुतं अपूर्वमेकेन शतक्रतूपमः
३० शतक्रतुर्नाम पविप्रवासः ३८ ततः परे तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतां मध्यतः एव रक्षतां जहार शक्रः किलगूढ
३० विग्रहः ३९ विषादलुप्तप्रतिपत्ति विस्मितं कुमारसैन्यं सपदि स्थितं च तत् वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नन्दिनी ४०

नं५ ततइति ततः परमेकोनं शतं क्रतुं प्राप्तं तेन तं यज्वना विधिनेष्टवता तेन दिलीपेन पुनरपि मखायाश्वमेधं कर्तुं क्रियार्थोपपदे इत्यादिना चतुर्थी उत्स
ष्टं मुक्तं अनर्गलं अप्रतिबन्धं आव्याहतसंचारमित्यर्थः अपयावर्तयतोः पुत्रे तेवरंतीत्यापत्तंबसमग्रान् तुरंगं धनुर्भृतां रक्षतां मध्य
एव शक्रो गूढविग्रहः सन् जहार किलेत्यैतिह्ये ३९ विषादेति तत्कुमारसैन्यं सेनासपदि विषादलुप्तनाशकेनोमनोभंगः तत्कं विषाद
स्तेन लुप्त उपायाभावतो अस्थैर्य इति तेन लुप्ता प्रतिपत्तिः कर्तव्यज्ञानं यस्य तत्तथोक्तं विस्मितं गृध्यनाशस्यां करत्वात् आश्चर्यावेष्टनमिव
तं तत्स्थौ अथ श्रुतप्रभावा यदृच्छया कायाग्निगता नन्दिनीनाम वसिष्ठधेनुः ददृशे रघोः स्वप्रसादेन अन्नान्नदेत्रुजीपदांतिशायः सो

३०

रामः

अथेति गोर्गौदित्यवलीवर्दे ककुद्मेदर्षभेदयोः स्त्रीतु स्याद्दिशि भारत्यां भूमौ च सुरभावपि पुंस्त्रियोः स्वर्गवज्रांबुरश्मिदृग्बाणलोमस्विति केशवः
गावो लोमानि केशाः दीयंते खंड्यंतेऽस्मिन्निति व्युत्पत्त्या गोदानं नाम ब्राह्मणादीनां षोडशादिषु वर्षेषु कर्तव्यं केशांतारव्यं कर्मोच्यते तदुक्तं मनुना।
केशांतः षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततइति अथ गुरुः पिता गुरुर्गीष्पतिपित्राद्यावित्यमरः अस्य रघोः गोदान
विधेरनंतरं विवाहदीक्षां निरवर्तयत् कृतवानित्यर्थः अथ नरेंद्रकन्यास्तं सत्पतिं तमोनुदं चंद्रमिव तमोनुदोऽग्निचंद्रार्का इति वि
श्वः सत्पतिमवाप्य अमुः दक्षसुता इव अबभुः रघुरपि तमोनुदः चंद्रमनुः वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमं अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेदिति ३३
संप्रति यौवराज्ययोग्यतामाह युवेति युवा युगो नाम धुर्यस्कंधगतः सच्छिद्रः काष्ठविशेषः यानाद्यंगे युगः पुंसि युगं युग्मे कृतादिषे

अथास्य गोदानविधेरनंतरं विवाहदीक्षां निरवर्तयद्गुरुः नरेंद्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ३३ युवा युगव्या
यतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ३४ ततः प्रजानां चिरमात्म
ना धृतां नितांतगुर्वीं लघयिष्यता धुरं निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ३५ नरेंद्रमूलायतनादनंतरं
तदास्पदं श्रीर्युवराजसंज्ञितं

मरः युगवद्व्यायतौ दीर्घौ बाहू यस्य सः अंसौ अस्य स्तः इत्यंसलो बलवान् मांसलश्चेति वृत्तिकारः बलवान् मांस
लोंऽसल इत्यमरः वत्सांसाभ्यां कामबले इति लच्प्रत्ययः कपाटवक्षाः परिणद्धकंधरः विशालग्रीवः परिणाहो विशालता इत्यमरः रघुः वपुषः
प्रकर्षादाधिक्यात् यौवनकृतात् गुरुं पितरं अजयत् तथापि विनयान्नम्रत्वेन नीचैरल्पकोऽदृश्यत अल्पोऽयमिति विवधितेति ३४ संप्रति यौवराज्यमाह त
तइति ततः आत्मना चिरं धृतां नितांतगुर्वीमतिगुर्वीं प्रजानां धुरं भारं लघयिष्यता लघ्वीं करिष्यता तत्करोति तदाचष्टे इति लघयतेर्लृटः शत्रादेशः तेन
लट्सदिति शत्रादेशः नृपेण दिलीपेन असौ रघुः निसर्गेण स्वभावेन संस्कारेण शास्त्राभ्यासजनितवासनया च विनीतो नम्र इति हेतोर्युवराज इति शब्दं भज
तीति तद्भाक् भजो ण्विरिति ण्विप्रत्ययः चक्रे कृतः द्विविधो विनयः स्वाभाविकः कृत्रिमश्चेति कौटिल्यः तदुभयसंपन्नत्वात् युवराजे च कृतेत्यर्थः अत्र का
मंदकः विनयोपग्रहान् भृत्ये कुर्वीत नृपतिः सुतान् अविनीतकुमारं हि कुलमाशु विशीर्यते विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेदिति ३५ नरेंद्रेति गुणान्तवि

त्रिलोकेति त्रयाणां लोकानां नाथस्त्रिलोकनाथः तद्धितार्थेत्यादिना उत्तरपदसमासः तेन त्रिलोकनाथेन सदा दिव्यचक्षुषा अती

र.टी.म. ३६ न्द्रियार्थदर्शिना त्वया मखद्विषः क्रतुविघातकाः सदा नियम्याः ननु शिक्षणीयाः खलु स त्वं धर्मचारिणां कर्मसु क्रतुषु स्वयम् अन्तरायो

विघ्नो भवसि चेत् विधिः अनुष्ठानं च्युतः लोके सत्कर्मवार्ता नास्तीत्यर्थः ४५ तदिति हे मघवन् तत् तस्मात् कारणात् महाक्रतोः अश्वमेध तर

स्याग्र्यं श्रेष्ठम् अङ्गं साधनम् अमुं तुरङ्गं प्रतिमोक्तुं प्रतिदातुम् अर्हसि तथा हि श्रुतेः पथः दर्शयितारः सन्मार्गप्रदर्शकाः ईश्वराः महान्तः मली

मसां मलिनां पद्धतिं मार्गं नाददते न स्वीकुर्वन्ति असन्मार्गगामिनं लेवं तद्रूपर्थः मलीमसं तु मलिनं कच्चरं मलदूषितम् इत्यमरः ४६ इतीति

त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा । स चेत् स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ४५

मर तदङ्गमग्र्यं मघवन् महाक्रतोरमुं तुरङ्गं प्रतिमोक्तुमर्हसि । पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम् ४६ इति प्रगल्भं मा२

३१ रघुणा समीरितं वचो निशम्याधिपतिर्दिवौकसाम् । निवर्तयामास रथं सविस्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ४७ यदात्थ रा

जन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः । जगत्प्रकाशं तदशेषमिज्यया भवद्गुरुर्लङ्घयितुं ममोद्यतः ४८

देश समीरितं प्रगल्भं वचो निशम्य श्रुत्वा दिवौकसः स्वर्गौकसः दिवं स्वर्गे नार्यां चेति विश्वः तेषाम् अधिपतिः देवेन्द्रः रघुप्रभावात् सविस्म इति प्रगु।।

यः सन् रथं निवर्तयामास उत्तरं प्रतिवक्तुं प्रचक्रमे च ४७ यदिति हे राजन्यकुमार क्षत्रियकुमार मूर्धाभिषिक्तो राजन्यो बाहुजः

क्षत्रियो विराड् इत्यमरः यदात्थ यद्ब्रवीषि ब्रुवः पञ्चानाम् इत्यादिना आहादेशः तत्तथा सत्यं किन्तु यशोधनैः परस्मात् शत्रो

नः शत्रुतो यशो रक्ष्यं यतः किमत आह भवद्गुरुः त्वत्पिता जगत्प्रकाशं लोकप्रसिद्धं अशेषं सर्वं मखशतयाजी इत्यसाधारणं ल

तदिति सतां पुरस्कृतः पूजितः स दिलीपनन्दनो रघुः पुण्येन तदंगनिष्यन्दजलेन तदंगं नन्दिन्यंगं तस्मिन्निष्यन्दि ... नमो ऽपः
तेन लोचने प्रमृज्य शोधयित्वा ऽतीन्द्रियेष्वपि इन्द्रियाण्यतिक्रान्तेषु असाद्य अतीन्द्रियेष्विति द्वितीये ऽत्ययेष्विति समासः द्विगुप्राप्ताप
न्नेत्यादिना समासेषु परवल्लिंगताप्रतिषेधाद्विशेष्यनिघ्नत्वं भावेष्वपि वस्तुषूपपन्नदर्शनः सम्पन्नसाक्षात्कारशक्तिर्बभूव ४१
सहति नरदेवसंभवः स रघुः पुनः पुनः सूतेन निषिद्धचापलं निवारितौद्धत्यं रथरश्मिभिः प्रग्रहैः किरणाश्च प्रग्रहो रश्मिरित्यमरः
संयतं बद्धमश्वं हरन्तं पर्वतपक्षशातनं छेदकं देवमिन्द्रं पूर्वतः पूर्वस्यां दिशि ददर्श ४२ शतैरिति रघुस्तमश्वहर्तारं

तः१ तदंगनिष्यन्दजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सतां अतीन्द्रियेष्वप्युपपन्नदर्शनो बभूव भावेषु दिलीपनन्दनः
४१ स पूर्वतः पर्वतपक्षशातनं ददर्श देवं नरदेवसंभवः पुनः पुनः सूतनिषिद्धचापलं हरन्तमश्वं रथरश्मिसंयतं ४२ शतै
स्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव ४३ म
खांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र सदा निगद्यसे अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे ४४

हरिभि१ अनिमेषवृत्तिभिर्निमेषव्यापारशून्यैः अक्ष्णां शतैः हरिं हरिर्वाजिवशक्राहिवाताहिकपिभेकवर्णोंशुरितिविश्वः वाजिभिरश्वैश्च
हरिभिर्हरिद्वर्णैः हरिर्वाक्कपिलेंद्वं (?) हरिमिन्द्रं विदित्वा ज्ञात्वा एनमिन्द्रं गगनस्पृशा व्योमव्यापिना धीरेण गंभीरेण स्वरेणाध्वनिना
निवर्तयन्निव अवोचत् ४३ मखेति हे देवेन्द्र मनीषिभिः त्वमेव मखांशभाजां यज्ञभागभुजां प्रथमः सदा निगद्यसे कथ्यसे तथा
पि अजस्रदीक्षायां नित्यदीक्षायां प्रयतस्य मद्गुरोः क्रियाविघाताय यज्ञविघ्नाय कथं प्रवर्तसे ४४
द१

र॰टी॰ स॰ ३ ५२

32

सइति सरघुः उन्मुखः सन्मघवंतमिंद्रमेवमुक्त्वा शरासनं चापं सशरं करिष्यमाणः आलीढेन आलीढाख्येन स्थानकभेदेन विशेषशो
भिना ऽतिशयशोभिना वपुःप्रकर्षेण देहे [illegible] विडंबितेश्वरः अनुकृतपिनाकी सन् अतिष्ठत् आलीढलक्षणमाह यादवः स्था
नानि धन्विनां पंचत्र वैशाखमंडलं [illegible] आलीढं प्रत्यालीढमिति अन्वर्थे स्यात् समपदमालीढं तु ततोऽग्रतः दक्षिणे
वाममं कुंच्य प्रत्यालीढं विपर्यय इति ५२ रघोरिति रघोः अवष्टंभमयेन स्तंभरूपेण अवष्टंभः सुवर्णे च स्तंभप्रारंभयोरिति विश्वः
पत्रिणा बाणेन हृदि हृदये क्षतो विद्धः अतएवामर्षणः असहनः कुपितः गोत्रभिदिंद्रोपि [illegible] द्रोणी परो मत इति

स एवमुक्त्वा मघवंतमुन्मुखः करिष्यमाणः सशरं शरासनं अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडंबितेश्वरः ५२ रघोर
वष्टंभमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः नवांबुदानीकमुहूर्तलांछने धनुष्यमोघं समधत्त सायकं ५३ दिलीपसू
नोः सबृहद्भुजांतरं प्रविश्य भीमासुरशोणितोचितः पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितं ५४ हरेः कुमारोपि कुमार
विक्रमः सुरद्विपास्फालनकर्कशांगुलौ भुजे शचीपत्रलताक्रियोचिते स्वनामचिह्नं निचखान सायकं ५५ विश्वः नवांबुदानामनीकस्य मुहू

र्त्तेण मात्रं लांछने चिह्नभूते धनुषि इंद्रधनुषीत्यर्थः अमोघमव्यर्थं सायकं समधत्त संहितवान् ५३ दिलीपेति भीमानां भयंकराणां असुरा
णां शोणितेरुचितः परिचितः [illegible] आशुगः सायको दिलीपसूनोः रघोः बृहद्भुजांतरं वक्षः प्रविश्य अनास्वादितपूर्वं पूर्वमनास्वादितं सस्सुपेति
समासः मनुष्यशोणितं कुतूहलेनेव पपौ ५४ हरेरिति कुमारः स्कंदः [illegible] कुमारो
पि [illegible] सुरद्विपस्यैरावणस्यास्फालनेन कर्कशा अंगुलयो यस्य तस्मिन् [illegible]

पं ३

।।५५।।

किं ते पुत्रा इत्याह हरिरिति पुरुषेषूत्तम इति सप्तमीसमासः न निर्धारण इति षष्ठीसमासनिषेधात् कर्मधारये तु सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैरिति उत्तमपुरुष इति स्यात् यथा विष्णुर्हरिरेक एव पुरुषोत्तमः स्मृतः यथा च त्र्यंबकः शिव एक एव महेश्वरः स्मृतः नापरः अपरः पुमान्न तथा तथा मां मुनयः शतक्रतुं विदुः विदो लटो वेति नोऽस्माकं हरिहरयोर्मध्ये त्वर्थः एष शब्दस्तयोर्द्वितीयगामी नहि द्वितीया श्रितातीत गामिगम्यादीनामुपसंख्यानात्समासः ४९ अत इति यतोऽहमेवं शतक्रतुरतस्त्वदीयस्य पितुः अयमश्वः कपिलानुकारिणा कपिलमुनितुल्येन मयाऽपहारितोऽपहृतः अपहारित इति स्वार्थे णिच् तवात्र प्रयत्ने

हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव नापरः तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी नहि शब्द एष नः ४९ अ-
सा२ तोऽयमश्वः कपिलानुकारिणा पितुस्त्वदीयस्य मयापहारितः अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ५० ततः
प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ५१

प्रयत्नेनालं प्रयत्नो मा कारीत्यर्थः निषेध्यस्य निषेधं प्रति करणत्वात्तृतीया सगरस्य राज्ञः संततेः संतानस्य पदव्यां पदं मा निधाः मा निधेहि इति निषेधः
वे३ धीरूपानेर्लुङ् न माङ्योग इत्यडागमप्रतिषेधः महदाक्रन्दनैर्विनाशमलंभौक्ष्यतीति भावः ५० तत इति ततस्तुरगस्य रक्षिता रघुः प्रहस्य प्रहासं कृत्वा अपभयो निर्भीकः सन् पुनः पुरंदरं बभाषे किमिति हे देवेश यदि एवमग्रपक्षे न त्वयापितोऽसि श्वयो यदि सर्गः स्वभावनिर्मोहनिश्चयः अथ हि चिस्मयः तर्हि शस्त्रं गृहाण भवान् रघुं मामनिर्जित्य कृती कृतार्थो न खलु इष्टादिभ्यश्चेति इनि प्रत्ययः रघुग्रहणात्

गा:

रघुरिति रघुस्तेन वज्रेण भृशमत्यर्थं वक्षसि ताडितः सन् सैनिकानामश्रुभिः सह भूमौ पपात तस्मिन् पतिते सैन्या रुरुदुरित्यर्थः निमेषमात्राद्व्यथां पीडां
अवधूय निरस्य सैनिकानां हर्षनिस्वनैः क्ष्वेडाभिः सहोत्थितः तस्मिन्नुत्थिते सैन्याः सिंहनादांश्चक्रुरित्यर्थः क्ष्वेडा तु सिंहनादः स्यादित्यमरः ६१
तथापीति तथापि वज्राघातेऽपि शस्त्राणां व्यवहारे प्रयोगे निष्ठुरे क्रूरे विपक्षभावे शात्रवे स्थितं तस्थुषः स्थितवतोऽस्य रघोः वीर्यातिशयेन वृत्रहन्
तानिति वृत्रहा तुतोष कथं शत्रोः सतोऽपि गुणैः सर्वत्र शत्रुमित्रोदासीनेषु पदं स्थानं निधी-
यते गुणाः सर्वत्र संक्रम्यन्ते गुणाः शत्रूनप्यावर्जयन्तीति भावः ६२ असंगमिति सारवत्तया अद्रिष्वपि असंगं त्वदन्येन

रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिकहर्षनिस्वनैः ६१ तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते ६२ असंगमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधं अवेहि मां प्रीतमृते तुरंगमात्किमिच्छसीति स्फुटमाह वासवः ६३ ततो निषंगादसमग्रमुद्धृतं सुवर्णपुंखद्युतिरंजितांगुलिं नरेंद्रसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरं ६४ अमोच्यमश्वं यदि मन्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यतां ६५ यथा च वृत्तांतमिमं सदोगतस्त्रिलोचनैकांशतया दुरासदः तवैव संदेशहराद्विशांपतिः शृणोति लोकेश तथा विधीयतां ६६

न विषेधं ... तां मां प्रीत-
तुरंगमादृते तुरंगं वर्जयित्वा ... किमिच्छसीति स्फुटं वासवः आह ६३ तुरंगमादन्यद्देयं ... इति भावः
ति ततो नरेंद्रसूनुः रघुः निषंगात् तूणीरात् असमग्रमर्धं यथा तथोद्धृतं सुवर्णपुंखद्युतिभिः रंजिता अंगुलयो येन तं इषुं प्रतिसंहरन् ...
दिति भावः प्रियंवदः प्रियवक्ता ... सुरेश्वरं प्रत्यवदत् ... ६४
अमोच्यमिति ... यदि मन्यसे ततः ... विधिनैव कर्मणि ...

।त्रिशामथर

जहारेति अन्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं चिच्छेद स भृशं सुरश्रियः प्रसह्य बलात्कारेण केश ... तारणादिव ...
स्तरघवे मद्धार्मयपर्थं चुकोप तस्मै ... नाडुत्थी ५६ तयोरिति जयैषिणोर्वासवयोरिंद्ररघ्वोः ग... तः ...
बुद्धाः पत्रमित्यमरः आशीविषाः ... विदंष्ट्रायां ... विषं येषां ते आशीविषाः सर्पाः पृषोदरादित्वादिति साधुः आशीरुरगदंष्ट्रायामित्यमरः तद्वद्भीम
दर्शनाः सपक्षाः सर्पा इव भयावहा ... नैरुपमुखैः ऊर्ध्वमुखैश्च ... पर्यन्तदेशावस्थितत्वादितीभावः पत्रिभिः ... उपान्तस्थिताः सिद्धाः
सिद्धादेवाः ... सैनिकाः ... तुमुलं संकुलं युद्धं बभूव ५७ अतीति वासवः अतिप्रबंधेन अतिसातत्येन शरैः तामिः पुष्कलाभिः

चौ। जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजं चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्यपरोपणादिव ५६ तयोरुपान्तस्थित
सिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूव युद्धं तुमुलं जयैषिणोरधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ५७ अतिप्रबंधप्रहितास्त्रवृष्टि
भिस्तमाश्रयं दुःप्रसहस्य तेजसः शशाक निर्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरंबुदः ५८ ततः प्रकोष्ठे हरिचंदनांकितेप्र
मथ्यमानार्णवधीरनादिनीं रघुः शशांकार्धमुखेन पत्रिणा शरासनज्यामलुनाद्बिडौजसः ५९ स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशना
यप्रबलस्य विद्विषः महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामंडलमस्त्रमाददे ६० ... अस्त्रवृष्टिभिः दुःप्रसहस्य तेजसः ...

प्रतापस्य आश्रयं तं रघुं अंबुदो ... स्वतः च्युतं वह्निमिव निर्वापयितुं न शशाक रघोः ... कथानायकस्य ... असंभवत्वादितिभावः ५८ तत
इति ततो रघुः हरिचंदनांकिते प्रकोष्ठे मणिबंधे प्रमथ्यमानार्णवधीरनादिनीं प्रमथ्यमानार्णवगंभीरं नदतीति तां तथोक्तां ... विद्युदापकं
ओजो यस्य तस्य बिडौजसः इंद्रस्य पृषोदरादित्वात्साधुः शरासनज्यां धनुर्मौर्वीं शशांकस्यार्धं खंडं इव मुखं फलं यस्य तेन पत्रिणा अलुनाद्भिनत् ५९ स इति

दिलीपानंतरं राज्ये तं निशाम्य प्रतिष्ठितं पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः २२ सर्ग
मा ४

श्रीगणेशाय नमः ॥ शारदा शारदांभोजवदना वदनांबुजे सर्वदा सर्वदास्माकं संनिधिं संनिधिं क्रियात् १ स इति सः रघुः गुरुणा पित्रा दत्तं राज्यं राज्ञः क
र्म प्रजापालनात्मकं प्रतिपद्य अंगीकृत्य प्रतिपद्य प्राप्य दिनांते सायंकाले सविता सूर्येण निहितं तेजः प्रविश्य हुताशनो
ऽग्निरिव अधिकं बभौ सौरं तेजः सायमग्निं संक्रमते आदित्यो वा अस्तं यन्नग्निमनुप्रविशति अग्निं वादित्यः सायं प्रविशतीत्यादि श्रुतिः प्रमाणं
सि दिलीपानंतरं राज्ये प्रतिष्ठितं तं वसिष्ठेन तं रघुं निशम्याकर्ण्य पूर्वं हि दीपकाले रोद्धव्ये प्रकर्षेण धूमो यस्य संजातः प्रधूमितोऽपि संतापाग्निः उत्थितः इव
ज्वलित इव दुर्वारः अधिकः संतापोऽभूदित्यर्थः राजकर्तृकस्यापि निशमनस्याग्नेरुपचारान्नाश्रयमानकर्तृकत्वविरोध इत्यर्थः २ पुरुहूतेति पुरुहूतध्व

स राज्यं गुरुणो दत्तं प्रतिपद्याधिकं बभौ दिनांते निहितं तेजः सवित्रेव हुताशनः १ न्यस्तशस्त्रं दिलीपं च तं च शुश्रूषुमीपतिं राज्ञां मुदगमत्
माधे हृदि शल्यमिवार्पितं २ पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः नवाभ्युत्थानदर्शिन्यो ननंदुः सप्रजाः प्रजाः ३ समं समैसक्रांतं द्वयं द्विरदगा
मिना तेन सिंहासनं पित्र्यमखिलं चारिमंडलं ४ छायामंडललक्ष्येण तमदृश्या किल स्वयं पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितं ५ ३

मा ३ जः स किल नाश
थं राजभिः दृश्यमानं दुःखमुत्पन्नं भविष्यतीतरे स इंद्रः कुरुते यात्रामिंद्रकेतोर्युधिष्ठिरः पर्जन्यः कामवर्षी स्यात्तस्मिन् राज्ये न संशय इति पुरुहूतध्वजस्ये
स्येवोन्नयनाभ्युत्थानमभ्युन्नतिमभ्युत्थानं नवाभ्युत्थानदर्शिन्यः ऊर्ध्वं प्रस्थितं तद्दर्शिता नयनपंक्तयो यासां ताः सप्रजाः ससंतानाः प्रजा
संततो जनैः दृश्यमानताप्रस्तिरः ननंदुः ३ सममिति द्विरदवद्गजवद्गामिना
तेन रघुणा समं युगपदेव द्वयं समाक्रांतमधिष्ठितं किं तद्द्वयं पित्र्यं तु गतावि अपि पितुर्यदित्यस्त्रयः सिंहासनमखिलं च अरीणां मंडलं राष्ट्रं
प्रतिहासनाद्येषणानंतरं तस्य लक्ष्मीरुतनिधानमाह छायेति अत्र घोषस्तेजो विशेषणा सर्वसंनिहिततया लक्ष्म्याः अत्र आरान्नमितु

तथेति मातलिसारथिरिंद्रः रघोः संबंधिनं कामं मनोरथं यथा स्युरिति प्रतिशुश्रुवान् प्रतिश्रुतवान् यथागतं सदेवसभं ययौ निवृत्त सुजस्येनः प ज्ञा॰ सुं
सुदक्षिणासूनुः रघुरपि नातिप्रमनाः विजयलाभेप्यश्वनाशान्नातीव हृष्टः सन् नेतर्थस्य नृपस्य सदस्यसुपेतिसभासमः नृपस्य सदोगृहं प्रतीत्य वर्तत ६७
तमिति हरेरिंद्रस्य शासनहारिणा पुरुषेण प्रथमं प्रबोधितो ज्ञापितो वृत्तांत इति शेषः प्रजेश्वरो दिलीपः हर्षजडेन हर्षशिशिरेण पाणिना कुलिशव्रणांकि
तं तस्य रघोरिदं तदीयं अंगं गात्रं शरीरं परामृशन् स्पृशन् तं रघुं अभ्यनंदत् ६८ इतीति इति हेतुप्रकारादिसमाप्तिष्वित्यमरः महनीयशासनः पूज्यं
शीघ्रः क्षितीशः इति क्रतूनां नवभिरधिकां नवतिं एकोनशतमायुषः क्षये समाप्तौ दिवं स्वर्गं आरुरुक्षुः आरोढुमिच्छुः सोपानानां परं

तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ६७ तमभ्यनंदत्प्रथ
मं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः परामृशन्हर्षजडेन पाणिना तदीयमंगं कुलिशव्रणांकितं ६८ इति क्षितीशो नवतिं नवाधिकां
वं०३ महाक्रतूनां महनीयशासनः समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरंपरामिव ६९ अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिक
कुदं दत्वा यूने सितातपवारणं मुनिवनतरुछायां देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतं ७० इति श्रीरघुवंशे
महाकाव्ये कविश्रीकालिदासकृतौ दिलीपवनप्रस्थानो नाम तृतीयः सर्गः ३॥ क्तिमिव ततान ६९ अथेति अथ विषयेभ्यो व्यावृत्तात्मा निवृत्तचित्तः

स दिलीपो यथाविधि यथाशास्त्रं यूने सूनवे नृपतिककुदं राजचिह्नं ककुद्वत्ककुदं श्रेष्ठं प्राधान्ये राजलिंगे च वृषांगे ककुदोस्त्रियामित्यमरः सितातपवारणं श्वेतच्छत्रं दत्वा तया
देव्या सुदक्षिणया सह मुनिवनतरोः छायां शिश्रिये शिश्रियवान् वानप्रस्थाश्रमं स्वीकृतवानित्यर्थः तथाहि गलितवयसां वृद्धानां इक्ष्वाकूणां इक्ष्वाकुगोत्रापत्या-
नां तद्राजसंज्ञकत्वाद्लुक् इदं वनगमनं कुलव्रतं हि देव्या सहेत्यनेन सपत्नीकवानप्रस्थाश्रम उक्तः तथाच याज्ञवल्क्यः सुतविन्यस्तपत्नीकस्तया वानुगतो व

पंचानामिति पृथिव्यादीनां पंचानां भूतानामपि गुणाः गंधादयः उत्कर्षं अतिशयं पुपुषुः अतो ऽस्मिन् तस्मिन् रघौ नाम नवे महीपाले सति सर्वं नव
मिव जातं न तु निवाभवत् तदेव भूतजातं इदानीं अपूर्वगुणयोगात् नवं इवाभवदिति भावः ११ यथेति यथा चंद्रः प्रह्लादनादाह्लादनात् चंद्रः चंदि
धातोरौणादिको रक्प्रत्ययः अह्लादको ह्लादकरणाद् अन्वर्थः अनुगतार्थनामको ऽभूत् यथा च तथा च तपतीति तपनः सूर्यः नंद्यादित्वात् ल्युप्रत्ययः
प्रतापात् संतापजननाद् अन्वर्थः तथैव राजा प्रकृतिरंजनाद् अन्वर्थः सार्थकः राजशब्दो ऽभूत् यद्यपि राजशब्दो राजतेर्दीप्त्यर्थात् कनिन् प्रत्ययांतो न तु रंजेः त
थापि धातूनामनेकार्थत्वाद्रंजनाद्राजेत्युक्तं कविना १२ काममिति विशाले तस्य रघोः लोचने कामं कर्णांतयोर्विश्रांते कर्णसमीपप्राप्ते चक्षुष्मत्ता तु चक्षुष्मत्त्वं तु पुनः

पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ११ यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा तथैव सोऽभूदन्वर्थो रा पा॰ २
जा प्रकृतिरंजनात् १२ कामं कर्णांतविश्रांते विशाले तस्य लोचने चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना १३ लब्धप्रशमनस्वस्थमथैनं समु
पस्थिता पार्थिवश्रीर्द्वितीयेव शरत्पंकजलक्षणा १४ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः १५

फलं विमर्द

सूक्ष्मान् कार्यार्थान् कर्तव्यार्थान् दर्शयति प्रकाशयतीति सूक्ष्मकार्यार्थदर्शिना शास्त्रेणैव शास्त्रदृष्टिर्विवेकिनामिति भावः १३ लब्धेति अथ लब्धे सप्त
ज्यस्य प्रशमितेन परिपंथिनामनुरंजनप्रतीकाराभ्यां स्थिरीकरणेन स्वस्थं समाहितचित्तं एनं रघुं कमलेक्षणा पंकजचिह्ना श्रियो ऽपि विशेषणमेतत् शारदीया
पार्थिवश्रीः राजलक्ष्मीरिव समुपस्थिता प्राप्ता १४ निर्वृष्टेति निःशेषं वृष्टा निर्वृष्टाः कर्तरि क्तः अत एव लघवस्तैर्मेघैर्मुक्तवर्त्मा त्यक्तमार्गः अत एव सुदुःस
हः तस्य रघोः भानोश्च प्रतापः पौरुषमातपश्च प्रतापौ पौरुषातपयोरिति यादवः युगपद्दिशो व्यानशे आप ॥१५॥ श्रीनिर्विघ्नमस्तु ॥ ॥

35

सेत्यनिस्सरस्वती वाग्मिप्रमादः परिकल्पितेति सरस्वती काले काले सर्वेष्वपि योग्यकालेषु नित्यं वा श्लोरिति वीप्सायां द्विर्वचनं वंदिषु स्तुतिपाठकेषु परिकल्पितं सां
सांनिध्यात कृतसांनिध्या सती स्तुत्यं स्तोतुमर्हं रघुं अर्थ्याभिरर्थादनपेताभिः धर्मपथ्यर्थन्यायादनपेते इति यत्प्रत्ययः स्तुतिभिः स्तोत्रैः उपतस्थे देवतावु
पास्य सहि तत्सेवितवतीत्यर्थः देवतार्चनादेवमुपस्थानं पिवापतिरिति वा लोकपालान्कृत्वा इत्यनुसंधेयं संगसंगति उपाद्देवपूजासंगति
करणमित्रकरणपथिष्विति निवक्तव्ये नात्मनेपदे इति भवति ६ मनुरिति मनुप्रभृतिभिर्मान्यैः पूज्यैः राजभिः भुक्ता यद्य
पि भुक्तेत्यर्थः यद्यपीत्यवधारणे अप्यर्थे यदि वा यथार्थमादितिकेत्रावः तथापि तस्मिन् रघौ वसुंधरा अनन्यपूर्वेव न भवतीत्यनन्यपूर्वा अनन्यपूर्वा

परिकल्पितसांनिध्या काले काले च वंदिषु। स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ६ मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः। तथाप्यन
न्यपूर्वेव तस्मिन्नासीद्वसुंधरा ७ स हि सर्वस्य लोकस्य युक्तदंडतया मनः। आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ८ मंदोत्कंठाः कृतास्तेन गुणा
धिकतया गुरौ। फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ९ नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं। पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः १० प्रभुते वासीत् तस्य

प्रथमपतिके वानुरक्तवतीत्यर्थः ७ अत्र कारणमाह स हीति यस्मात्कारणात् स रघुः युक्तदंडतया यथापराधदंडतया सर्वलोकस्य मन आददे हृतवान् कथ
मिव अतिशीतोष्णो अनतिशीतोष्णः नभस्वानिव नातिशीतोष्ण इति नञर्थस्य नशब्दस्य सुप्सुपेति समासः दक्षिणो दक्षिणादिग्भवो नभस्वान् वायुरिव मलयानिल इत्यर्थः
युक्तदंडत्वे तीक्ष्णदंडः उद्वेजयति तीक्ष्णदंडो हि भूतानामुद्वेजनीयो मृदुदंडः परिभूयते दंडेन नयति तस्मात् युक्तदंडः अप्राप्यमनुक्तं ८ मंदेति तेन रघुणा प्रजाः गुणादिलक्षितविषयस
त्कारोत्कंठितासः वत आम्रमंजरीनामोत्सलोत्कटकारोति सो प्रथमः तस्य फले न पुष्पोद्गमे पुष्पोदय इव नतो पितुर्गुणाधिकतया हेतुना मंदोत्कंठाः अल्पोत्सुकाः
कृताः गुणानुरागउत्तरो विषयः पूर्वविषयापयतीति भावः ९ नयेति नयविद्भिर्नीतिज्ञैर्नवे राज्ञि विषये तमधिकृत्य सत् पूर्वमुपादिकं असत्कृत्य उप

प्रससादेति महौजसः कुंभयोनेरगस्त्यस्य अगस्त्यः कुंभसंभव इत्यमरः उदयादंभः प्रससाद प्रसन्नं बभूव महौजसो रघोरुदयादभिभवाशंकि द्विषतां मनः चुक्षुभे कालुष्यं
प्राप अगस्त्योदये जलानि प्रसीदंतीत्यागमः २१ मदेति मदोदग्रा मदोद्धताः ककुदेषामस्तीति ककुद्मंतः महांतः कुदद्म्यर्थः दुःखादित्वान्मत्वास्सवत्वाभावः सरितां कू
लानि उद्रुजंतीति कूलमुद्रुजाः उदि कूले रुजिवहोः इति खश्प्रत्ययः अरुर्द्विषदित्यादिनामुमागमः महांतः उक्षाणो महोक्षाः अचतुरेत्यादिना निपातनादकारांतत्वं लीलो
खेलं विलाससुभगं तस्य रघोः उत्साहवतो वपुष्मतो दुष्प्रभंजकस्य विक्रमं शौर्यमनुप्रापुः अनुचक्रुः २२ प्रसवैरिति मदस्येव गंधो येषां तैर्मदगंधिभिः उपमानेति समासो
तकोशः सप्तपर्णानां वृक्षविशेषाणां प्रसवैः विशालत्वक् शारदो विषमच्छद इत्यमरः प्रसवैः पुष्पैराहताः तस्य रघोर्नागाः गजाः गजेपि नागमातंगावित्यमरः। असूय
येवशाहता निमित्तया स्वयमिव सप्तधैव प्रसुस्रुवुः मदं ववृषुः प्रतिगजगंधाभिमानादिति भावः करात्कटाभ्यां मेढ्राच्च नेत्राभ्यां मदस्रुतिपालकाव्ये कतत्वा सारंगा

तस्य गोप्तुर्गुणोदयं सांख्यसलिनिपातिनो ... संवादिभिः कंठैः शालिगोप्यो जगुर्यशः २१ प्रससादोदयादंभः कुंभयोनेर्महौजसः रघोः परिभवाशंकि चुक्षुभे
द्विषतां मनः २१ मदोदग्राः ककुद्मंतः सरितां कूलमुद्रुजाः लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं २२ प्रसवैः सप्तपर्णानां मदगंधिभिराहताः असूययेव तन्
नागाः सप्तधैव प्रसुस्रुवुः २३ सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् २४ तस्मै सम्यग्घुतो वह्निर्वाजिनीराज
नाविधौ प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ २५ स गुप्तमूलप्रत्यंतः शुद्धपार्ष्णिरयान्वितः षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया २६ ध्यानित्यर्थः २३॥

सरित इति सरितो गाधाः सुप्रतराः कुर्वती पथो मार्गान् अश्यानकर्दमान् शुष्कपंकान् कुर्वती संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं शरदृतुः॥
तं रघुं शक्तेः उत्साहशक्तेः प्रथमं प्राक् यात्रायै दंडयात्रायै चोदयामास प्रभुमंत्रोत्साह संपन्नस्य शरत्सु प्रेरणमुत्साहमुत्पादयामासेत्यर्थः २४ तस्मा इति वाजिनामश्वा
नां नीराजनाविधौ नीराजनाख्ये शांतिकर्मणि सम्यक्विधिवद्धुतो होमसमिद्धो वह्निः अग्नौ प्रदक्षिणं प्रदक्षिणा अर्चिर्व्याजेन ज्वालाव्याजेन हस्तेनेव जयं ददावित्यर्थः
स्य व्याजेन हस्तेनेव तस्मै जयं ददौ उक्तं महाभारते इत्थं प्रदक्षिणगतो हुतभुक् नगस्य ... समुद्रवसनां वसुधां करोतीति इति वाजिनीराजनाविधौ प्रदक्षिणार्चिः २०॥
तेषामपि नीराजनाविधानात् २५ स इति गुप्तं मूलं स्वनिवासस्थानं प्रत्यंतः प्रांतदुर्गं येन स गुप्तमूलप्रत्यंतः शुद्धपार्ष्णिरयान्वितः सेनया रक्षितः पृष्ठदेशो वा ...

36

वार्षिकमिति इन्द्रो वर्षासु भवं वार्षिकं वर्षाभ्यष्ठगिति ठक्प्रत्ययः धनुः संजहार रघुर्जैत्रं जयशीलं जेतृशब्दात्तृन्नंतात्प्रज्ञादि[illegible]त्स्वार्थे प्रत्ययः धनुर्दधौ हि यस्मात्ताविंद्ररघू प्रजानामर्थस्य प्रयोजनस्य वृष्टिविजयलक्षणस्य साधने विषये पर्यायेणोद्यते कार्मुके याभ्यां तौ पर्यायोद्यतकार्मुकौ । पादानंतरं पर्यायेणोद्यमो विग्रहमध्य पर्यायोद्यतौ पर्यायविग्रमो द्वयोः पर्यायकरणादुक्तौ इति भावः १६ पुंडरीकेति पुंडरीकं सिताम्भोजमित्यमरः पुंडरीकमातपत्रं यस्य सः तथोक्तः विकसंति काशानि काशाख्यतृणकुसुमान्येव चामराणि यस्य सः तथोक्तः शरदृतुः पुंडरीकनिभातपत्रेण काशनिभचामरं तं रघुं विडंबयामास अनुकारितवान् तस्य श्रियं पुनः प्राप शोभां संपादयितुं नाशकत्सा श्रीः श्रीरिव दृश्यते इति तात्पर्यम् १७ प्रसादेति प्रसादेन सुमुखे तस्मिन्रघौ विशदप्रभे निर्मलकांतौ चंद्रे च द्वयोरपि विषये तदा च क्षुष्मतां प्रीतिरनुरागः समरसा समस्वादा तुल्यभोक्तेति यावत् रसो गंधरसः स्वादः इति विश्वः आसीत् १८ हंसेति हंसानां श्रेणीषु पंक्तिषु तारासु नक्षत्रेषु कुमुद्वत्सु

अधिज्यमायुधं कर्तुं स[illegible]नुः [illegible]मन्युनो १५ वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ प्रजार्थसाधने तौ हि पर्यायोद्यत-
कार्मुकौ १६ पुंडरीकातपत्रस्तं विकसत्काशचामरः ऋतुर्विडंबयामास न पुनः प्राप तच्छ्रियं १७ प्रसादसुमुखे तस्मिंश्चंद्रे च विशदप्रभे तदा चक्षुष्मतां
प्रीतिरासीत्समरसा द्वयोः १८ हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु विभूतयस्तदीयानां पर्यस्ता यशसामिव १९ इक्षुच्छायानिषादिन्यस्तस्य गोप्तुर्गु-
णोदयं आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः २०

निषेदुः संतीति कुमुद्वंति मुकुंदप्रायेष्वित्यर्थः कुमुद्वान्कुमुदप्राय इत्यमरः कुमुदनड्वेतसेभ्यो ड्मतुप् तेषु वारिषु च तदीयानां रघुसंबंधिनां यशसां विभूतयः संपदः पर्यस्ता इव प्रसारिता इव किमित्युत्प्रेक्षा अन्यथा कथमेषां धावल्यमिति भावः १९ इक्ष्विति इक्षूणां छायासु इक्षुच्छाय छाया बाहुल्य इति नपुंसकत्वं तत्र निषण्णा इक्षुच्छायानिषादिन्यः स्त्रीलिंगया निषादशब्दो छायेति विग्रहः अन्यथा बहुत्वे नपुंसकत्वप्रसंगात् शालीन् गोपायंतीति रक्षंतीति शालिगोप्यः सस्यपालिकाः स्त्रियः कर्मण्यण् टिड्ढाणञित्यादिना ङीप् गोप्तुः रक्षकस्य तस्य रघोः गुणेभ्य उदयमाविर्भावः तद्गुणोदयं गुणोत्कर्षं आकुमारं कुमारानारभ्य कथोद्घातः कथारंभो यस्य तत् कुमारैरपि स्तूयमानमित्यर्थः यशो जगुः गायंति स्म अथवा कुमारस्य रघोः उद्घाताः कथा इंद्रविजयादयः तत आरभ्य आकुमारकथं तत्र आङ्मर्यादाभिविध्योरव्ययीभावः आकुमारकं यशः [illegible] कर्म जातकर्मादि क्रियाविशेषणमेतत् स्यात् प्रयोदात्मनुद्घात आरंभ इत्यमरः आकुमारकोद्घातमिति पाठे कुमारस्य सतस्तस्य कथा [illegible] तदारभ्य यशो जगुरिति व्याख्येयं ॥२०॥

र.टी.मू.
४२

सइति महतीं सेनां पूर्वसागरगामिनीं कर्षन् स रघुः हरजटाभ्रष्टां गंगां आ कर्षन् सापि पूर्वसागरगामिनी भगीरथ इव बभौ भगीरथो नाम
कश्चित् कपिलदग्धानां सागराणां नप्तॄणामुद्धरणाय हरकिरीटाद् गंगां अवतारयामास तद्वंशजत्वाद् गंगा च भागीरथीति गीयते ३२ त्याजितै
रिति फललाभमुत्खातैः स्वपदाद् भ्रंशितैश्च त्याजितैः स्वेनैव त्याजितैः कर्मसाध्यैः उत्खातैः स्वपद[illegible]बिनैरस्वतन्त्रीकृतैर्बहुधाम
ग्नैः रणे जितैः तस्य नृपैः पादपैरिव गजस्येव तस्य पंथा मार्गः उल्बणः प्रकाशः आसीत् प्रकाशं प्रकटं स्पष्टमुल्बणं विशदं स्फुटमिति या
दवः ३३ पौरस्त्यानिति जयी जयनशीलः जिद्दृक्षि विश्रि इत्यादिना इनि प्रत्ययः स रघुः एवं पुरोभवान् पौरस्त्यान् प्राग्भवान् दक्षि
णापश्चात्पुरस्त्यगिति त्यक् प्रत्ययः तांस्तान् सर्वान् जनपदान् देशान् आक्रमन् तालीवनैः श्यामं
स सेनां महतीं कर्षन् पूर्वसागरगामिनीं बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३२ त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः तस्यासीदुल्बणो मा
र्गः पादपैरिव दन्तिनः ३३ पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी प्राप तालीवनश्याममुपकण्ठं महोदधेः ३४ अनम्राणां समुद्धर्तुस्तस्मा
त्सिंधुरयादिव आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीं ३५ वंगानुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्तम्भान् गंगा
स्रोतोन्तरेषु सः ३६ इत्येकपंक्तेः उपकंठमिति कंठस्य समीपमुपकंठं प्राप ३४ अनम्राणामिति अनम्राणां प्रह्वीभावशून्यानां समुद्धर्तुरुन्मूलयितुस्तस्मात् रघोः सकाशात् भी
तार्थानां भयहेतुरिति अपादानात् पंचमी सिंधुरयात् नदीवेगादिव सुह्मैः सुह्मदेशीयैः सुह्मादयः शब्दा जनपदवचनाः स्त्रियप्रमाणेन वैतसेन
संबंधिनी वृत्तिः प्रणतिरित्यर्थः आश्रित्य आत्मा संरक्षितः प्रबलेन वृत्तिः बलीयसाभियुक्तो वैतसीं सर्वत्रानुपूर्वाणां ते नसधर्ममतिष्ठेनतः इति ३५
वंगानिति नेता नायकः स रघुः नौभिः साधनैरुद्यतान् सन्नद्धान् वंगान् राज्ञः तरसा बलेन तरसा बलं रंहः ता इत्यमरः उत्खाय उन्मूल्य गंगायाः स्रो
तसां प्रवाहाणां अन्तरेषु द्वीपेषु जयस्तम्भान् निचखान स्थापितवानित्यर्थः ३६ श्रीगुरुचरणकमलेभ्यो नमः श्रीनिर्विघ्नमस्तु श्रीगणेशाय नमः॥

37

सर्ग ४
श्री ३
सर्ग
४२

अवाकिरन्निति वयसा वृक्षाः पौरयोषितः नेरसुं प्रयातं लाजैर्मेदकोज्जृतैः पुष्पैः किं तुभि श्रीरोर्मयः क्षीरसमुद्रोर्मयः अस्तु तं विलुभिया वाकिर
न्नपर्यस्यन् ३१ सहति प्राचीनवर्हिनामकं भिन्नसारामहति केचित् इंद्रः पूर्वं न्योमघवा नृपाकरिरूपैः प्राचीनवर्हिस्तथेत्यीड्यपर्याये गुरुलाघु
धानिरूपनात् तेनतुल्यः सरघः आनिलेनानुकूलेनवातेनोर्धूतैः केतुभिर्ध्वजैः अङ्कितान् शिवनूतनं यत्निवभः सयत्निव तर्जिमत्येव खुदान्
लेपितपदिञ्जेजि लाररतोमातुरांतेत्वनिमित्तस्यात्मजेयदस्यानिरपेत्वज्ञायनात्स्वमिपदर्भिलिवामनेः प्रथमप्राचीदिशंययौ ३० रजोभिरिति किंकुर्वं
न्स्पंदनोद्भूतैः रजोभिर्घनसन्निभैर्वर्षान्तः क्षितेः परितमतद्गमेपगुल्यैर्गडेयपयाक्रमे योमव्याकाशंभुवस्तलमिवमतलं वेयोमेवकुर्वन्नुपयवि
लिप्रवैलासंबंधः ३१ प्रतापइति अथेप्रतापस्तेजोविशेषः सप्रभावः प्रतापप्रभावतेजः कोशदंडजमित्यमरः ततः शब्दस्तेना कलः तदनंतरं परशो

अवाकिरन्वयो वृक्षास्तं लाजैः पौरयोषितः पुष्पैर्मेदोद्धुतैः क्षीरोर्मयइवाच्युतं ३० सपयौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा अहिता
ननिलोधूतैस्तर्जयन्निव केतुभिः ३८ रजोभिः स्यंदनोद्धूतैर्गजैश्च घनसन्निभैः भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलं ३१ प्रता
पोग्रेततः शब्दः परागस्तदनंतरं ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ३२ मरुपृष्ठान्युदंभांसि नाव्याः सुप्रतरा नदीः विपिनानि प्रकाशा
नि शक्तिमत्त्वाच्चकार सः ३३ स सेनां महतीं कर्षन्पूर्वसागरगामिनीं बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३३ — धूलिः परागः

पुनरजसि धूलिरत्नानीयपरवीतिविश्वः पश्चाद्रथाश्वादिरथाश्वादिकंचतुरंगबलंइतीदंचतुःस्कंधेवचतुर्भागेव स्कंधप्रकांडेकायेसेविभ्रनादिषु
फेत्तु भयसमूहे वपूंहेवमिति मः सावमूर्पेः सेनानीकमितिपांश्चलिर्धाधाचाराशेरत्येन्य ३ म विति सरघुः शक्तिमत्वात्समर्थत्वात् मरुपृष्ठानि
जलस्थानानि शमानोमरुधन्वा नाविस्यमरः उदंभांसि उद्गतजलानि चकार नाव्याः नौभिस्तार्या नदीः नाव्यंत्रिलिंगेनौतार्ये इत्यमरः नौवयोविषम
तेत्यादिनायत्प्रत्ययः सुप्रतराः सुखेनतार्याः काननविपिनानिप्रकाशानि अटव्यरण्यंविपिनंकाननंगहनंवनमित्यमरः प्रकाशानिवृक्षाणिचकार
नतस्यागम्यं किमपि नासीत्यर्थः ॥३१॥३२॥
श्रीगुरुचरणकमलेभ्यो नमः श्रीनिर्विघ्नमस्तु ॥:॥

तांबूलीनामिति तत्र मर्त्यज्ञातेषु पुष्पं नेइति योधाः यवासवः रचिताः कल्पिताः आपानभूमयः पानप्रदेशाः येषां ते तथोक्ताः संतः नारिकेलासवं
नारिकेलमयं तांबूलीनां नागवल्लीनां दलैः पपुः अयुविनम्रहृत्सवर्णः शात्रवं शत्रुसंबंधि यशश्च पपुः हृतवन्तः ४३ गृहीतेति धर्मविजयी धर्मार्थं विजयशीलः
सन्नृपः रघुः गृहीतश्चासौ प्रतिमुक्तश्च तस्य महेंद्रनाथस्य कालिंगस्य श्रियं जहार धनमेव जहार न तु मेदिनीं जहार शरणागतवात्सल्यादितिभा
वः ४४ तत इति ततः प्राचीविजयानंतरं फलवत्पूगमालिना फलितक्रमुकश्रेणिमता श्रीत्यादि नादेतिग्रस्तवः वेलायाः समुद्रकूलस्य तटेना
पांत्येन मार्गेण ना सुरितामाशां दक्षिणां दिशं अनाशास्यजयः अयत्नसिद्धत्वादप्रार्थनीयो जयो यस्य स तथोक्तः सन् ययौ अगस्त्याचरितामाशामनाशास्यजयो ययाविति
स्थितः वक्तव्यं ... नापि मर्दने इति जयस्तुरतो ४५ स इति स रघुः गजानां दानेन मदेन सुगंधिना सुरभिगंधिना गंधस्येत्त्वेद

तांबूलीनां दलैस्तत्र रचितापानभूमयः नारिकेलासवं योधाः शात्रवं च पपुर्यशः ४३ गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः श्रियं महें-
द्रनाथस्य जहार न तु मेदिनीं ४४ ततो वेलातटेनैव फलवत्पूगमालिना अगस्त्याचरितामाशामनाशास्यजयो ययौ ४५ स सैन्यपरि-
भोगेन गजदानसुगंधिना कावेरीं सरितां पत्युः शंकनीयामिवाकरोत् ४६ बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः मरीचोद्भ्रांत-
हारीता मलयाद्रेरुपत्यकाः ४७

नादिकारादेशः समासांतः यद्यपि गंधस्येत्वे तदेकांतग्रहणं कर्तव्यमिति नैसर्गिकगंधविवक्षयामेवइ-
कारादेशात्तथापि निरंकुशाः कवयः तथा माघकाव्ये ... दुगुह्यसुगंधयः स्वनगास्तेगानाभिरोलिभिः नैषधेच ... प्रायेण
वातिधाराः स्वादुः सुगंधिः स्वदतेतुषारेति न कर्मधारयान्मत्वर्थीय इति निषेधादिनिप्रत्ययपक्षे प्रिजघन्य एव सेनायां समवेताः सैन्याः सेना
यां समवेता ये सैन्यास्ते सैनिकाश्चेत्यमरः सेनायां समवेतापत्ययः सैन्यानां परिभोगेन उपभोगेन कावेरीं नाम सरितं सरितां पत्युः समुद्रस्य शं
कनीयामविश्वसनीयां मिवाकरोत् संभोगलिंगदर्शनादर्थांतरविश्वासामवतीतिभावः ४६ बलैरिति विजिगीषोर्विजेतुमिच्छोर्गताध्वनस्तस्य रघो
र्बलैः सैन्यैः बलं शक्तिर्बलं सैन्यमिति यादवः मरीचेषु मरीचवनेषु उद्भ्रांताः परिभ्रांताः हारीताः पक्षिविशेषा यासु ताः तथोक्ताः हारीता मरुत्
ंडवः प्लव इत्यमरः मलयाद्रेरुपत्यकाः आसन्नभूमयः उपत्यकाद्रेरासन्ना भूमिरित्यमरः उपाधिभ्यां त्यकन्प्रत्ययः अध्युषिताः उपत्यकासु मितमित्यर्थः

38

एवं मुपता: अपि प्रतिरोपिताः पश्चात्स्थापिताः ते वंगाः कलमा इ
आपादपप्रणता इति आपादपर्यन्तं प्रणता नम्रा उत्खाताः प्रथमं उद्धृताः अपि प्रतिरोपिताः पश्चात् स्थापिताः तेवंगाः कलमाः
वकालिविशेषा इव शालयः कलमाद्याश्च हेमन्ताः पुंसि स्त्यमरः ते पि आपादपर्यन्तं मूलपर्यन्तं पादो बुध्न तुरीयांशशैलप्रत्यन्त
पर्वतेषु इति विश्वः उत्खातप्रतिरोपितत्वात् रघुं फलैः धनैः निश्च संवर्धयामासुः फलं फले धने बीजे निष्पत्तौ भोगलाभयोः सस्ये इति केश
वः भूलसति सरपुर्व्यः विन्ध्याद्रवसेतवो पिलेः सैन्यैः कपिशां नाम नदीं तीर्त्वा उत्कलैः देशविशेषैः उत्कलैः राजभिः दर्शितपथः सं
ज्ञितमार्गः सन् कलिंगाभिमुखो ययौ ३८ स इति सरवभिंद्र सकुलपर्वतं विश्रवास्य महेंद्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः विंध्यश्च पारि सा॰
यात्रश्च सप्तात्र कुलपर्वता इति विष्णुपुराणात् मूर्ध्नि शिरसि सह्याद्यपरभोगपर्यन्तं विश्रवयस्य भूमिंहानि तेजो कु

आपादपप्रणताः कलमा इव ते रघुं फलैः सं
[illegible]
वर्धयामासुरुत्खातप्रतिरोपिताः ३७ स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः उत्कलादर्शितपथः कलिंगाभिमुखो ययौ ३८ स प्रता
पं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् अंकुशं द्विरदस्येव यन्ता गंभीरवेदिनः ३९ प्रतिजग्राह कालिंगस्तमस्त्रैर्गजसाधनः पक्षच्छेदोद्यतं
कु१ शक्रं शिलावर्षीव पर्वतः ४० द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनं सन्मंगलस्नात इव प्रतिपेदे जयश्रियं ४१ वायव्यास्त्रविनिर्धूतात्पक्षा
विपक्षमेघात् गजानीकात्कालिंगो नाश्यैः सर्पविवादिदं ४२ भामिवन्यवेशायत निर्विवेचान् स्वयं दद्ध श्रोणि तस्मात् नमांसस्य वनादपि ॥

आलानं बन्धनस्तंभं नातितस्मात् गंभीरवेदिनेति राजपुत्रीयच्चिकाले नेयोवितिशिक्षां पोषितनावपि गंभीरवेदी विक्षेपः सन्नो गजे वेदि मितिनिष्कृघमीये ३९
प्रतीति गजसाधनः सन्कालिंगः कलिंगानां राजा पक्षच्छेदोद्यतं शक्रमस्त्रैः प्रत्युद्यत इव अस्त्रैः राघुं शिलारिपुः कैस्ताणांलेदः पुष्ठे शिलावर्षीपर्वत इव
प्रतिजग्राह अभियुक्तवान् ४० द्विषामिति काकुत्स्थो रघुः तत्र महेंद्रे द्विषां नाराचदुर्दिनं नाराचानां बाणविशेषाणां दुर्दिनं जलदश्वात् वर्षं विषह्य सोढ्वा ते विषय
सहित्वा सन्मंगलस्नानं विजयमंगलार्थमभिषिक्त इव जयश्रियं प्रतिपेदे प्राप यद्वुन्मवीवराजस्नानं तन्मंगलस्नानं रोचकमिति यादवः ४१ ४२

असह्येति उदकानि अस्य संतीति उदन्वान् समुद्रः उदन्वानुदधौ चेति निपातः उदन्वता दूरान्मुक्तं दूरमुत्सृष्टं स्रस्तांशुकमिव दरार्थक स्रस्तांशुके।
नेति समासः पंचम्याः स्तोकादिभ्यश्चेत्यलुक् स्रस्तांशुकं मेदिन्या नितंबमिव स्थितं तं सह्यमसह्यविक्रमो रामः अलंघयत् अतिक्रांतवान् ५२ तस्येति २
तीर्णादिशं अभियियासोः तस्येति अपरांतानां पाश्चात्यानां जये उद्यतैः उद्युक्तैः अपरांतास्तु पाश्चात्यास्ते च शूर्पारकादयः इति यादवः॥
विसर्पद्भिः गच्छद्भिः तस्य रघोरनीकैः सैन्यैः अनीकस्तु रणे सैन्ये इति विश्वः अर्णवो रामस्य जामदग्न्यस्य अस्त्रैः उत्सारितोऽपि अपसारितोऽपि सह्यलग्न इ
वासीत् सैन्यं स्थितीयोर्णवस्तूयत इति भावः ५३ भयेति तेन रघुणा भयेनोत्सृष्टविभूषाणां परिहृतभूषणानां केरलयोषितां अलकेषु चमू
रेणुः सेनारजः चूर्णस्य कुंकुमादिरसस्य प्रतिनिधीकृतः स्थानेऽयोजितः पलायने च स्नानं च तेऽनुधावनं च स्त्रमित्यर्थः ५४ मुरलेति मुरला नाम

असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता नितंबमिव मेदिन्याः स्रस्तांशुकमलंघयत् ५२ तस्यानीकैर्विसर्पद्भि-
रपरांतजयोद्यतैः रामास्त्रोत्सारितोप्यासीत्सह्यलग्न इवार्णवः ५३ भयोत्सृष्टविभूषाणां तेन केरलयो-
षितां अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥५४॥ मुरलामारुतोद्धूतमगमत्कैतकं रजः तद्योधवारवाणाना-
मयत्नपटवासतां ५५ अभ्यभूयत वाहानां चरतां गात्रशिंजितैः वर्मभिः पवनोद्धूतराजतालीवनध्वनिः॥५६॥

मकेरलदेशेषु काचिन्नदी मुरलीति केचित्पठंति तस्या मारुतेनोद्धूतं उत्थापितं केतकानां इदं कैतकं रजः तद्योधवारवाणानां रघुभ-
टकंचुकानां कंचुको वारवाणोऽस्त्रीत्यमरः अयत्नपटवासतां अयत्नसिद्धपटवासतां अगमत् पिष्टातः पटवासक इत्यमरः
५५ अभ्यभूयतेति चरतां गच्छतां वाजिनां वाहानां वाजिवाहार्वगंधर्वहयसैंधवसप्तयः इत्यमरः गात्रशिंजितैः गात्रेषु शब्दायमा-
नैः कलैरित्यर्थः शिंजितैरिति पाठः सृजते कर्मणि क्तः वर्मभिः कवचैः पवनेनोद्धूतानां कंपितानां राजतालीवनानां ध्वनि-
रभ्यभूयत तिरस्कृतः॥०॥५६॥०॥ ० ॥०॥श्रीनिर्विघ्नमस्तु रामा॥०॥ ० ॥०॥०॥श्रीगुरुचरणकमलेभ्यो नमः॥०॥

39

ससञ्जुरिति । अश्वैः क्षुण्णानां मर्दितानामेलानामेलालतानामुत्पतिष्णव उत्पतनशीलाः अलंकृञि इत्यादिना इष्णुच्प्रत्ययः फलरेणवः फलरजां-
सि तुल्यगन्धिषु समानगन्धेषु सर्वधनीति वृद्धिन तो वकृशीहः मत्तेभानां कटेषु गण्डेषु ससञ्जुः सक्ताः गजगण्डे कटिः कटाविल्यमरः ४८ भोगी-
ति चन्दनानां चन्दनद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनानां निम्नेषु समर्पितं संजितं त्रिपदीछिदिनां पादशृङ्खलच्छेदकानामपि त्रिप-
दीपादबन्धनमिति यादवः करिणां ग्रैवं ग्रीवाबन्धनमिति ग्रीवाभ्योऽणुप्रत्ययः नास्रंसत न स्रस्तं अभ्रंशत् घट्येलड्डीति परस्मै-
पदे पुषादित्वादङ् अनिदितामित्यादिना नकारलोपः ४९ दिशीति दक्षिणस्यां दिशि रवेरपि तेजो मन्दायते मन्दं भवति लोहितादित्वात्क्यष्

ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः । तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४८ ॥ भोगिवेष्टनमार्गेषु चं-
दनानां समर्पितं । नास्रंसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ॥ ४९ ॥ दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि । त-
स्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ५० ॥ ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः । ते निपत्य ददुस्तस्मै यशः
स्वमिव संचितं ॥ ५१ ॥ स निर्विश्य यथाकाममतटेष्वालीनचन्दनौ । स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ५२ ॥

प्रत्ययः वाक्यप्रदृश्यात्मनेपदं दक्षिणायने तेजोमान्द्यादिति भावः तस्यामेव दिशि पाण्ड्याः पाण्डूनां जनपदानां राजानः पाण्ड्याः पाण्डोर्ड्यन् वक्त-
व्यः रघोः प्रतापं न विषेहिरे न सोढवन्तः सर्वविजयिनोऽपि विजिता इति निविनाय कस्य महानुत्कर्षो गम्यते ५० ताम्रपर्णीति ते पाण्ड्याः ताम्रपर्ण्या न-
द्या समेतस्य संगतस्य महोदधेः संबंधि संचितं मुक्तासारं मौक्तिकवरं सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिष्वित्यमरः स्वस्य कीयं संचितं यश इव त-
स्मै रघवे निपत्य प्रणिपत्य ददुः यशसः शुभ्रत्वादेषम्यं ताम्रपर्णीसंगमे मौक्तिकोत्पत्तिरिति प्रसिद्धं ५१ स इति असपीति पुरस्मतं अस-
प्रविक्रमः स रघुः तटेषु सानुप्रदेशेष्वालीनचन्दनौ व्याप्तचन्दनौ चन्दनानुलेपौ तस्या दक्षिणस्या दिशः स्तनाविव स्थितौ मलयदर्दुरौ नाम शैलौ यथा-
कामं यथेच्छं निर्विश्य उपभुज्य निर्वेशो भृतिभोगयोरित्यमरः ॥ ५२ ॥ श्रीगुरुचरणकमलेभ्यो नमः श्रीनिर्विघ्नमस्तु श्रीगणेशाय नमः ॥

यवनीति सरघुः यवनीनां यवनस्त्रीणां जातेरस्त्रीविषयादिति ङीप् मुखानि पद्मानीव मुखपद्मानि उपमितसमासः तेषां मधुना मद्येन यो मदो मदरागः कार्यकारणभावयोरभेदेन निर्देशः तं न सेहे कथमिव अकाले प्राप्तव्यातिरिक्तकाले जलदोदयः प्रावृड्विपन्नविकाशस्याप्रसक्तत्वादब्जानां संबन्धिनं बालातपमिव अत्र च्वहितत्वादुपसंदेधित्वं सोढः तपस्य ह संग्राम इति तस्य रघोरश्वसाधनैः पश्चात्त्यैः पाश्चात्यैर्यवनैः सह शार्ङ्गाणां धनुषां कूजितैः शब्दैर्विज्ञेया अनुमेयाः प्रतियोधाः प्रतिभटाः यस्मिं ॥ कारा शार्ङ्गाणि धनूंषि तेषां कूजितैः अथवा शार्ङ्गैः शृङ्गसंबन्धिभिः कूजितैः विज्ञेयाः अनुमेयाः प्रतियोधाः प्रतिभटाः यस्मिं

यवनीमुखपद्मानां सेहे मधुमदं न सः । बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥ संग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः । शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥ भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् । तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥ अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः । प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४ ॥

न्तस्मिन् रज सि तुमुलः संग्रामः संकुलं युद्धमभवत् तुमुलं रणसंकुलमिति विश्वः ॥ भल्लेति सरघुः भल्लापवर्जितैर्बाणविशेषकृत्तैः स्फुरीदलपक्षोमत इतियादवः श्मश्रुलैः प्रवृद्धमुखरोमवद्भिः सिध्मादित्वाल्लच्प्रत्ययः तेषां पाश्चात्यानां शिरोभिः सरघाभिर्मधुमक्षिकाभिर्व्याप्तैः सरघा मधुमक्षिका इत्यमरः क्षुद्राः सरघाः क्षुद्राभ्रमरी नदी वेर्ष्या सरघा कटकाविकेत्यमरः शाश्वतो क्षुद्राभिः कृतानि क्षौद्राणि मधूनि क्षौद्रं मधुनि पानीयेऽप्यम रः क्षुद्राभ्रमरवटरपादपान्नित्यसंज्ञायामञ्प्रत्ययः तेषां पटलैस्तवकैरिव महीं तस्तार छादयामास ॥ अपनीतेति शेषाः हतावशिष्टाः अपनीत शिरस्त्राणाः अपसारितशीर्षण्याः सन्तः शरणास्त्रकर्तव्यं तं रघुं शरणं ययुः तथाहि महात्मनां संरम्भः संक्षोभः प्रणिपातः प्रणतिरेव प्रतीकारो ... स्यास्तीति प्रणिपातप्रतीकारः रघु ५५

खर्जूरीति॥ खर्जूरीणां तन्नामकवृक्षविशेषाणां खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमा इत्यमरः। स्कंधेषु कांडेषु अस्त्री
प्रकांडः स्कंधः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः नद्धानां बद्धानां करिणां मदोद्गारेण मदस्रावेण सुगंधिषु गंधवत्सु।
दिना इकारः कटेषु गंडेषु पुन्नागेभ्यः नागकेसरेभ्यः पुंनागपुष्पाणि विहायत्यल्पलोपे पंचमी शिलीमुखाः अलयः पेतुः अ
लिबाणौ शिलीमुखावित्यमरः तत्रोपि सौगंध्यातिशयादिति भावः ५७ अवकाश इति उदन्वान् उदधिः रामाय जामदग्न्याय अ
भ्यर्थितः याचितः सन् अवकाशं स्थानं ददौ रघवे तु अपरांतमहीपालव्याजेन करं बलिं ददौ बलिहस्तांशवः करा इत्यमरः

खर्जूरीस्कंधनद्धानां मदोद्गारसुगंधिषु कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ५७ अवकाशं किलोदन्वान् रामाया
भ्यर्थितो ददौ अपरांतमहीपालव्याजेन रघवे करं ५८ मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणं त्रिकूटमेव तत्रोच्चैर्जयस्तंभं
चकार सः ५९ पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना इंद्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ६०

अपरांतानां समुद्रमध्यदेश
स्थितत्वे नैकैरेवं समुद्रे दत्तोपचारः करदानं तु भीत्या न तु याच्ञेति रामाद्विशेषः ५८ मत्तेति तत्र स रघुर्मत्तानामिभानां रदनैरुत्कीर्णा
नि दंतक्षतान्येव भावकः व्यक्तानि स्फुटानि विक्रमलक्षणानि पराक्रमचिह्नानि यस्य तं बलिस्थानानि यस्मिन्नेतेन त्रिकूटमेव
उच्चैर्जयस्तंभं चकार गाढमकार्षीत् त्रिकूटाद्रिरेवोत्कीर्णलेखस्तंभ इव बभौ ... ५९ पारसीकानिति ततः स रघुः संयमी यो
गीतत्त्वज्ञानेनेंद्रियाख्यानरीनिव ... पारसीकान् ... स्थलवर्त्मना ... प्रतस्थे ... जलपथेन समुद्रयानस्य नि

वि विशुस्तां विप्रोनाथमुदन्वं नमिवापगा:

कांबोजइति कांबोजाराजनः समरे तस्य रघोर्वीर्यं सोढुमनीश्वराः असमर्थाः संतः गजानामालानं बंधनं भावेलुक्तिविभावाः
द्वीपतेरित्यालं तेन परिक्लिष्टैः परिक्लिष्टैरक्षोटैर्वृक्षविशेषैः सार्धमानताः ७ तेषामिति तेषां कांबोजानां सदश्वभूयिष्ठास्तुङ्गाः
द्रविणानां हिरण्यानां हिरण्यपिण्डविषाणां पुष्पमित्यमरः राशयः उपदा उपायनानि उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः ॥
कोशलेश्वरं रघुं शश्वन्मुहुः मुहुर्मुहुः पुनः शश्वदभीक्ष्णमसकृत्समा इत्यमरः उत्सेकाः गर्वास्तु न विविशुः सम्पदि
गर्वकारणेऽपि गर्वं न प्रापुः ७१ तत इति ततोनंतरं अश्वसाधनः सन् गौर्याः गुरुं पितरं शैलं हिमवंतं उद्धूतैः धातुरेणुभिः गैरिकादीनां रेणुभिः तत्कूटानि शृङ्गाणि कूटोऽस्त्री शिखरं शृङ्गमित्यमरः वर्धयन्निव आरुरोह उत्प्रेक्षा
तद्दर्शनात् दृष्ट्वा

कांबोजाः समरे सोढुं तस्य वीर्यमनीश्वराः गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ७ तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः
उपदा विविशुः शश्वन्नोत्सेकाः कोशलेश्वरं ७१ ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः वर्धयन्निव तत्कूटानुद्धूतैर्धातु
रेणुभिः ७२ शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमं गुहाशयानां सिंहानां परिवृत्यावलोकितं ७३ भूर्जेषु मर्मरीभूताः कीच
कध्वनिहेतवः गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ७४

वरुणावधिमगोजापदेशेरितिभाव ७२ शशंसेति तुल्यसत्त्वानां सैन्यैः समा
नबलानां गुहाशयानां सिंहानां कर्तॄणां परिवृत्यावलोकितं सैन्यघोषेऽपि असम्भ्रमं लोकितं शापिलेवस्त्रीवभुङ्गोनावलोकनं कर्तृ
सैन्यघोषेऽपि न चलनं तस्मात् तेषां ससिंहे असम्भ्रमम् असम्भ्रममेव शशंस अथ सौमविभवेष्टिं नन्वः प्रसश्रुतिवेप्यपि समासः स्यात् शब्दलकुचप
माप सेनेत्यपि त्वर्णसन्धानमायचेष्टितमेव मनो वृत्तस्तुमापकमिति भावः असम्भ्रमस्य हेतुः तुल्यसत्त्वानामिति नहि समबलः समबलाद्बिभेति
तिभावः ७३ भूर्जेष्विति भूर्जेषु भूर्जपत्रेषु भूर्जो भूर्जः मृदुत्वक्चर्मी स्यादिति यादवः मर्मरः शुष्कपर्णध्वनिः मर्मरः शुष्कपर्णानि
तियादवः अथ वेणुप्रमादिशब्दस्तु कुसिमपि वनेनतेषु प्रपेत्सनेव मर्मरेरगरुधयांश्चिमिति अतो मर्मरीभूताः मर्मशब्दं वनोऽपि ताड्यमर्थः कीचका इ

विनयंत इति तस्य रघोर्योधाः भटाः आस्तीर्णान्यजिनरत्नानि चर्मश्रेष्ठानि यासु तासु द्राक्षावलयानां भूमिषु मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति चेत्यमरः मधुभिर्द्राक्षाफलप्रकृतिकैर्मद्यैः विजयश्रमं युद्धखेदं विनयंते स्म अपनीतवंतः कर्तृस्थे चाशरीरे कर्मण्यात्मनेपदं लट् स्मे इति भूतार्थे लट् ॥६६॥ ततइति ततो रघुर्भास्वान् सूर्य इव शरैः उस्रैः किरणैरिव किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः इत्यमरः उदीच्यान् उदग्भवान् नृपान् रसान् उदकानीवोद्धरिष्यन् कौबेरीं कुबेरसंबंधिनीं दिशमुदीचीं प्रतस्थे अनेके वंशादेन मधुपमाय पार्ह्दीलकाने केन शब्दस्मात्सा वाकोमसादिवेनि ॥६७॥ विनीतेति सिंधुर्नामकाश्मीरदेशेषु कश्चिन्नदीविशेषः देशे

विनयंते स्म तद्योधा मधुभिर्विजयश्रमं आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥६६॥ ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशं शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥६७॥ जितान् जय्यस्तानेव कृत्वा रघुः पुरःसरान् महार्णवमिवौर्वाग्निः प्रविवेशोत्तरापथं
नो ॥६७॥ विनीताध्वश्रमास्तस्य सिंधुतीरविचेष्टनैः दुधुवुर्वाजिनः स्कंधाँल्लग्नकुंकुमकेसरान् ॥६८॥ तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमं कपोलपाटलादेशि बभूव रघुचेष्टितं ॥६९॥ नदविशेषे सिंधुर्ना सरित्स्त्रियामित्यमरः सिंधोस्तीरे विचेष्टनै रंगपरिव म
स्या र्त्तनैर्विनीताध्वश्रमास्तस्य वाजिनो अश्वाः लग्नाः कुंकुमकेसराः कुंकुमकुसुमकिंजल्का येषां तान् यद्वा लग्नकुंकुमकेसराः सटाः येषां तान् स्कंधान् दुधुवुः कंपयंति स्म ॥६८॥ तत्रेति तत्रोदीच्यां दिशि भर्तृषु व्यक्तविक्रमं भर्तृवधेन स्फुटपराक्रममित्यर्थः रघुचेष्टितं रघुव्यापारः हूणाः जनपदाः तेषामवरोधाः अंतःपुरस्त्रियः तेषां कपोलेषु पाटलस्य पाटलिम्नः ताडनादिकृतस्य आदेशि उपदेशकं बभूव अथवा पाटलस्यादेशो ज्ञानं तद्भवस्त्वं तेन व्याप्तं तद्रूपमर्थः ॥६९॥ ततः

परस्परेति तेषुगणेषूपायनपुण्याः पाणयो येषां तेषु सत्सु परस्परेणान्योन्यं राज्ञा हिमवतः सारो धनरूपो विज्ञातः हिमाद्रिणाप्य
राज्ञः सारो बलरूपो विज्ञातः एतेन तत्र स्थवस्तूनामर्घ्यत्वं गुणानां भूमस्त्वं पराजय इति ध्वन्यते ८० तत्रेति स रघुः तत्र हिमाद्रावक्षो
भ्यमप्रधृष्यं यशोराशिं निवेश्य पयोनिधाय पौलस्त्येन रावणेन तुलितस्य चालितस्याद्रेः कैलासस्य ह्रियं लज्जामादधानो जनयन्निवावरुरोह
वततार कैलाशमगत्वैव प्रतिनिवृत्त इत्यर्थः नहि शूराः पराजितमभियुंजत इति भावः ८१ चकंपेति तस्मिन् रघौ तीर्णलौहि
त्यानाम नदीयेन तस्मिन् तीर्णलौहित्ये सति प्राग्ज्योतिषाणां जनपदानां ईश्वरः तस्य रघोर्गजानामालानतां प्राप्तैः कालागरुद्रुमैः कालागु
रुवृक्षैः सह चकंपे कंपितवान् ८२ नेति सः प्राग्ज्योतिषेश्वरः रुद्धार्कमावृतसूर्यं अधारावर्षं च तद्दुर्दिनं च धारावृष्टिं विना दुर्दिनं मेघच्छ

परस्परेण विज्ञातस्तेषूपायनपाणिषु राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ८० तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः पौल
स्त्यतुलितस्याद्रेरादधान इव ह्रियं ८१ चकंपे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः तद्गजालानतां प्राप्तैः सह कालागरुद्रुमैः ८२ न प्रसेहे स रु
द्धार्कमधारावर्षदुर्दिनं रथवर्त्मरजोप्यस्य कुत एव पताकिनीं ८३ तमीशः कामरूपाणामत्याखंडलविक्रमं भेजे भिन्नकटैर्नागैरन्यानुपरुरोध
यैः ८४ कामरूपेश्वरस्तस्य हेमपीठाधिदेवतां रत्नपुष्पोपहारेण छायामानर्च पादयोः ८५ इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतं रजो विश्रामयन्
राज्ञां छत्रशून्येषु मौलिषु ८६

रघोः रथवर्त्मरजोपि न प्रसेहे पताकिनीं कुत एव प्रसेहे न कुतोपीत्यर्थः ८३ तमिति कामरूपाणां प्रभुः अत्याखंडला
ममतीद्रपराक्रमं तं रघुं भिन्नाः स्रवन्मदाः कटाः गंडाः येषां तैर्नागैः गजैः साधनैर्भेजे सेवितवानित्यर्थः कीदृशैर्नागैः यैर्नागैरन्यान् रघुव्यतिरि
नुपरुरोध रुरोध अन्यानपि नृपान् रुरोध इति भावः ८४ कामरूपेति कामरूपेश्वरो हेमपीठस्याधिदेवतां तस्य रघोः पादयोः छायां कांतिं अनर्घ्यपादपीठस्याधिदे
वपुष्पाणि तैः उपहारेण समर्पितेन आनर्च अर्चयामास ८५ इतीति जिष्णुः जयनशीलः ग्लाजिस्थश्च ग्स्नुरिति सूत्रमपः स रघुः इति दिशो [illegible]
तं रजः छत्रशून्येषु रघोरेकछत्रत्वादिति भावः [illegible] न्यवर्तत निवृत्तः ८६ ॥श्री[illegible]

42

विशश्रमुरिति सैनिकाः सेनायां समवेताः प्राग्वदत्रीयष्ठक् इत्ययः नमेरूणां सुरपुन्नागानां छायासु निषण्णानां दृषदुपविष्टानां कस्तूरीमृगाणां
नाभिभिर्वासितोत्संगाः सुरभितक्रोडाः दृषदः शिलाः अध्यास्याधिशय्य विशश्रमुर्विश्रान्ताः ७५ सरलेति सरलेषु देवदारुविशेषेषु आसक्तानि
यानि मातंगानां गजानां ग्रैवाणि ग्रैवेयाणि कंठाभरणानि ग्रीवाभ्यो ढञ् चेति ढकारादेशः इत्ययः तेषु स्फुरितत्विषः प्रतिफलितभासः
ओषधयः नक्तं रात्रौ तैलपूरा दीपिकाः नेतुर्नायकस्य रघोरस्नेहदीपिकाः तैलनिरपेक्षाः प्रदीपाः आसन् ७६ तस्येति तस्य रघोरुत्सृष्टेषु
कि तेषु निवासेषु सेनानिवेशेषु कंठरज्जुभिः गजग्रैवेयैः क्षताः त्वचो येषां ते देवदारवः किरातेभ्यो वनेचरेभ्यो गजानां वर्ष्मप्रमा
णं वर्ष्म देहप्रमाणयोरित्यमरः शशंसुः कथितवंतः देवदारुस्कंधलग्नकंठरज्जुचिह्नैर्गजानामौन्नत्यमनुमीयत इत्यर्थः ७७ तत्रेति तत्र हेमा

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः दृषदो वासितोत्संगा निषण्णमृगनाभिभिः ७५ सरलासक्तमातंगग्रैवेयस्फुरितत्विषः आ
५२ सन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ७६ तस्योत्सृष्टनिवासेषु कंठरज्जुक्षतत्वचः गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ७७ तत्र जन्यं रघोर्घो
रं पार्वतीयैर्गणैरभूत् नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ७८ शरैरुत्सवसंकेतान् स कृत्वा विरतोत्सवान् जयोदाहरणं बाह्वोर्गा
पयामास किन्नरान् ७९ हेरेयाः पर्वते भवैः पार्वतीयैः पर्वतात् छ इति छप्रत्ययः गणैः उत्सवसंकेताख्यैः सप्तभिः सह गणा उत्सवसंकेतनाम ८४
यत् सप्त पांडवस्थितिमत्सु भारते नाराचानां बाणविशेषाणां क्षेपणीयानां भिंदिपालानां अश्मनां च निष्पेषैः संघर्षैः उत्पतितोऽनलो यस्मिंस्तत्तथो
क्तं क्षेपणीयो भिंदिपालो लगोडो दीर्घमराफलः स्यात् इति यादवः घोरं भीमं जन्यं युद्धं अभवत् युद्धमायोधनं जन्यमित्यमरः ७८ शरैरिति स रघुः शरैर्वा
णैः उत्सवसंकेतान् नाम गणान् विरतोत्सवान् कृत्वा जितवानित्यर्थः किंनरान् बाह्वोः स्वभुजयोः जयोदाहरणं जयख्यापकं प्रबंधविशेषं गापयामास
गतिबुद्ध्यादिना किन्नराणां कर्मत्वं ॥७९॥०॥ श्रीगुरुचरणकमलेभ्यो नमः ॥०॥ श्रीनिर्विघ्नमस्तु ॥०॥ श्रीगणेशाय नमः ॥०॥ राम ॥०॥

र॰टी॰ ५८ श्रीगणेशायनमः इंदीवरदलश्यामंमिंदिरानंदकंदलं वंदारुजनमंदारं वंदेहंयदुनंदनं १ तमिति विश्वजिति विश्वजिन्नामिय सर्ग ५
ज्ञे। अध्वरे यज्ञः संस्थाध्वरो यागइत्यमरः निःशेषविश्राणितं दत्तं श्रण दाने चुरादिः कोशानामर्थराशीनां जातं समूहोयेन तं तथो
क्तं कोशः स्त्री कुड्मले दिव्ये शाब्दे पीयूषे कोशनाविनिपादवः जातं जनिसमूहयोरितिविश्वः एतेन कौत्सस्यानवसरप्रा
र्थित्वं सूचयति क्षितीशं रघुं उपात्तविद्यो वरतन्तोः शिष्यः कौत्सः कुत्सस्य गोत्रापत्यं पुमान् गुरुदक्षिणार्थी गुरुदक्षिणां वादिमोदेदे
हत्यर्थं संनिहितानंदं ताञ्जेतिहनिः अत्रकाव्यमवतिभावः प्रपेदे प्राप सर्गेऽस्मिन्वृत्तमुपजातिः लक्षणंतु स्यादिन्द्रवज्रायदि
तौजगौगः उपेन्द्रवज्राजतजास्ततोगौ अनंतरोदीरितलक्ष्मभाजौ पादौयदीयावुपजातयस्ताः इतिलक्षणात् १ सइति अनर्घ्य

43

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातं उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः १
समृन्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घ्यशीलः श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः २

शीलः अमूल्यस्वभावः अनर्घ्यमामूल्यं वहुमूल्यं मूल्ये पूजाविधावर्घः शीलं स्वभावे सद्वृत्ते इत्यमरः यशसा प्रकाशते इति यशसा कीर्त्या प्रकाशः इति
प्रकाशः पचाद्यच् अतिथिषु साधुरातिथेयः पथ्यतिथिवसतिस्वपतेर्ढञितिढञ्प्रत्ययः सरघुः हिरण्मयविकारो हिरण्मयं दाण्डिना
यनादिसूत्रेण निपातः वीतहिरण्मयत्वात् अपगतसुवर्णपात्रत्वात् यज्ञस्य सर्वस्वदक्षिणत्वात् इति भावः मृन्मये मृद्विकारे पात्रे
अर्घ्यं अर्घार्थमिदं पादार्घाभ्यां चेति यत्प्रत्ययः पूजार्थद्रव्यं निधाय पक्षे तेन श्रोत्रेण प्रकाशं प्रसिद्धं श्रुतं शास्त्रं वृत्तयोरित्यमरः रा॰
अतिथिमभ्यागतं कौत्सं अतिथिर्ना गृहागते ५८
इत्यमरः प्रत्युज्जगाम ॥२॥

सर्न्ति सरघु: सर्वस्वं दक्षिणा यस्य तं सर्वस्वदक्षिणं विश्वजितं सर्वस्वदक्षिणाद्युक्तिक्रतोः विश्वजितं नाम यज्ञं आजह्रे कृतवानित्यर्थः युक्तं
चैतदित्याह सतां साधूनां वारिमुचां मेघानामिव आदानमर्जनं विसर्गाय त्यागाय पात्रविनियोगायेत्यर्थः ८६ सत्रान्त इति काकुत्स्थो
रघुः सत्रान्ते यज्ञान्ते ॥ सत्रमाच्छादने यज्ञे सदादाने वनेऽपि चेति विश्वः सचिवानां सखा सचिवसखः सन् तेषामनुमत्यानुसृत्य
गुर्वीभिर्महतीभिः पुरस्क्रियाभिः पूजाभिः शमितं पराजयेन व्यलीकं दुःखं येषां तानपराजयव्यपदेशः राजाहः सचिवाश्च च
ता शमितपराजयव्यलीकान् दुःखेष्वलीकमित्यादयः चिरविरहेणोत्कण्ठिता उत्सुकाः अवरोधाः अन्तःपुराङ्गना येषां तान् राज्ञोऽपत्यानि
राजन्यान् ...

सविश्वजितमाजह्रेयज्ञंसर्वस्वदक्षिणं आदानंहिविसर्गायसतांवारिमुचामिव ८६ सत्रान्तेसचिवसखःपुरस्क्रियाभिर्गुर्वीभिः
शमितपराजयव्यलीकान् काकुत्स्थश्चिरविरहोत्सुकावरोधान्राजन्यान्स्वपुरनिवृत्तयेनुमेने ८७ तेरेखाध्वजकुलिशात
पत्रचिह्नंसम्राजश्चरणयुगंप्रसादलभ्यं प्रस्थानप्रणतिभिरङ्गुलीषुचक्रुर्मौलिस्रक्च्युतमकरन्दरेणुगौरं ८८ इतिश्रीरघुवंशे
महाकाव्येकालिदासकृतौरघुदिग्विजयोनामचतुर्थःसर्गसमाप्तः ४

राजन्याः क्षत्रियास्तान् राजश्वशुराद्यदिति जातौ यत्प्रत्ययः स्वपुरमभिवि
...राजन्यो बाहुजः क्षत्रियो विराडित्यमरः स्वपुरं प्रति निवृत्तये प्रतिगमनाय अनुमेने अनुज्ञातवान् ८७ तइति ते राजानः रेखा च ध्वजश्च कुलि
शानि चातपत्राणि च ध्वजादि आकाररेखा इत्यर्थः तानि चिह्नानि यस्मिंस्तथोक्तं प्रसादेनैव लभ्यं प्रसादलभ्यं सम्राजः सार्वभौमस्य रघोः
चरणयुगं प्रस्थाने प्रयाणसमये याः प्रणतयो नमस्काराः ताभिः करणैः अङ्गुलीषु मौलिषु केशबन्धेषु याः स्रजः माल्यानि ताभ्यश्च्युतैर्मक
रन्दैः पुष्परसैः रेणुभिः परागैश्च गौरं गौरवर्णं चक्रुः ॥ ८८ ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथविरचितायां रघुवंशव्याख्यायां संजीविन्यां च
॥ तुर्थः सर्गः समाप्तः ॥ ४ ॥

रघु॰ ५९ सर्ग ५

क्रियेति क्रियानिमित्तेष्वपि कुशेषु मुनिभिः वत्सलत्वात् स्नेहेनाभग्नकामा अप्रतिहतेच्छा तेषां मुनीनामङ्कशय्यास्ताः सुच्युतानि
नाभीनां नालानि यस्याः सा तथोक्ता मृगीणां प्रसूतिः सन्ततिरनघा अव्यसना कच्चित् अनपायिनी किमित्यर्थः दुःखिनो व्यसनं व्यप
मितियादवः नैहिकाल भयादङ्गारानङ्कशयनं धारयन्ति ७ निर्वर्त्येति यैस्तीर्थजलैर्नियमाभिषेको नित्यस्नानादिर्निर्वर्त्यते निःपा
द्यते येभ्यो जलेभ्य उपनतेति शेषः पितॄणामग्निष्वात्तादीनां निवापांजलयस्तर्पणांजलयः पितृदानं निवापः स्यादित्यमरः निर्वर्त्यंते
उञ्छानां प्रकीर्णसस्यानां षष्ठैः षष्ठभागैः पालकत्वात् राजग्राह्यैः अंकितानि सैकतानि पुलिनानि येषां तानि तथोक्तानि शिवानि युष्मा
कं तानि तीर्थजलानि शिवान्यभद्राणि कच्चित् अनुपद्रवाणि किमित्यर्थः उञ्छो धान्यांश आदानं कणिशा

क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ७
निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितॄणां तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ८
नीवारपाकादि कडंगरीयैरामृश्यते जानपदैर्न कच्चित् कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थिति
साधनं वः ९

द्यार्जनं शिलमितियादवः षष्ठाष्टमाभ्यां ञ चेति वक्तव्याद्भागार्थे ञ प्रत्ययः अत एवा
पूरणार्थत्वात् पूरणगुणेत्यादिना न षष्ठीसमासप्रतिषेधः सिकता येषु संतीति सैकतानि सिकताशर्कराभ्यां
चेत्यण्प्रत्ययः नीवारेति कालेषु योग्यकालेषु उपपन्नानामागतानामतिथीनां कल्प्याः कल्पिता भागा यस्य
तत्तथोक्तं वने भवं वन्यं शरीरस्थितेः जीवनस्य साधनं वो युष्माकं पच्यत इति पाकः फलं धान्यमिति यावत् नीवारपाका
दिर्नीवारश्यामाकादिधान्यसंग्रहः जनपदेभ्य आगतैर्जानपदैः तत आगत इत्यण्प्रत्ययः कडंगरीयैः कडंगरं तुषं संप्र
हन्तीति कडंगरीयाः कडंगरो बुसं क्लीबे धान्यत्वचि तुषः पुमानित्यमरः कडंगरदक्षिणाच्छ चेति छ प्रत्ययः तैर्गोमहिष्यादि
भिर्नामृश्यते कच्चिन्न भक्ष्यते किं ९

तमिति विधिज्ञः शास्त्रज्ञः अकरणेऽप्यवायभीरुरित्यर्थः मानधनानामग्रयायी अग्रेसरः अपयशोभीरुरित्यर्थः कृत्यवित् कार्य
ज्ञः आगमनप्रयोजनमवश्यं प्रष्टव्यमिति कृत्यवित् विशांपतिर्मनुजेश्वरः द्वौ विशौ वैश्यमनुजा इत्यमरः विष्टरभाजमासनगतमु
पविष्टमित्यर्थः विष्टरो विटपी दर्भमुष्टिः पीठमासनमित्यमरः वृक्षासनयोर्विष्टर इति निपातः तं तपोधनं विधिवत् विध्यर्हं यथा
शास्त्रमित्यर्थः तदर्हमिति वतिप्रत्ययः अर्चयित्वा आरात्समीपे आराद्दूरसमीपयोरित्यमरः कृतांजलिः सन् वक्ष्यमाणप्रकारेण उ
वाच ३ अप्यग्रणीरिति हे कुशाग्रबुद्धे सूक्ष्मबुद्धे कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः सुमानित्यमरः मंत्रकृतां मंत्रद्रष्टॄणां
मुनीनां मंत्रपाठेत्यादिना क्विप् ऋषीणामग्रणीः श्रेष्ठस्ते तव गुरुः कुशल्यपि क्षेमवान्नु किं अपिशब्दः प्रश्ने गर्हासमुच्चयप्रश्नशंका

तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी विशांपतिर्विष्टरभाजमारात्कृतांजलिः कृत्यविदित्युवाच ३
अप्यग्रणीर्मंत्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ४ काये
न वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि आपाद्यते न व्ययमंतरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ५ आधार
बंधप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषं कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानां ६

संभावनास्वपीत्यमरः

यतो यस्माद्गुरोः त्वया अशेषं ज्ञानं लोकेन उष्णरश्मेः सूर्यात् चैतन्यं प्रबोध इव आप्तं स्वीकृतं ४ कायेनेति कायेन उपवासादिकृच्छ्रचांद्रायणादिना
५२ वाचा वेदपाठेन मनसा गायत्रीजपादिनापि शश्वत् संभृतं वासवस्य इन्द्रस्य धैर्यं लुम्पतीति वासवधैर्यलोपि स्वपदापहारशंकाजनकमित्यर्थः यत्तपः शश्वद्
सकृत् मुहुर्मुहुः पुनः शश्वदभीक्ष्णमसकृत्समा इत्यमरः संभृतं संचितं महर्षेर्वसिष्ठस्य तत्त्रिविधं वाङ्मनःकायजं तपः अंतरायैर्विघ्नैः ५२
व्ययं नाशमापद्यते कच्चित् न नीयते किं कच्चित्कामप्रवेदने इत्यमरः ५ आधारेति आधारबंधप्रमुखैः आलवालनिर्माणादिभिः आधारस्त्वा
लवालं तु बंधधिकरणमित्यमरः आश्रमपादपानां वायोर्वातादिरुपद्रवो वा न कच्चिन्नास्ति किं ॥ ६ ॥

र॰टी॰ म॰ ५॰ 45

इतीति॥ अर्घपात्रेण अनुमितो व्ययः सर्वस्वत्यागो यस्य तं सारघौरित्युक्तप्रकारं उदारं उदारयशसमपि गां वाचं मनोनियोगक्रियया आत्मकर्मेदं इत्येवंरूपां वाचं स्वर्गस्य पृथु वाग्वद्विदग्रगण्योऽभूतले॥ तस्मै दत्ता क्रियापुत्रिका गौरित्यमरः निःस्पृहत्वाद्वरतन्तुशिष्यः कौत्सः स्वार्थोपपत्तिं स्वकार्यसिद्धिं प्रति दुर्बलाशः सम्यग्व्ययपात्रदर्शनात् शिथिलमनोरथः सन्नुक्तप्रमाणाक्षरेण वाचा॥ १२॥

इत्यर्घपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य। स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः॥ १२॥ सर्वत्र नो वार्त्तमवेहि राजन्नाथे कुतस्त्वय्यशुभं प्रजानाम्॥ सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा॥ १३॥

सर्वत्रेति हे राजन् त्वं सर्वत्र नोऽस्माकं वार्त्तमारोग्यमवेहि जानीहि वार्त्तं बल्यनुपरौ चेत्यमरः नाथति त्वयि वार्तपाटवमारोग्यं नव्यं स्वास्थ्यमनामयमित्यादयः न चैतदाश्चर्यमित्याह नाथति नाथे ईश्वरे सति प्रजानामशुभं कुतः तथाहि स्वार्थान्तरं न्यस्यति सूर्ये त्वाहिना सूर्ये तपति प्रकाशमाने सति तमिस्रा तमस्ततिः तमिस्रा तिमिरे रोगे तमिस्रा तु तमस्ततौ कृष्णपक्षनिशायां चेति विश्वः तमिस्रमिति पाठे तमिस्रं तिमिरं तम इत्यमरः लोकस्य जनस्य लोकस्तु भुवने जने इत्यमरः दृष्टेरावरणाय कथं कल्पेत दृष्टिमावरितुमलमित्यर्थः क्लृपेरलमर्थत्वात् योगे नमःस्वस्तीत्यादिना चतुर्थी अलमिति पर्याप्त्यर्थग्रहणं रुतिभगवान् भाष्यकारः

अपीति॰ कच्चित्त्वं प्रसन्नेन सता महर्षिणा सम्यक् विनीय शिक्षयित्वा विद्यामुपदिश्येत्यर्थः॰ गृहाय गृहस्था-
श्रमं प्रवेष्टुं॰ क्रियार्थोपपदेत्यादिना चतुर्थी॰ अनुमतः॰ अपि॰ अनुज्ञातः किं॰ हि यस्मात्ते तव सर्वेषा-
माश्रमाणां ब्रह्मचर्यवानप्रस्थयतीनामुपकारे क्षमं शक्तं॰ क्षमं शक्ते हिते त्रिष्वित्यमरः द्वितीयमाश्रमं गा-
र्हस्थ्यं संक्रमितुं प्राप्तुं अयं कालो हि॰ विद्याग्रहणानन्तर्यात्स्वेति ज्ञावः॰ कालसमयवेलासु तुमुन्प्र-
त्ययः॰ सर्वोपकारक्षममित्यत्र मनुः॰ यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः वर्तन्ते गृहिणस्तद्वदाश्रि-
त्येतरमाश्रमा इति १० कुशलं प्रश्नं विधायागमनप्रयोजनं चिकीर्षुराह॥ तवेति॥ अर्हतः पूज्यस्य प्रकाशस्य

अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय॥ कालो ह्ययं संक्रमितुं द्वितीयं स-
र्वोपकारक्षममाश्रमं ते॥१०॥ तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे
अप्याज्ञया शासितुरात्मना वा प्राप्तोसि संभावयितुं वनान्मां॥११॥

अर्हः प्रशंसायामिति तृच् प्रत्ययः॥ तवा[illegible]कमभिगमनेनागमनमात्रेण मनो न तृप्तं न तु
हृष्टं किंतु नियोगक्रियया आज्ञाकरणेनोत्सुकं सोत्कंठं॥ तत्परे प्रसितासक्ताविष्टार्थोद्युक्त उ-
त्सुक इत्यमरः प्रसितोत्सुकाभ्यां तृतीया॥ सप्तम्यर्थे तृतीया॥ शासितुर्गुरोराज्ञयाप्यात्मनो स्व-
तो वा॥ प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया॥ मां संभावयितुं वनात्प्राप्तोसि॥ गुर्वर्थं स्वार्थं वा आ-
गतमित्यर्थः ११

१०दी स्थानइति। भवानेकनराधिपः सन् सर्वभौमः सन् भरवजे जनतर्जं। न विद्यते किंचन यस्य त
भ० किंचनः अचोपवामित्यादिनामयूरव्यंसकादिषु निपातनात् तत्पुरुषः तस्य भावस्तत्त्व
निर्धनत्वं व्यननक्तिप्रकटयति तत्स्थाने युक्तं युक्ते द्वे सांप्रतं स्थाने इत्यमरः तथाहि ॥ सु
५१ रैपर्यायेणाक्रमेणपीतस्य हीमांशोः कलाद्वयोरेकरूपत्वयात् श्लाघ्यतरोहि विरः खलु॰
तन्निम्नाक्षोभं तेगलितत्वि नवेन्द्राविधुन

स्थाने न भवानेकधराधिपः सन् किंचनत्वं भवते जनिनके पर्यायपीतस्य सुरैर्हिमांशोः कलाः
क्षयः श्लाघ्यतरोहि वृद्धेः ॥१६॥ बदन्यतरलावदन्यकार्यं गुर्वर्थमाहर्तुमहं प्रतिष्ये। तस्य
सुतेनिगलितांबुगर्भं शरद्घनं नार्दति चातकोपि ॥८७॥

46

एडूतिभावः॥ अत्रकामदक ॥ धर्माथैसी राकोशस्य हीनत्वमपि शोभते ॥ सुरैः पीतावशेष
स्यक्षयपक्षस्य विधोरिवः ॥ १६ ॥ तदिति ॥ तत्तस्मात् बदन्यः कार्यो याचकस्य वचसा कः
ल्पेव धीमन्मा बंधारेण प्रयोजनां तर रहितएवाहं अल्पतो वदान्यांतरात् गुर्वर्थं गुरुधन
माहर्तुं अर्जितुं यतिष्ये उद्योक्ष्ये । तेनुभ्यं स्वस्ति शुभमस्तु । नमः स्वस्तीत्यादिना चतुर्थी तथाहि॰
चातकोधरणीपतितं॰ ततोयं चातकानां रुजाकरमिति हितार नन्यगतिकोपीत्यर्थः । निर्गलितं
अंबुगर्भो यस्य तं शरद्घनं नार्दति न याचते॰ अर्द गतौ याचने चेति धातुः याचनार्थे रणोर्दन

राम ५१

तवार्हतस्मादिनाप्युक्तं तन्नचित्रमित्याह: भक्तिरिति॰ प्रतीतेषु प्रख्यातेषु प्रतीतौ ख्यातहृष्टौ इत्यमरः
भक्तिरनुरागविशेषः तेनतत्कुलोचितकुले त्वयि ततः अप्यतिगुरुचितं साध्यमितियावत्: हेम
हेमपात्रगतसर्वस्वे नतया अतः पूर्वान्नतिशयेअतिवर्तसे॰ किंतु सर्वेष्वपि वार्त्तं चेत्तर्हि कथं खेदः
खिन्नस्त्वमेवहत्यसे अतआह: व्यतीतेति॰ अहं व्यतीतकालो अतिक्रान्तकालसन् अर्थिभाव
त्वामभ्युपेतइति मे विषादः॥१४ शरीरेति। हेनरेंद्र तीर्थे सत्पात्रे प्रतिपादिता दत्ताऋद्धिर्येन स।

भक्तिः प्रतीतेषु कुलोचितेषु सर्वस्महत्तामागतया विशेषे। व्यतीतकालस्त्वहमभ्युपेतस्त्वा
मर्थि भावादितिमेविषादः॥१४ शरीरमात्रेण नरेंद्र तिष्ठन्नाभासि तीर्थप्रतिपादि
तर्द्धिः आरण्यकोपात्तफलप्रसूतिस्तंबेन नीवार इवावशिष्टः॥१५॥७॥ ०॥ ७॥

तथोक्तः तीर्थंशास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु इति विश्वः यन्नोनलावतारे च मंत्राद्यष्टा।
दशस्वपि पुण्यक्षेत्रेतथापात्रे तीर्थस्याद्दर्शनेष्वपीति॥ हलायुधः॥ शरीरमात्रेणावशिष्टन्आ
रण्यकाअरण्यभवामनुष्यामुनिमुख्याः॥ आरण्यान्मनुष्य इति वुञ्प्रत्ययः॥ तैरुपात्ताफल
मेवप्रसूतिर्यस्यसः॥ स्तंबेनकांडेनावशिष्टः प्रकृत्यादित्वात्तृतीया नीवार इवाभासि।

शोभसे १५

र.टी. समाप्तेति॥ समाप्तविद्येन मया महर्षिर्गुरुदक्षिणायै दक्षिणास्वीकारार्थं विज्ञापितोऽभूत् स च गु- सर्ग ५

स० रुः चिरायास्खलितोपचारां तां दुष्करां मे भक्तिमेव पुरस्तात्प्रथममगणयत् संख्यातवान्

५२ तेनाहं च तुष्टः किं दक्षिणया त्वत्कृतवनित्यर्थः अथवा भक्तिमेव तां दक्षिणां इत्यगणयदि-
त्यर्थः॥२०॥

47

समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै। स मे चिरायास्खलितोपचा-
रां तां भक्तिमेवागणयत्पुरस्तात्॥२०॥ निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा
गुरुणाहमुक्तः। वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति॥२१

निर्बंधेति। निर्बंधेन प्रार्थनातिशयेन संजातक्रोधेन गुरुणा अर्थकार्श्यं दारिद्र्यं अचिंतयि-
त्वाऽविचार्य अहं वित्तस्य धनस्य चतस्रो दश कोटीश्चतुर्दश कोटीर्मे मह्यं आहर आन-
येति विद्या॥ परिसंख्याया विद्यासंख्यानुसारेणेत्यर्थः॥ अत्र मनुः अंगानि वेदाश्-
चत्वारो मीमांसान्यायविस्तरः पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशेति॥२१॥

एतावदिति। एतावद्वाक्यमुक्त्वा प्रतियातुकामो यस्य तं प्रतियातुकामं गंतुकामं। तुंकाममनसोर
पीति मकारलोपः। महर्षेः वरतंतोः शिष्यं कौत्सं नृपतिः रघुः निषिध्य निवार्य हे विद्वन् त्वया
गुरवे प्रदेयं वस्तु किं नामकं किं यत्तत् किंपरिमाणं केचेति राजा वा कौत्सं तं अन्वयुंक्त अपृच्छत् ए
षोऽनुयोगः पृच्छा चेत्यमरः ॥१८॥

एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य। किं वस्तु विद्व०
न्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुंक्त ॥१८॥ ततो यथावद्विहिताध्वराय०
तस्मै स्मयावेशविवर्जिताय। वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमा०
चचक्षे ॥१९॥

तत इति। ततो यथावद्यथार्हं अर्हतीति वतिः विहिताध्वराय विधिवदनुष्ठितयज्ञाय सम्यक्
तारायेत्यर्थः स्मयावेशविवर्जिताय गर्वनिवेशशून्याय अनुद्धतायेत्यर्थः वर्णानां ब्राह्मणादी
नां आश्रमाणां ब्रह्मचर्यादीनां च नियामकाय तेषां गुरुः स्वधर्म प्रतिष्ठापक तं० वर्णाः स्युर्ब्राह्मणा
द्य इत्यमरः ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये। आश्रमोऽस्त्रीत्यमरः सर्वकार्यनिर्वाहकायेत्यर्थः तस्मै रघवे
ब्रह्मचारिणा इत्यमरः वर्णी ब्रह्मचारिणा इत्यमरः वर्णी न ब्रह्मचा

रिणी विचक्षणः कुशलो विद्वान् वर्णी ब्रह्मचारी वर्णी
लिनीति प्रत्ययः स कौत्सः प्रस्तुतं प्रकृतमाचचक्षे ॥

त्वमाह रघोः सकाशात्कामं मनोरथं अनवाप्य अप्राप्य वदान्यान्तरं दात्रन्तरं गतः। वदान्य
स्थूललक्ष्यदानशौडाबहुप्रदा इत्यमरः॥ इत्येवंरूपस्यापवादस्य नवः इदंप्रथमोवतारः
५३ आविर्भावो मे मा भूत् मास्तु। रघोरिति स्वनामग्रहणं संभावितत्वद्योतनार्थं तथाच संभा
वितस्य चाकीर्तिर्मरणादतिरिच्यत इति भावः॥ २४ सइति॥ सत्वंमहितेपूजितेप्रशस्ते।

48 गुर्वर्थमर्थीश्रुतपारदृश्वा रघोः सकाशादनवाप्यकामं॥ गतोवदान्यान्तरमि
त्ययंमेमाभूत्परीवादनवावतारः॥२४॥ सत्वंप्रशस्तेमहितेमदीये वसंश्चतुर्थो
ऽग्निरिवाग्न्यगारे। द्वित्राण्यहान्यर्हसिसोढुमर्हन् यावद्यतेसाधयितुंत्वदर्थं। २५

प्रसिद्धेमदीयेऽग्न्यगारे त्रेताग्निशालायां चतुर्थोऽग्निरिव वसन् द्वित्राणि द्वे त्रीणि वा अहानि
दिनानि॥ संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इति बहुव्रीहिः बहुव्रीहौ संख्येये ड
जबहुगणात् इति डच्प्रत्ययः समासान्तः सोढुमर्हसि हे अर्ह पूज्य अर्हन् मान्य त्वदर्थं तव प्रयोज 52
नं साधयितुं यावद्यते यतिष्ये यावत्पुरानिपातयोर्लट् इति भविष्यदर्थे लट्॥ २५ ॥ ५३

लोहमिति॥ सोहं सपर्याविधिभाजनेनार्घ्यपात्रेण भवंतं प्रभुशब्द एव शेषो यस्य तं म
त्वा निःस्वं निश्चित्येत्यर्थः॥ श्रुतनिष्क्रयस्य विद्यामूल्यस्याल्पेतरत्वादतिमहत्वात्त्वां सं
प्रत्युपरोद्धुं निर्बंधुं नाभ्युत्सहे॥२२॥ इत्थमिति॥ द्विजराजकांतिश्चंद्रकांतिः चंद्रसमकां
तिर्वेन तदर्थाग्रामि वैराग्यं वारयति। द्विजराजः शशिधरे नक्षत्रेशः क्षपाकर इत्यमरः॥

सोऽहं सपर्याविधिभाजनेन मत्वा भवंतं प्रभुशब्दशेषं॥ अभ्युत्सहे संप्रति नोप
रोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य॥२२॥ इत्थं द्विजेन द्विजराजकांतिरावेदितो वेद
विदां वरेण॥ एनोनिवृत्तेंद्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः॥२३॥

तस्मात्सोमो राजा नो ब्राह्मणानामिति श्रुतेः। एनसो निवृत्ता इंद्रियवृत्तिर्यस्य सः जगदेक
नाथो रघुर्वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्थमावेदितो विदितः सन् एनं कौत्सं भू
यः पुनर्जगाद॥२३॥ गुर्वर्थमिति॥ श्रुतस्य पारं दृष्टवान् श्रुतपारदृश्वा। हे श्रुतपारदृश्वन् त्वमयः
गुरवे गुर्वर्थं गुरुदक्षिणार्थं यथा तथा अर्थी याचकः विश्वजिदध्वरेनाप्यस्मात्प्रत्याख्येयः

र.टी. अथेति॥ ॥अथप्रदोषे रजनीमुखे तत्काले यानाधिरोहणविधानात् प्रयतो धीरो रघुः

स. समंतान्नवः सामंता राजमात्रमिति बुद्धिसंभावनयेव कैलासनाथं कुबेरं तरसा बलेन

न जिगीषुः जेतुमिच्छुः सन् कल्पितं सज्जितं शस्त्रगर्भे यस्य तं तस्य मधिशिश्ये रथे शयितवानित्यु

५४ तिः त्यर्थः॥ ॥ ॥ ॥ अधिशीङ्स्थासां कर्मेति कर्मत्वं॥ २८॥ ॥ ॥ ॥ ॥ ॥ ॥

अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं सामंतसंभावनयैव धीरः कै

49 लासनाथं तरसा जिगीषुः॥ २८॥ प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे

नियुक्ताः॥ हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः॥ २९॥ ॥

सां कर्मेत्युक्तत्वं॥ ० प्रातरिति॥ प्रातः प्रयाणाभिमुखाय तस्मै रघवे कोशगृहे नियुक्ता अधि

कृताः भांडागारिकाः विस्मयाः सविस्मयाः संतः कोशगृहस्य मध्ये नभसः पंचम्यास्तसिल्प्रत्यय ५२

पतितां हिरण्मयीं सुवर्णमयीं। दांडिनीयनेत्यादिना निपातनात्साधुः। वृष्टिं शशंसुः

॥ ॥ ॥ ॥ ॥ ॥ कथयामासुः॥ २९॥ ॥ ॥ ॥ ॥ ॥ ॥ ५८

तथेति॥ अग्रजन्मा ब्राह्मणः प्रतीतः प्रीतः सन् तस्य रघोरवितथममोघं संगिरं प्रतिज्ञां अग्रप
तिज्ञाजिसंविदापत्सु संगर इत्यमरः तां गिरमिति केचित्पठंति। तथेति प्रतिज्ञातं प्रत्यग्रहीत्। रघुर
पि गां भूमिं आत्तसारां गृहीतधनामवेक्ष्य कुबेरादर्थं निःक्रष्टुमाहर्तुं चकमे इयेष। २६ वसिष्ठे
ति॥ वसिष्ठस्य यन्मंत्रेणोक्षणमभिमंत्र्य प्रोक्षणं तज्जात्प्रभावात्सामर्थ्याद्धेतोः उदन्वदा।

तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगिरमग्रजन्मा गामात्तसारां रघुरप्यवे
क्ष्य निःक्रष्टुमर्थं चकमे कुबेरात्॥२६। वसिष्ठमंत्रोक्षणजात्प्रभावादुदन्वदाका
शमहीधरेषु मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य॥ २७ ॥

शमहीधरेषु उदन्वति उदधौ आकाशे महीधरेषु मरुत्सखस्य मरुतः सखेति तत्पुरुषः बहुव्री
हौ समासांताभावात् ततो वायुसहायस्येति लभ्यते॥ वारीणां वाहको बलाहकः पृषोदरादि
त्वात्साधुः॥ तस्य मेघस्येव तद्रथस्य गतिः॥ संचारो न विजघ्ने न विहता हि॥ २७ ॥

र.टी अथेति॥ अथ प्रीतमनाः महर्षिः कौत्सः संप्रस्थितः प्रस्थाप्यमानः सन् आगंसायांन्न
म० तवक्षेति जनविप्रपदर्थे कः उष्ट्राणां क्रमेलकानां वामीनां वडवानां च शतैः वाहितार्थः प्रा
५५ तेः पितधनं आनतं पूर्वकायं विनयनम्रमित्यर्थः प्रजेश्वरं रघुं करेण स्पृशन् वाचमुवाच॥
३२ किमिति॥ वृत्ते स्थितस्य न्यायवर्तिनः न्यायेनार्जनमर्थस्य वर्धनं पालनं तथा स
त्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधमिति कामन्दः तस्मिन् कामान्सूते इति काम

अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः स्पृशन्करेणानतपू॥
र्वकायं संप्रस्थितो वाचमुवाच कौत्सः॥३२॥ किमत्र चित्रं यदि कामसूर्भूर्वृत्ते॥
50 स्थितस्याधिपतेः प्रजानां अचिंतनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा॥३३॥

सूः यद्दियत्सूद्विषद्दुहेत्यादिना क्विप् अत्र कामप्रसवे किं चित्रं न चित्रमित्यर्थः किंतु
माद२ तव प्रभावो माहात्म्यं चिंतनीयः येन त्वया द्यौरपि मनीषितं अभिलषितं दुग्धा॥ दुहेर्द्विक
र्मकत्वादप्रधाने कर्मणि क्तः प्रधानकर्मण्याख्येये णादीनाद्द्विकर्मकाणां अप्र
धाने दुहादीनां ण्यंते कर्तुश्च कर्मणः इति स्मरणात्॥ ३३ ॥७॥७॥७॥७॥७॥ ५५

नमिति। नृपतिर्रघुरभियास्यमानादभिगमिष्यमाणात्कुबेराल्लब्धंवज्रेणकुलिशेनभिन्नं
सुमेरोःपादंप्रत्यंतपर्वतमिवस्थितं॥ पादाःप्रत्यंतपर्वताइत्यमरः॥ शृंगंसुमेरोरितिकं
चित्पाठः॥ तंभासुरंभास्वरं॥ भंजभासमिदोघुरजितिघुरच्प्रत्ययः॥ हेमराशिंसम॥
भेष १ स्तंकृत्स्नंकौत्सायदिदेशददौ ननुचतुर्दशकोटिमात्रमित्येवकारार्थः ३० जनस्येति॥

तंभूपतिर्भासुरहेमराशिंलब्धंकुबेरादभियास्यमानात्। दिदेशकौत्सायसम
स्तमेवशृंगंसुमेरोरिववज्रभिन्नं॥३०॥ जनस्यसाकेतनिवासिनस्तौद्वावप्यभूता
मभिनंद्यसत्वौ। गुरुप्रदेयाधिकनिस्पृहोर्थीनृपोर्थिकामादधिकप्रदश्च॥३१॥

तौअर्थिदातारौद्वावपिसाकेतनिवासिनः … नंदिनीनुसेतियावत्॥ जनस्याभि
नंद्यसत्वौश्लाघ्यव्यवसायावभूतां॥ द्रव्यासुव्यवसायेषुसत्वमस्त्रीतुजंतुष्वित्यमरः॥ कौतौ॥
गुरुप्रदेयादधिकेऽतिरिक्तेनिःस्पृहोर्थीअर्थिकामादर्थिनःमनोरथादधिकंप्रद
दातीतितथोक्तः॥७॥७॥७॥७॥७॥ प्रदायज्ञइतिकप्रत्ययः॥ नृपश्च॥३१॥

अयोध्यानिवासिनः साकेतंस्यादयोध्यायांकोशला४

अतो ब्र[illegible]लमुहूर्त्तोत्पन्नत्वात् पिता रघुः ब्रह्मणो विधेरेव नाम्ना तमात्मजन्मानं पुत्रम् अजनाम

१०८री जं चकार अजो हरो हरे कामे विधौ छागे रघोः सुते इति विश्वः ३६ ओजस्विनेजिस्वा ओजस्तेज

म० सिधातुनाम्नवष्टं भप्रकाशयो ओजो बले च दीप्तौ चेति विश्वः रूपं वपुः अपर रूपं नपुंसकं ल

५६ तावाकृतिः सौन्दर्यं वपुः पुंस्याकराः द्वयोरिति केशवः तदेव येन कमेवं वीर्यं शौ[illegible]र्यं तदेव नैसर्गि

कं स्वाभाविकं [illegible] उन्नतत्वं तदेव नात्त्[illegible]गोवेत्यर्थः कुमारो बालकः ॥

अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ३६ रूपं तदोजस्वि तदे

व वीर्यं तथैव नैसर्गिकमुन्नतत्वं नकारणात्स्वाद्बि[illegible]भिदे कुमारः प्रवर्त्तितो

51 दीप इव प्रदीपात् ॥ ३७

प्रवर्त्तितः इत्यादितो दीयः प्रदीपात् ॥ स्वोत्पादकदीपात् इव स्वात् स्वकीयात्

स्वादिस्योन वस्योवेति स्याद्वावो वैकल्पिकः कारणा जनकात् न विभिदे भिन्नो

नाभूत् सर्वात्मना तादृश एवाभूदित्यर्थः ॥ ३७ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ५६

आशास्यमिति॥ सर्वाणि श्रेयांसि शुभानि अधिजग्मुषः प्राप्तवतः ते तव अन्यत् एतदतिरिक्तम् आशास्य
आशीः सा च पुनरुक्तभूतं सर्वं सिद्धमित्यर्थः। किं त्वीदृशं तुल्यं भवन्तं भवतः पितेवात्मानुरूपं त्वं तुल्यगु
णमित्यर्थः पुत्रं लभस्व प्राप्नुहि। ३४। इत्थमिति। अग्रजन्मा ब्राह्मणः। अग्रजन्मा द्विजश्रेष्ठे भ्रात
रि ब्रह्मणि तद्वदिति विश्वः। इत्थं राज्ञे आशिषं प्रयुज्य गुरोः सकाशं समीपं प्रतीयाय प्राप। राजा।

आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते। पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं
भवतः पितेव॥ ३४ इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशं। राजापि
लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः। ३५ ब्राह्मे मुहूर्ते किल तस्य देवी कुमार
कल्पं सुषुवे कुमारं

पि जीवलोकः प्राणिसमूहः जीवः प्राणिनि गीष्पतौ इति विश्वः। अर्कात् सूर्यात् आलोकं प्रकाशमिव चेतन्यमि वितिः४
निपादेशानमिव॥ तस्मात् कौत्सवाक्यात् आशु सुतं लेभे प्राप॥ ३५ ब्राह्म इति। तस्य रघोर्महिषी ब्रा
ह्मे तस्येदमित्यण् ब्रह्मदैवत्ये॥ अभिजिन्नामके मुहूर्ते किल इन्द्रपरिसमाप्ताविस्मादि
नाकल्पप्रत्ययः॥ ७ ॥ कुमारं पुत्रं सुषुवे॥ ॥कुमारो बालके स्कन्दे इति विश्वः॥ ७ ॥

सै। वि। सां

[illegible]

र.टी म. ५७

अनूचानत्वादिगुणयोगात् स्वकुलीयसंबंधं चिंत्य विचार्य पुत्रं च दारक्रियायोग्यदशं। विवाहयोग्यवयसं विचिंत्य सैन्येनान्वितं पुत्रं रुक्मांगदं मध्यां विदर्भाधिपस्य भोजस्य राजधानीं पुरीं प्रति प्रस्थापयामास धीयतेऽस्यामिति धानीकरणाधिकरणयोश्चेति अधिकरणार्थे ल्युट्॥ अन्वयः राज्ञां धानी इति विग्रहः॥ ५०॥

तं श्लाघ्यसंबंधमसौ विचिंत्य दारक्रियायोग्यदशं च पुत्रं। प्रस्थापयामास ससैन्य मेनं मध्यां विदर्भाधिपराजधानीं ५०॥ तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः। मार्गे निवासा मनुजेंद्रसूनोर्बभूवुरुद्यानविहारकल्पाः॥ ५१॥

तस्येति॥ उपकार्या सुराजयोग्येषु पटमंडपादिषु सौधेष्वी राजसदनं उपकार्योपकारिके त्यमरः वक्ष्याख्यानेक्षीरस्वामी उपक्रियते उपकरोतीति च पटमंडपादिराजसदनमिति रचिता उपचाराः शयनादयो येषु ते तथोक्ताः जनपदानां जनपदेभ्यः आगतानां उपदाभिरुपायनैर्वन्याः वने भवा इतरे येषां ते वन्येतराः अवन्या इत्यर्थः नवकुंभीहावितिसर्वनामभ्यः तिकल्पञ्लयः बभूवुः ५१ ५७

उपात्तेति॥ गुरुभ्यो विधिवद्यथाशास्त्रं उपात्तविद्यं लब्धविद्यं यौवनस्योद्भेदाद्याविर्भ
वाद्धेतोर्विशेषेण कान्तं सौम्यं तमजं प्रति साभिलाषापि श्रीः धीरोन्नतचित्ता स्थिर
चित्ता नातियानुतद्वेयमिति संज्ञातमिति अपालः कन्या पितुरिव गुरोः रघोः अनुज्ञां
मात्र कांक्षदपेक्षः यौवराज्याहें ऽपि दित्यर्थः अनुज्ञा शब्दापित्तपारं तंत्र्यमुपमासामर्थ्यो॥

उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तं श्रीः संगतुकामापि गुरोरनु
ज्ञां धीरेव कन्या पितुराचकांक्षेः ३८ अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्व
सुरिंदुमत्याः आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः॥ ३९ ॥

त्वात्पिरहरणायोग्यता च ध्वन्यते ३८ अथेति॥ अथ स्वसुर्भगिन्या इंदुमत्याः स्वयंवरार्थं कु
मारस्यानयने उत्सुकेन क्रथकैशिकानां विदर्भदेशानामीश्वरेण स्वामिना भोजेन राज्ञा
आप्तो हितः दूतो रघवे विसृष्टः प्रेषित॥ क्रियाग्रहणयोगेपि चतुर्थी आग्रहणं अत्रैव
तात्पर्यद्योतनार्थं॥ ३९ ॥ तमिति॥ ४० ॥ असौ रघुः तं भोजं श्लाघ्य ॥ ४० ॥ संबंधः

१०टी
म°
५८

मा° ५

निःशेषेति॥ कथंभूतो गजः। निःशेषो विक्षालितधातुनामपिधौतगैरिकादिनामपि नीलाभिरू
र्ध्वरेखाभिस्तटाभिघातजनिताभिः शबलेन कर्बुरेण॥ चित्रकिर्मीरकल्माषशबलैताश्च
कर्बुरे इत्यमरः अश्मभिः पाषाणैः विकुंठितेन कुंठीकृतेन दंतद्वयेन ऋक्षवान् नाम तत्तत्यः क
श्चित्पर्वतः तस्य तटेषु वप्रक्रियां वप्रक्रीडां उत्साहेन लकेलिः शृंगाद्यैर्वप्रक्रीडा निगद्यते इति
शब्दार्णवः। शंसन् कथयन् सूचयन्नित्यर्थः॥ ४४ ॥

निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु नीलोर्ध्वरेखाशबलेन शंस
न्दंतद्वयेनाश्मविकुंठितेन॥ ४४ ॥ संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः स
शब्दं बभौ स भिंदन्बृहतस्तरंगान्वार्यर्गलाभंग इव प्रवृत्तः॥ ४५ ॥

संहारेति॥ संहारविक्षेपयोः संकोचनप्रसारणयोर्लघुः [illegible] क्रियेण
क्षिप्रव्यापारेण लघु क्षिप्रमरं द्रुतमित्यमरः हस्तेन शुंडादंडेन हस्तो नक्षत्रभेदे स्या
त्करेभकरयोरपीति विश्वः। सशब्दं सघोषं बृहतस्तरंगान्भिंदन्विदारयन्तीराभिमु
खः स गजः वारी गजबंधनस्थानं वारी तु गजबंधनीत्यादवः वार्या अर्गलाया विष्कुंभस्य

मि१ १२ ५८ १

सद्गतिः। विलंघिताध्वा अतिक्रांतमार्गः सन् शीकरार्द्रैः शीतलैरित्यर्थः मरुद्भिः वातैरानर्तिताः कं
पिताः नक्तमाला यस्मिंस्तस्मिन्। क्लिष्टमित्यर्थः चिरविल्वाख्यवृक्षभेदः चिरबिल्वो नक्तमा
लः करजश्चकरंजके इत्यमरः नर्मदायाः रोधसि तीरे वा प्राकारि क्लांतं श्रांतं रजोभिर्धूसराः केतवो उपर्युर्ध्व
ध्वजा यस्य तत्सैन्यं निवेशयामास ४२ अथेति। अथोपरिष्टात् ऊर्ध्वं उपरिष्टादिति निपातः भ्रमद्भिः
भ्रमद्भिर्लोलादिभिर्जावः भ्रमरैः प्राक् मज्जनात्पूर्वं सूचितो ज्ञापितो अंतः सलिलप्रवेशो यस्य स तथोक्तः

स नर्मदारोधसि शीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले। निवेशयामास वि लंघिताध्वा
क्लांतं रजोधूसरकेतु सैन्यं ४२ अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितांतः सलिल प्रवे
स१ शः निर्धौतदानामलगंडभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ४३ ॥ श्री ॥ श्री ॥

निर्धौतदाने क्षालितमदे अत एवामले गंडभित्ती यस्य स तथोक्तः दानं गजमदे त्यागे इति शाश्वतः ग५
निर्धौतदानाच्चासौ अमलगंडभित्तिश्च प्रशस्तो गंडः इति गंडभित्तिः प्रशंसावचनैश्चेति समासः भित्ति
शब्दः प्रशस्तार्थः तथा गणरत्नमहोदधौ मतल्लिकामिश्राः स्युः प्रकांडस्थलभित्तिपद्धतिभित्तयः प्र
देशो वा। भित्तिः कुड्ये प्रदेशेऽपीति विश्वः निर्धौतदाने अमले गंडभित्ती यस्येति वा वन्यो गजः स
रितो नर्मदायाः सकाशात् पंचम्याः तसिल्प्रत्ययः उन्ममज्ज उत्थितः ४३ ॥

र॰ टी॰ स॰ ५६

संतः अधोरणा हस्तिपकाः हस्त्यारोहा निषादिनः इत्यमरः विमुखाः पराङ्मुखा बभू-
वुः ॥ ४९ ॥ सद्य इति ॥ सद्यः भिन्ना बंधा येषां ते भिन्नबंधाः द्रुताः पलायिताः युग्यं वहंतीति यु-
ग्याः वाहा यस्मिन्सः सचासौ शून्यश्च तं भग्नाः अक्षाः रथावयवदारुविशेषाः अक्षोऽ-
स्त्री रथावयवे पाशके च ह्रषीकेऽपि इति शाश्वतः येषां ते भग्नाक्षास्त एव पर्यस्ता यतिता
रथा यस्मिन्तं रामाणां स्त्रीणां परित्राणे संरक्षणे विहस्ता आकुलाः विहस्तव्याकुलौ सम-

सद्यो भिन्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन रामापरित्राणविहस्तयोधं
सेनानिवेशं तुमुलं चकार ॥ ४९ ॥ तमापतंतं नृपतेरवध्यो वन्यः करीति श्रुतवान्कु-
मारः निवर्तयिष्यन्विशिखेन कुंभे जघान नात्यायतकृष्टचापः ॥ ५० ॥ ७ ॥

वित्यमरः योधा यस्मिंस्तं सेनानिवेशं शिबिरं क्षणेन तुमुलं व्याकुलं चकार ॥ ४९ ॥ तमिति ॥ नृप
ते राज्ञो वन्यः अवध्यः इति श्रुतवान् शास्त्रात् ज्ञातवान् कुमारः आपतंतं अभिधावंतं गजं
निवर्तयिष्यन् न तु हरिष्यन् अत एव नात्यायतं अननिदीर्घं न कृष्टं स्वनशरं स्पृष्टमुपेति
तनार्थमेव यह्लांकृतं ॥ ५० ॥

सर्ग ५

शैलेति॥ शैलोपमः स गजः शैवलमंजरीणां जालानि निर्दूदानि उरसा कर्षन् पश्चात्तटं
सर्ग उत्तीर्णः एवं तेन गजेनोत्पीडितो नद्यो वारि वारिराशिः सरित्प्रवाहः तटमुत्ससर्प ।४६ तस्येति।
तस्यैकनागस्यैकाकिनो गजस्य कपोलभित्तौ जलावगाहेन जलक्षालनेन क्षणमात्रं शांता।
निरस्तामदडुर्दिनश्रीः मदवर्षलक्ष्मीः वन्येतराणां ग्राम्याणामनेकपानां द्विपानां दर्शनेन
पुनर्दिदीपे॥४७॥

शैलोपमः शैवलमंजरीणां जालानि कर्षन्नुरसा स पश्चात् पूर्वं तदुत्पीडितवारि
राशिः सरित्प्रवाहस्तटमुत्ससर्प ।४६ तस्यैकनागस्य कपोलभित्त्योर्जलावगाहक्षण
मात्रशान्ता वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः॥४७॥ ७॥

सप्तच्छदेति। सप्तच्छदस्य वृक्षविशेषस्य क्षीरं वत्कटुः सुरभिः प्रवाहः प्रसारो यस्य तं कटु
तिक्तकषायानुसौरभं पितृकीर्तिनाऽतियाद्वः असह्यं तदीयं मदमाघ्राय सेनागजें
द्रा विलंघितास्तिरस्कृताः आधोरणानां हस्तिपकानां तीव्रो महान् प्रयत्नो येषु तथोक्ताः।
सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयं। विलंघिताधोरणतीव्रयत्नाः सेनागजेन्द्रा विमुखीबभूवुः॥४८॥

सहति॥ ।महर्षिश्चप्रणतेनमयानुनीतिःसन्पश्चान्मृदुतांशांतिमगच्छत् उष्णजलस्योष्णं
त्वंअग्नेरातपस्यवासंयोगात्संपर्कान्नतुप्रकृत्या उष्णत्वंयतस्तोयस्यसाप्रकृतिः स्वभावः
विधेयप्राधान्यात्सेतिस्त्रीलिंगनिर्देशः महर्षीणामपिशांतिरेवस्वभावेनक्रोधस्त्वर्थः ५४

सचानुनीतःप्रणतेनपश्चान्मयामहर्षिर्मृदुतामगच्छत् उष्णत्वमग्न्यातपसंप्रयो
गाच्छैत्यंहियत्सप्रकृतिर्जलस्य॥५४ इक्ष्वाकुवंशप्रभवोयदातेभेत्स्यत्यजःकुंभमयो।
मुखेन संयोक्ष्यसेस्वेनवपुर्महिम्नातदित्यवोचत्सतपोनिधिर्माम्॥५५॥संमोचितःसत्त्व
55 वतात्वयाहंशापाच्चिरप्रार्थितदर्शनेन प्रतिप्रियंचेद्भवतोनकुर्यांवृथाहिमेस्यात्स्वपदोपलब्धिः५६

इक्ष्वाकुइति। ।इक्ष्वाकुवंशेप्रभवोयस्यसःअजोयदातेकुंभंमुखेनलोहाग्रेणशरेणभेत्स्यति
विदारयिष्यति। तदास्वेनवपुषामहिम्नापुनःसंयोक्ष्यसेसंगंस्यसेइतितपोनिधिर्मामवोचत्॥५५
संमोचितइति॥ ।चिरप्रार्थितदर्शनंयस्यतेनसत्त्ववताबलवतात्वयाअहंशापात्संमोचितःमो
क्षप्रापितः भवतस्तवप्रतिप्रियंप्रत्युपकारंनकुर्यांचेन्मेस्वपदोपलब्धिःस्वस्थानप्राप्तिः॥ ०
पदंमनसितत्राणस्यानलब्ध्या।श्रिवक्तुर्व्यित्यमरः रुथाव्यर्थास्यादित्युक्तः प्रतिकर्तुमशक्तस्य
जीवितान्मरणंवरमिति॥५६॥

सङ्गति॥ सन्नतोपि धमात्रः किन्नु प्रकृतिः तथापि नागरूपं न शरीरं उत्सृज्य तेन रक्तोतेनावि
ष्मिते: तद्विस्मितैः सैन्यैर्दृष्टः सन् स्फुरत: प्रभामंडलस्य मध्यवर्तिकांतं मनोहरं व्योमचरं व
पुः प्रपेदे प्राप॥५१॥ अथेति अथ स नाचेन उपनीतैः आसीः कात्यङ्गोत्थैः कल्पहत्तोत्पन्नै
पुष्पैः कुमारं अजवकीर्याभिरूप्यदर्शनप्रभाभिः दंतकांतिभिः संवर्धितोरः स्थलेये तारहा
रः स्थूलमुक्ताहारस्तेयन सततथाह वाचोऽस्य सन्तीति वाग्मी वक्ता वाचो वाग्मीनिरितिग्मिनिर

सविधमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामंडलमध्यवर्ति कां॰
तं वपुर्व्योमचरं प्रपेदे॥५१॥ अथाज्ञया वाहनतेऽकुमारकल्पद्रुमोत्थैरविकीर्य पुष्पैः उवाच वा॰
ग्मी दशनप्रभाभिः संवर्धितोरस्थलतारहारः॥५२॥ मतंगशापादवलेपमूलादवाप्तवानस्मि
स्तनूजं मतंगजत्वं अवेहि गंधर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य॥५३

मंगतेति। ।अवलेपमूलात् गर्वहेतुकात् अवलेपस्तु गर्वे स्याल्लेपने दूषणेपि चेति विश्वः मतं।
जस्य मुनेः शापात् मतंगजत्वं अवाप्तवानस्मि मां प्रियदर्शनाख्यस्य गंधर्वपतेः गंधर्वराजस्य तनू
जं स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः तन्वादेर्वेति केचित् ऊङ्. प्रियं वदतीति प्रियंवदः प्रियवशेवं॰
दः खच्चिति खच्प्रत्ययः॥ ॥५३॥ ॥प्रियंवदाख्यमेव जानीहि॥ ॥५३॥ छ ॥

र०टी
स० ५
६२

तथेति ॥ ॥ नृषु सोम इवेति नृसोमः सोम ओषधिचंद्रयो रिति शाश्वतः पुरुषश्रेष्ठ इ(
त्यर्थः उपमित समासः अस्त्रवित् अस्त्रज्ञः सोऽजस्तथेति सोमउद्भवो यस्याः सा तस्याः सोमो(
द्भवायाः सरितो नर्मदायाः रेवा तु नर्मदा सोमोद्भवा मेकलकन्यके त्यमरः पवित्रं पयः उप(
स्पृश्य पीत्वा आचम्येत्यर्थः उदङ्मुखः सन् निगृहीतशापान्निवर्तितशापादुपकृतादित्यर्थः तस्मि
न्प्रियंवदादस्त्रमंत्रं जग्राह ॥ ५९ ॥

तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः उदङ्मुखः सोऽस्त्रविदस्त्र
मंत्रं जग्राह तस्मान्निगृहीतशापात् ॥ ५९ एवं तयोरध्वनि दैवयोगादासेदुषोः सख्य
मचिंत्यहेतु एको ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान् ॥ ६० ॥ ७ ॥

एवमिति ॥ ॥ एवमध्वनि मार्गे दैवयोगाद्दैववशाद् अचिन्त्यहेतुम् अनिर्धार्यहेतुकं सख्यं
सखित्वं सख्युर्य इति प्रत्ययः आसेदुषोः प्राप्तवतोस्तयो र्मध्ये एको गंधर्वश्चैत्ररथस्य कु
वेरोद्यानस्य प्रदेशान् अस्योद्यानं चैत्ररथं इत्यमरः अपरोऽजः सौराज्येन राजन्वत्तया
रम्यान् विदर्भान् विदर्भदेशान् ययौ ॥ ६० ॥

६२

संमोहनमिति ॥ ॥ हे सखि मम खित्रात्वसासमं प्राणः ऽतोक्रायथोक्तं। अत्यागसहनो बंधुः सदै
वानुमतः सुहृत् एकक्रियं भवेन्मित्रं समप्राणः सखा मत इति प्रयोगसंहारयोर्दप्रवृत्तिपसंकोच
योर्विभक्तमंत्रं गांधर्वदेवताकं संमोहनं ते वीरास्त्रं नेनेति संमोहनं नाम ममस्त्रं त्वसाधत्स्व।
ग्रहाणायतोत्रस्यात्त्प्रयोक्तुरस्य प्रयोगिनोऽरिहिंसा न च विजयश्च हस्ते हस्तगतो विजयो भ
वतीत्यर्थः ॥ ५७ ॥

संमोहनंनाम सखेममास्त्रंप्रयोगसंहारविभक्तमंत्रं। गांधर्वमाधत्स्वयतःप्रयोक्तुं
र्नचारिहिंसाविजयश्चहस्ते ५७॥ अलंह्रियामांप्रतियन्मुहूर्तंदयापरोऽभूःप्रहरन्नपित्वं
तस्मादुपछंदयतिप्रयोज्यंमयित्वयानप्रतिषेधरौक्षं ॥ ५८ ॥

वधलज्जितः कथमनयहणापरःस्यामितिचिंताह ॥ ॥ अलमिति ॥ किं च मां प्रति कि
याप्रहारनिमित्तपालंकृतः यद्यतोहनोः त्वं मां प्रहरन्नपि मुहूर्तं दयापरः कृपालुरभूः तस्मा
दुपछंदयति प्रार्थयमानेमयि त्वया प्रतिषेधः परिहारः सएवरौक्ष्यं पारुष्यं तन्न प्रयोज्यं न कर्तव्यं ॥ ५८

र॰टी
स॰
६२

ग्द्वारस्थवेद्यां विनिवेशिताः प्रतिष्ठापिताः पूर्णकुंभा यस्यां तां स्थापितमंगलकलशामित्यर्थः।
रम्यां रमणीयां नवोपकार्यां नूतनराजभवनं उपकार्या राजसद्मन्युपचारचितेऽन्यवदि।
तिविश्वः मदनो बाल्यात्परां शैशवादनन्तरां दशां यौवनमिवाध्युवास अधिष्ठितवान्
तत्रोषितवानित्यर्थः उपान्वध्याङ्वस इति कर्मत्वं॥ ६३ ॥ तत्रेति। तत्रोपकार्यायां स्वय

तत्र स्वयंवरसमाहृतराजलोकं कन्याललामकमनीयमजस्य लिप्सोः भावावबो
धकलुषा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव॥ ६४ तं कर्णभूषणनि
पीडितपीवरांसं शय्योत्तरच्छदविमर्दकृशांगरागं वैतालिका ललितबंधमनो
हराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः॥ ६५ ॥ ७ ॥ ७ ॥ ७ ॥

वरनिमित्तं समाहृतः संमेलितो राजलोको येन तत् कमनीयं स्पृहणीयं कन्याललामकन्यासु।
श्रेष्ठं ललामो। स्त्रीललामापि प्रभावेपुरुषेध्वजे श्रेष्ठाश्वभूषापुंड्रशृंगपुच्छचिह्नाश्वलिंगि।
ष्ठितियादवः। लिप्सोर्लब्धुमिच्छोः लभेः सन्नन्तादुप्रत्ययः अस्य भावबोधेऽभिप्रायप
रिज्ञाने कलुषाऽसमर्था दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखीव बभूव राजानं कामिनं चो

ऽप्रविशेऽङ्गरागराङ्ग इति भावः अभिमुखीभावे ऽभिवंतस्य

ताका ५ सर्ग ५

८

६२

S7

नमिति॥ ॥नगरस्योपकंठेसमीपेतस्थिवांसंतमजंतस्याजस्यागमनेनारूढउत्पन्नोगुरु
प्रहर्षोयस्यसःक्रथकैशिकेंद्रोविदर्भराजःप्रवृद्धोर्मिरूर्मिमालीसमुद्रःचंद्रमिवप्रत्युज्जगा
मः॥६१॥प्रवेश्येति। ।एनमजमग्रयायीसेवार्थमग्रगःपुरोगःसन्नर्पितश्रीःनीचैर्नम्रःपुरंप्रवेश्यप्र
वेशंकारयित्वाऽर्पितश्रीःतथातेनप्रकारेणोपाचरितवान् यथायेनप्रकारेणतत्रपुरेसमेतोमि
लितोजनोवैदर्भंभोजमागंतुंप्राघुणिकंमेने।अजंगृहेशंगृहपतिंमेने॥ ६२॥ ॥ ॥
तंतस्थिवांसंनगरोपकंठेतदागमारूढगुरुप्रहर्षः प्रत्युज्जगाम क्रथकैशिकेंद्रश्चंद्रंप्र
वृद्धोर्मिरिवोर्मिमाली॥६१॥प्रवेश्यचैनंपुरमग्रयायीनीचैस्तथोपाचरदर्पितश्रीःमेने
यथातत्रजनःसमेतोवैदर्भमागंतुमजंगृहेशं॥६२॥तस्याधिकारिपुरुषैःप्रणतैःप्रदिष्टां।
प्राग्द्वारवेदिविनिवेशितपूर्णकुंभां रम्यांरघुप्रतिनिधिःसनवोपकार्यांबाल्यात्परामि
वदशांमदनोध्युवास॥६३॥तस्येति॥रघुप्रतिनिधिःरघुकल्पोरघुतुल्यइत्यर्थः।उक्तंचदंडि
नासादृश्यवाचकप्रस्तावेकल्पदेशीयदेश्यादिप्रख्यप्रतिनिधीअपीति सोऽजःप्रणतैर्नमस्कर्तृ।
भिःकर्मकरैःतस्याजस्याधिकारोनियोगस्तस्यपुरुषैरधिकृतैरित्यर्थःप्रदिष्टांनिर्दिष्टां प्रा

र.टी. म.

58

नयाहः तां धुरं एकेन एकोऽद्वैतेन वपुषा पितामितिनिसन्नविसर्जितस्याः धुरो भवान्धुरं वह
तीति धुर्यः आधुर्यः भारवाहीत्यस्य पदं वाहनस्थानं अपरं च धुर्यपदं तवद्वलं वीततो विनि
जो भवेत्यर्थः नहि द्वभावाघेएको वहतीति भावः ॥६६॥ निजेति॥ चंद्रारविंदराजवद
नाद्योलक्ष्मीनिवासस्थानानि इति प्रसिद्धिमाश्रित्योच्यते निजवशेन निरोधनेन ल्भंतर।
संयोगोत्रध्वन्यते भवता पर्युत्सुकत्वमपि त्वय्यनुरक्तत्वमपीत्यर्थः प्रसितोत्सुकाभ्यां तृतीया
चेत्स समर्पयेत्तलीया। अशिपिशाब्दस्य हि भयानुरागस्यानपद्धत्वद्योतनार्थं निखिलखंडिताम
तुं रन्यासंगरा। ज्ञानकलुषिताऽबलेवनायिकेव ज्ञानेन्यासंगविकृतत्वं डितेव्याकयायितेति।
रवारूपके अनवेक्ष्यमाणाऽविचार्यरयंतिउपेक्षमाणा इत्यर्थः लक्ष्मीर्येन चंद्रेण सहत्वादान
नसदृशत्वादिति भावः विनोदयति विनोदं करोति विनोदशब्दात्करोतीति तदाचष्टे इति णिच् ॥
साहृश्यपदर्शनाद्योहि विरहिणां विनोदस्थानानीति भावः सचंद्रः दिदिगंतलं वीपश्चिमा।
मागतः सन् अस्तंगच्छ नित्यर्थः अथवा निजवशेन भवता अनवेक्ष्यमाणा निरीक्ष्यमाणा कर्म
णिशानच् लक्ष्मीः प्रयोजककर्तारयेन चंद्रेण प्रयोजनेन पर्युत्सुकत्वं हिरहवेदनाकालातमत्व

तमिति। ।कर्णभूषणाभ्यां निपीडितौ पीवरौ पीनौ अंसौ यस्य तं। शय्या उत्तरच्छदस्य उपर्या
स्तरणवस्त्रस्य विमर्देन घर्षणेन कृशो विरलोंगरागो यस्य तं तल्पगतासंगाद्दिति भाव
प्रथितबोधं प्रकृष्टज्ञानं तमेनं सवयस्काः समानवयस्काः उदारवाचः प्रगल्भगिरः सूता
त्मजा वंदिपुत्राः वैतालिका इति वा पाठः वैतालिकाः बोधकराः इत्यमरः वाग्भिः स्तुतिपाठैः।
पुरुषासि प्राबोधयन् उष प्रबोधयामासुः॥६५॥

रात्रिर्गता मतिमतां वर मुंच शय्यां धात्रा द्विधैव ननु धूर्जगतो विभक्ता। तामेकतस्तव
विभर्त्ति गुरुर्विनिद्रस्तस्या भवानपरधुर्यपदावलंबी॥६६॥ निद्रावशेन भवताप्यनवे
क्षमाणा पर्युत्सुकत्वमबला निशि खंडितेव। लक्ष्मीर्विनोदयति येन दिगंतलंबी सो।
न१ पि त्वदाननरुचिं विजहाति चंद्रः॥६७॥

रात्रिरिति। हे मतिमतां वर निर्धारणे षष्ठी रात्रिर्गता शय्यां मुंच विनिद्रो भवेत्यर्थः विनिद्रत्व
फलमाह धात्रेति धात्रा ब्रह्मणा जगतो धूर्भारः धूः स्याद्यानमुखे भारे इति यादवः द्विधैव
द्वयोरेवेत्यर्थः एककारस्तृतीयनिषेधार्थमित्यर्थः विभक्तानुविभज्य स्थापिता खलु तत्किम

र॰टी॰ म॰ ६६

ताम्रेति॥ ॥ताम्रोदरेषु अरुणाभ्यंतरेषु तरुपल्लवेषु पतितैर्निर्धौताया हारगुटिकामुक्तकर्ष इत्यमरः

तद्वद्विशदैः हिमांशोः लब्धपरभागतया लब्धगुणोत्कर्षतया परभागो गुणोत्कर्ष इत्यमरः अध

रोष्ठयति तं त्वदीयं सदृशं नार्हति इदं तु कांतियुक्तं लीलास्मितवाक्यमातिशोभते॥ ७०॥ ॥ ॥

रे। ताम्रोदरेषु पतितं तरुपल्लवेषु निर्धौतहारगुटिकाविशदं हिमांशोः आभाति लब्धपरभागः

नयाधरेषु लीलास्मितं सदृशं नास्ति बिंब त्वदीयं॥ ७०॥ यावत्स तापनिधिराक्रमते न तानु

रुपायंतावदरुणेन तमो निरस्तं आयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयं (कं

मुच्छिनत्ति॥ ७१॥ यावदिति॥ प्रतापनिधिस्तेजोनिधिर्भानुर्यावन्नाक्रमते नोदयति :

59

आङ्‌उद्गमन इत्यात्मनेपदं तावदनुदित एवेत्यर्थः अह्नाय झटिति झाक्‌जटित्यञ्जसाह्नाये।

त्यमरः अरुणो नानूरुः सूर्यसूतोऽरुणोऽनूरुरित्यमरः नमो निरस्तं याहि हे वीर त्वयि।

आयोधनेषु युद्धेषु युद्धमायोधनं जन्यमित्यमरः अग्रसरतां पुरःसरतां याते सति तव गुरुः

पितारिपून् स्वयमुच्छिनत्ति किं वा नोच्छिनत्त्येवेत्यर्थः सुतो ह्येव सततमाराणां स्वामिनां स्व। ६७

यं व्यापारखेदो न भवतीति भावः॥ ७१॥

तदिति॥ तस्मात्त्वदीयपरिग्रहकारणात् वल्गुना मनोज्ञेन वल्गुस्यान्मनोज्ञे च वल्गुना बितापि
त्यमर इति शेषः युगपत्तावदुन्मिषितेन युगपदेवोन्मीलितेन सद्योऽपि परस्परतुलामन्योन्यसा
दृश्यमधिरोहतामारोहतां प्रार्थनायां लोट् द्वे के अन्तः प्रस्यंदमानाश्चलंती परुषेतरा स्निग्धा ता
रका नीतिका यस्य तत्तथोक्तं तारा कनीनिका कनीनिकेत्यमरः तव चक्षुः अन्तः प्रचलन् भ्रमरो यस्य तत्पद्मं
च युगपदुन्मिषिते सति संपूर्णसादृश्यं प्राप्नुत इति भावः ॥ ६८ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥

तद्वल्गुना युगपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहतां द्वे प्रस्यंदमानपरुषेतरता
रमंतश्चक्षुस्तव प्रचलितभ्रमरं च पद्मं ॥ ६८ ॥ वृंतश्लथं हरति पुष्पमनोकहानां संसृज्य
ते सर - सिजैररुणांशुभिन्नैः स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमारुतस्य

वृंतेति॥ विभातवायुः प्रभातवायुः स्वाभाविकं नैसर्गिकं ते तव मुखमारुतस्य निश्वासपवनस्य॥
सौरभ्यं तादृक् सौगंध्यं परगुणेनान्यदीयगुणेन संक्रामिकरूपेण स्वयं इप्सुराप्तुमिच्छुरिवः आ
प्नोधामीदितीकार इत्यः अनोकहानां वृक्षाणां शिथिलं पुष्पं वृंताद्बंधनात् वृंतं प्रसवबंधन
मित्यमरः हरत्यादत्ते अरुणांशुभिन्नैः किरणोद्बोधितैः सरसिजैः कमलैः सह संसृज्य

तत्सुगंधेन स्वकृत्यमिति संसृज्यते संगच्छते कर्मकर्तरि लट् ६९

सां ५

र॰टी॰ अतः वनेषु सलिलकाननेष्वित्यमरः दीर्घेषु पटमंडपेषु नियमिता बद्धा वनायुदेश्या वनायुदेशभवा पा
म॰ रसीका वनायुजा इति हलायुधः अमी वाहा अश्वाः निद्रां विहाय पुरोगतानि अग्रे प्राप्तानि लेह्या
६५ नि आस्वाद्यानि सैंधवशिलाशकलानि सैंधवो ऽस्त्री शीतशिवं मणिमंथं च सिंधुज इत्यमरः
वक्त्रोष्मणा मुखमारुतेन मलिनयंति मलिनानि कुर्वंति उक्तं च सिंधयोगसंग्रहः श्लोक

दीर्घेष्वमी नियमिताः पटमंडपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः। वक्त्रोष्मणा मलि
नयंति पुरोगतानि लेह्यानि सैंधवशिलाशकलानि वाहाः॥७३॥ भवति विरलभक्तिर्म्ला
60 नपुष्पोपहारः स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः। अयमपि च गिरं नस्त्वत्प्रबोधप्र
युक्तामनुवदति शुकस्ते मंजुवाक् पंजरस्थः॥७४॥

काले वाश्वानां आयशो लवणं हितं: मूलानाह विबंधघ्नं लवणं सैंधवं वरमित्यादि॥७३॥
भवतीति॥ ।म्लानपुष्पोपहारः पुष्पपूजा म्लानत्वात् विरलभक्तिर्विरलरचनो भवती।
ति प्रदीपाश्च स्वकिरणानां परिवेषणस्य मंडलोद्भेदेन स्फुरणेन शून्या भवंति निस्तेज
स्का भवंतीत्यर्थः अपि च अयं मंजुवाक् मधुरस्वनः पंजरस्थस्ते तव शुकस्त्वत्प्रबोधनिमित्ते ६५

श्राव्यः मिति॥ ॥उन्नाम्यां पदाभ्यां विनीता अपनीता निद्रा येषां ते उन्नयपदविनीतनिद्रा अ
असमासविषये उन्नयशब्दस्थाने उन्नयशब्दप्रयोग एव साधुरित्यनुसंधेयं यथाहकैयटः
तत्रोन्नाडुदात्तो नित्यमिति निन्यग्रहणास्येदं प्रयोगजातं वृत्तिविषये उन्नयशब्दस्य प्रयोगो।
वृत्त उन्नयशब्दस्यैव यथास्याडुन्नयपुत्रम इत्यादि भवतीति मुखराण्युत्थानचलनाकुरा
यमानानि शृंखलानि निगडानि कर्षयंतीति योकाः तेसंतु बकर्षणयोगसिजयोरित्यच॥ ॥
शय्यां जहत्युन्नयपदविनीतनिद्राः स्तंबेरमा मुखरशृंखलकर्षिणस्ते येषां विभाति
तरुणारुणरागयोगाद्भिन्नाद्रिगैरिकतटा इव दंतकोशाः ॥ ७२ ॥ ॥ ॥ ॥
अत्यये हस्तिस्वचकपारिति वक्ष्याः इमः स्तंबेरमः पद्मीत्यमरः तन्पुरुषे कृति बहुलमिति सप्त
म्यामलुक् शय्यां जहाति त्यजंति येषां स्तंबेरमाणां दंताः कोशा इव दंतकोशाः इतकुम्भल
स्तरुणारुणरागयोगाद्बालार्ककिरणसंपर्काद्भिन्नाद्रिगैरिकतटा इव विभांति धातुरक्ता।
इव भातीत्यर्थः ॥७२॥ दीर्घिकेति॥ हे वनजा हनीरजा हवनं नीरं वनं सत्वमिति कोशा।

Acc. 102

सर्ग ५

र॰टी॰ अथेति अथोत्थानानंतरं अंचितानि कुटिलानि अक्षिपक्ष्माणि नेत्रलोमानि यस्य सोऽजः
स॰ शास्त्रदृष्टं अवगतं दिवसमुखोचितं प्रातःकालोचितं विधिमनुष्ठानं अवसाय्य सम
६६ प्य। स्वदेहप्रसाधनोत्सुकः कुशलैः प्रसाधनदक्षैर्विरचितः संपादितः अनुरूपः स्वयंव
रोचितो वेषो नेपथ्यं यस्य स तथोक्तः सन् स्वयंवरस्थमंडपगतं क्षितिपसमाजं रा
जसमूहमगात् अगमत् इणो गा लुङीति गादेशः। पुष्पिताग्रावृत्तमिदं तदुक्तं

अथ विधिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमंचिताक्षिपक्ष्मा। कुशलविरचि
तानुरूपवेषः क्षितिपसमाजमगात्स्वयंवरस्थं॥७६॥ इति श्रीरघुवंशे महाका
व्ये कालिदासकृतौ स्वयंवराभिगमनो नाम पंचमः सर्गः ५॥ ॥ ॥

61

अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति॥ ७६॥ इति श्रीपदवा
क्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां रघुवंशव्या
ख्यायां संजीविनीसमाख्यायां पंचमः सर्गः॥ ५ ॥ ॥ ॥ ॥ ॥ ॥ ६६

प्रयुक्तामुच्चारितांनोस्माकंगिरंवाणीमनुवदत्यनुकृत्यवदतीतिरर्थः इत्थंव्रजातलिंगा
निवर्त्तेते॥तत्प्रबोधयतिनाथः॥७४॥इतीति॥ इतीत्थंविरचितावाग्भिर्बंदिपुत्रैर्वैतालिके
पुत्रग्रहणंसमानवयस्कत्वद्योतनार्थं सपदिविगतनिद्रः कुमारः कुमारस्तल्पंशय्यांतु
ल्पंशय्याम्बुदारेष्वित्यमरः उज्झांचकार विसर्जउज्झउत्सर्गइत्यस्मादिजादेश्चगुरुमतोनृच्छ

इतिविरचितवाग्भिर्बंदिपुत्रैःकुमारः सपदिविगतनिद्रस्तल्पमुज्झांचकार मदपटु
निनदद्भिर्बोधितोराजहंसैःसुरगजइवगांगंसैकतंसुप्रतीकः॥ ७५ ॥ ७ ॥

इत्यन्वयः कथमिवः मदेनपटुमधुरंनिनदद्भिराजहंसैर्बोधितःसुप्रतीकाख्यःसु
रगजः ईशानदिग्गजः गंगायाइदंगांगंसैकतंपुलिनमिवः तोयोत्थितंतत्पुलिनंसैकत।
तंसिकतामयमित्यमरः सिकतासैकतान्याचेत्यणप्रत्ययः सुप्रतीकग्रहणंप्राय।
शः कैलाशवासिनस्तस्यनित्यंगंगातटविहरणसंभवादित्यनुसंधेयं॥ ७५॥ ७॥

रघु

१ प्रास्वाद वदमिकीजी ससमाठ मंडले प्ररमपेने ंराजस्पेन
मंडले स्पट एगनाक वलै मासे कडुपनै वनमसीका रंगानैव
रगे दसामु वनमसीकै पमक १ प्रमाजते १ प्रपातिकति
॥१ प्रास्वाद वडि कव लै एगनौ कडुपनै
62 सनिवार रौ १ प्रमानै मेर तै सत स्वास
मास समाराधन नंसत परो मुत ॥५॥ द ध
वद गप वरिपिस मासधना पी प्रो वमा ॥ द ध द

१म
३म

बृताप्रथेनानुचरेननुजीवनायेतीभावः।।तेनदिलीपेनयोषोऽप्रेसि
द्धोऽप्यनुपानि वर्ज्जः।।प्रनुचरवर्गोऽप्रबोधितेवातित्त।। बिसवगु
वृत्तीमपेसपाकपंतानी।।प्र...रतणोमनः।।पुःदितस्यादितिपरिश्रा
रीरसोचासततन्वच।।पुरुमातकुतोहि पंस्मात कारणात्मनेप्रउ
।। बृतापतेनानुचरेणायनोऽमबोधितोऽप्यनुपादिवर्गीनत्ताप
तस्तस्यशरीररक्षाँसविधिर्पगुप्तादिमनेप्रसुतिः।।४।।
तिस्वाविपेगुप्तास्वविपेरेवरक्षितानहिस्वपालितबडीकस्यपरोते
तिभावः।।: प्रसुपरुति मंननतिनप्रसरातिरउपरितमाते

ला

धाः मपि गोपी: २ ...

... पांसु र दो ष्या ।। ... सुलो ... ह्वति पा: ता: पा सु ला कु ल ता: ।। नपा
सु ला ... पा कु ला: पाति त्रतोः तो सा ... सु ला ... धरि काष्ठ:

हे मही ... सवो दोषाः ७ पूसां संतति तो पा रुना: स्वैरि स्व: ष्य: वैा... का

... पादि समर: ।। सिध्मा द्रुम कुति तच वृ सक: २ पूपा रुत

नां पति पूता नं घुरि प्रजे कौ तीनि पा: पारि ग ला नि या: ।। मनुष्येश्वर

तस्या रघुरं सा सप वित्र पां सुमपां सुला नां धु रिकीर्ति नि पा ।।

मा गं मनुष्ये श्वरय मं पालि भ्र तेरि वा रपं स्य ति रवग

द्धत ।। २ ।। निव सौ राजा दु पि तां द पा लुत्तां सौ रमे पं सुराभ

पयो भिः पयो धर भु ताव तु स मुद्रां जु जो प गो रु प धरा म वो विरि

...मुरां भ म नो ज्ञः सुरभि स्या म ने जो पिते विभु स राजा तां पितां मि

वन सौ रभि विक म घेनु रु न नं द निं प ... तितो धरा प ... घे च प ... घा

63 तस्या रघु ... ह्वति: ... पा ला ... श्वर: म नु ... श्वर: ।। धर्मो ... पत्नी धर्म पत्नी ... नतु
भो गा ... पत्नी ।। ... पासे: ... पासे: पवित्र पां सवो पालि ... सत्तं ... ।। २ ।।

रामर

१ प्र बेति॥ १ पूर्वनिपातन पत्नीं नैतरं पयोधनः प्रजानामधिपः प्रजेश्वर। प्रह
माते प्रातःकाले जाय पाप्तीग्राहिति गंधमाल्य पस्याम्रा तांतत्प्रोक्तं
पित पानं प्रतिकृति पितः पितृवान र प्रपीः॥ १ पूर्वादिभ्यो प्राजित्पश्च मपः॥

१ प्रप प्रजानामधिप प्रमाते जाप प्रति
ग्राहित गंधमाल्यां व नाप पितृ प्रतिव
द्धव स्यां पयोध नो धेनुम बेमुमो चः

बाह्मणा इति मामा भा वेद दर्शनात् पितः प्रति बंधवत्सो पस्याकांक्षा बेर्य
ति मायपाव नंग तं मुमोचः॥ क्रिया कर्म पदे इत्यादि नाच तुर्थि जाया पदा
पापाः पुनाजनन योग्य मनु संधेयाः श्रुतिः॥ पतिजीवप्रवि

अतः महीपाल ... नन्वाशात ... सति मारुतस्य ...

हे महिपाल तव क्रमेण पूलसाध्यामावातव पाक्रमो न करतं भः
इत्यर्थः ॥ पूर्वं गम्यमानं साधनं किंपैंत रणपाक्रमस्यतती
मा ॥ तद्दुकं वमासेनैन केवलं प्रपमाहो वक्रिपानि भिः पले
पूलं महिपाल तव क्रमेण पपुलमय्यस्मितो वप्पास्यात
64 नपादपोन्मूलनपाकिरंहः शैलोच्चैर्मुर्द्धति मारुतस्य ॥ ३४ ॥
दो कैलाशगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं ॥ प्र
वेहि मां किंकरमष्टमूर्तेः कुंभोदरं नाम निकुंभमित्रं ॥ ३५ ॥
प्रयुक्तमपि वृथा स्यात तत्र ... पादपोन्मूलने सक्तिरपस्य
तथोतपेतं निकुंभतुल्यकुंभोदरनामगं ॥ प्रवेहि द्धाविद्धि तान

॰प्र मसिमित प्र॰ सुपुर॰ प्रग्रतां ॥ प्रसु देवदासपस्य सिसिको
ष्टु॰ प्र सौ देवदासव ब मो धूम्रज्ञेस्य तेनाली बेन पुत्र क्रत पु न्नै ॥
वेन सौ कृत॰ प्रमु तद्भावाच्छि यो देवदासु स्कंध स्य मातु औ
॰प्र सुपुर स स्पासि देवदास पुत्रि क्रतो सौ वषम धूडं नेन
बो सौ हेन कुं मसा नानिस ता तां स्कंद स्य मातुः पप सार
सा ॥ ३६ ॥ कंडु पमानेन कंटकना चिद्द म द्विपेनो म
पिता नगस्य॰ प्र पैन मद्रे स्तं न पापुपोच सेनान कांति
ढमीव मानी ॥ ३७ ॥

वाक्तौ वाक्प्रति पंचमे न प्राति वंधौ विवध मयः राजा मंत्रौ वाधि न्पांरु घविपि
प्रति वध पाति भौजित पंच वर्गौ राजे जग पौ तिपा ध्वत प्रभ्पर रां प्रास
कं प्रागस क्रूतं प्रधराधं कारिणं प्रस्प सद्भिः स्वते जो भिरंतर रदध्य तां
वादु प्रातिपं भावि वद्धं मनु रभ्पर्णा भाग स्वृतस्य सद्भिः ॥ राजा स्वते
जो भिरदस्यतां तं भोगिव मंत्रौ वाधि रुधवी पैः ॥ ३२ ॥ ते मापिंग रु
निंगदिघे नु मेनुष्य वाचा मनु वंपा केतु विस्माप पतिं स्मितमा सवत्तौ भु
पालसिंहं निजगादसिंह ॥ ३३ ॥ ५६ ५६ ५ ५ ५ ५ ५
तमितौतिंग दितापाडे वाह्यापते षु चौतिका प मनु वंसस्य केतु चिह्न वेतु
कतम वंतं कासिद्ध वं ३ रुस तौ मनाव का प्राल नौ वता प्रभूत
६५ सिंहः तं भूपाल तं मनुष्य वा ति जगाद ... २३

तस्य कावेतरकरः सापकांक्षेरणं जे वा लि.

मृदा

ततइतिततसिंहदर्शनानन्तरं मृगेन्द्रगामि सिंहगामित्विशरणं शरणांगतहरति शेरि
कुमरणरणं रततोजहृइति पादनं शरणं साधुःशरणमतन्त्र साधुरितिच तंप्रहपप्रस
मेनन लोकारेण उधृतोऽग्रपरपोपेन।। नृपतिराजा तामि बंगाः जात पराभवसन
मभिवंगः पराभवं समर बध्यस्य वधात् दस्यदंडादि भोप इति पप्रस पमृगेन्द्रस्य
ततोमृगेन्द्रस्य मे उ मृगामि वधायव धस्य शरं शर रापः।। जातामि वंगेन
पतीनि बंगात् हृत्तुं मे घस्रम मोघ्रतारिम ३०।। वामे तरसस्य करः प्रहृतुंन
66 खपप्रभामुखितकं कपवे।।म कांगुलिः सापकंपुं रवरावं चित्रापितारंभरं
वैवतस्या।।३।। ध ध ध ध ध ध ध ध ध ध ध ध ध ध ध ध
वधावानि बंगात तु गरा तत् तु लोपा सं के न रानि बजाइ समर पारं उध
तुउधतुं मे कृतं।।३०।। ध ध ध ध ध ध ध ध ध ध ध ध ध

उ ... मे से ... मु. ... कु. से ... ते